विष्णु		सूर्य
	शिव	
देवी		गणेश

(२) श्री विष्णु पंचायतनम्

शिव		गणेश
	विष्णु	
देवी		सूर्य

(३) श्री देवी पंचायतनम्

विष्णु		शिव
	देवी	
सूर्य		गणेश

(४) श्री सूर्य पंचायतनम्

शिव		गणेश
	सूर्य	
देवी		विष्णु

(५) श्री गणेश पंचायतनम्

विष्णु		शिव
	गणेश	
देवी		सूय

शतचण्डीविधानं च सहस्रचण्डीविधानम्

दुर्गापाठ वृद्धि विचारः –

एक द्वे त्रीणि चत्वारि जपेद्दिन चतुष्टयम् ।
रूपाणि क्रमशस्तद्वत् पूजादिकमाचरेत् ॥

इस तरह से चार दिन में दश पाठ करें । पांचवें दिन हवन करें।

शुभ लक्षणान् दशविप्रान् मधुपर्क वस्त्रहमदानादिना वृणुयात् । (आचार्याय तु द्विगुणम्) ते च यजमानदत्तासनेषु दत्तमालाभिः समाहिता सुमनसो भगवतिं स्मरन्तः । सप्तशती मूलमंत्रेणवैद्यां कुंभ स्थापित्वा तत्र दुर्गामावाह्य षोडशोपचारैः संपूज्य। प्रत्येक दशकृत्वः सप्तशतीमयुतं च नवार्णं पृथक् जपेत्। हविष्य भोज्य भोजन ब्रह्मचर्य भूयशयना स्पृश्यास्पर्शादि नियमांश्चरेयुः ॥

शतचण्ड्यां द्विहस्तं सहस्त्र चण्ड्यां चतुर्हस्तं कुण्डं स्थण्डिलं वा चतुरस्त्र पद्मकण्डं वा कुर्यात कुण्डग्रंथोक्त विधिना कृत्वा। शतचण्ड्यां पलेन (तोला) सहस्त्रचण्ड्यां पल पंचकेन मूर्त्यध्यायोक्त प्रतिपादितां महिषमर्दिनी प्रतिमां कारयित्वाअत्र शतचण्डीजपे ऋत्विजो नव आचार्यो दशमः। सहस्त्र चण्ड्यां शतमृत्विजः अष्टौ लोकपालाः भवन्ति प्रत्येक चण्डिकापाठम् विदध्युस्तु दिशा मितान्। अयुतं प्रजपेयुस्ते प्रत्येकं नववर्णकम्। पूर्वोक्ताः कन्यकाः पूज्याः पूर्वमन्त्रैः शतं शुभाः। एवं दशाहं संपाद्य होमं कुर्युः प्रयत्नतः।। सप्तशत्याः शतावृत्या प्रतिश्लोकं विधानतः। लक्षसंख्यं नवार्णेन पूर्वोक्तैर्द्रव्य संचयः।।

क्यों कि एक पाठ के साथ १० माला नवार्ण की फेरने से शतचण्डी पाठ के साथ एक लक्ष नवार्ण जप हुये तो मंत्र के दशांश का होम चण्डी पाठ के अलावा करना होगा इसलिये कहा कि —

होम काले बीज संयोगो दुर्गामंत्रेण पृथक हुनेत् ।

(शतचण्डी प्रयोगे) -

सप्तशत्यादशावृत्त्या प्रतिश्लोकें हुतं चरेत् । अयुतं च नवार्णेन स्थापिताग्नौ विधानतः।। कृत्वाऽऽवरण देवानां होमं तन्नाम पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च। अभिषिञ्चेच्च यष्टार विप्रोघः कलशौदकैः। सहस्त्रं चण्डिकां पाठं कुर्याद्वा कारयेत्तथा । भोज्याः सहस्त्र विप्रेंद्रा गोशतं दक्षिणां दिशेत्। गुरवे द्विगुणं देयं शय्यादानं तथैव च। सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम्।। अष्टदशभुजां देवी

(५ तोला की) सर्वायुध विभूषिताम्। अन्नं वारि चदातव्यं सहस्रं प्रत्यहं विभौ।।

दुर्गा होमे मन्त्राणाम् होम संख्याः

होमकाले बीज संयोगो दुर्गामन्त्रेण पृथक हुनेत् ।
कामना बीज संयोगो दुर्गामन्त्रेण संहुनेत् ।।

इसका आशय यह है कि दुर्गा पाठ **(बिना संपुट के)** करे तो उसके साथ १०माला नर्वाण मंत्र की जपने का विधान है अतः शतचण्डी प्रयोग के साथ एक लाख नवार्ण मंत्र हुये, अतः दुर्गा पाठ के अलावा नवांश के जप का दशांश होम भी अलग होगा और यदि संपुट के साथ पाठ किया है तो उसका दुर्गा मंत्रो के साथ पृथक् पृथक् हवन करना चाहिये।

दुर्गास्तवन मंत्राणां संख्या सप्तशतं भवेत् ।
कामना मंत्र संख्या च शतं चैव चर्तुदश ।।२।।
मध्ये मंत्रान् सप्तशतं होमकाले तु योजयेत् ।
पाठे मंत्र पुटं वाच्यं होम मंत्राः पृथक् — पृथक् ।।३।।
होम संख्या च मंत्राणां शतं वै चैक विंशतिः ।
पाठे बीज पुटं वाच्यं होमे बीज पुटं हुनेत् ।।४।।

(दुर्गा कल्प,अनुः प्रकाश).

पुनः मंतातरे (कर्मठ गुरौ):— कर्मठ गुरु मे प्रतिष्ठा सागर में से एक श्लोक दिया है जिसका स्पष्टीकरण पूरा नही होने से अपवाद भ्रांति पैदा होती है।

सम्पुटे हवनं नास्ति प्रत्यहऽपि (प्रति+एहि+अपि) तथैव च ।
नानाऽर्थसिद्धि वैकल्ये होमन्तु विपुलं चरेत् ।।

यहाँ यह तो साफ लिखा है कि होम बहुत तरह से होता है संपुट से हवन नही करे, परन्तु ऐसा करते है प्रथम पंक्ति के तीन आशय बनते है —

(१) एक पाठ के साथ १० माला नर्वाण का विधान भी लिखा है अतः एक शतचण्डी प्रयोग मे १०० पाठ के साथ एक लाख जप नवार्ण के हुये ऐसी परिस्थिति में संपुट के कामना बीज मंत्रो की २१०० आहुति एवं नवार्ण के जाप के दशांश होम से विधान बहुत बढ जाता है तब संपुटित विधान से हवन न करे

एवं नवार्ण का दशांश (एक अयुत) होम करे । यथा—

होमकाले बीज संयोगे दुर्गामंत्रेण पृथक हुनेत् ।

(२) **"संपुटे हवनं नास्ति"** दूसरा आशय यह है कि कामनामंत्र एवं दुर्गासप्तशती का मंत्र (१) तीनां का एक ही होम (पुटीत होम) न करें।

(३) **"संपुटे हवनं नास्ति"** दुर्गापाठ मंत्र (१) एवं कामना मंत्र का (२) का अलग अलग हवन नहीं करें परन्तु ऐसा करते तो हैं तथा हवन की बहुत सी विधियाँ भी है। पुनः सुपुट हवन (२१००) आहुति विधान भी प्रचलन में स्वीकार किया है जो कि श्लोक दूसरी पंक्ति में उद्धृत है।

स्तोत्रे न्यासऽभावे विचारः -

ऋषिछन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः ।
स्तोत्रं न दृश्यते यत्र प्रणवं तत्र विन्यसेत् ॥

अर्थात् जहां स्तोत्र के ऋषि, छंद उपलब्ध हो वहां उनके अनुसार न्यासादि करें एवं जहां स्तोत्र के ऋषि, छंद, कीलकादि उपलब्ध नहीं हो वहां प्रणव से ही न्यासादि करने चाहिये।

यथा — **ॐ शिरसि, ॐ छंदसे नमः मुखे, ॐ देवतायै नमः हृदयाय नमः, ॐ कीलकाय नमः नाभौ, ॐ नमः सर्वाङ्गे।**

एवं हृदयादि न्यास भी प्रणव से करे।

मंडप कार्येषु भूमिशोधनम्

यजमान के चन्द्र तारा बल अनुकुल हो उस दिन कुण्ड निर्माण हेतु **"शिववास"**, **"कूर्मवास"** शुभ दिन देखकर गणेशादि देवता स्मरण कर भूमि पूजन करें। पूर्व दिशा को शोधन करके कार्यारंभ करें।

यज्ञ से पहले ध्वजारोहण करना हो तो उस दिन **"स्तंभ चक्र"**, **"कूर्मवास"**, **"शिववास"** भी देखना चाहिये। ये मुहुर्त्त इस पुस्तक में कुण्ड निर्माण विधी में बताऐ गये है।

आचार्य यजमान सुवासीनियों तथा मंगलवाद्य सहित यज्ञ भूमि पर जावें। आसन पर विराजमान होकर आचम्य, प्राणायाम करके गणपति स्मरण तथा

संकल्प तत्पश्च्यात् दिग्रक्षण कर गणेशाम्बिका, भूमि पूजन करें। "व्रतेन दीक्षामाप्नोति" इस मंत्र से ब्राह्मण व आचार्य का वरण करें।

आचार्यो हि यथा स्वर्गे शक्रादिनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ।।

भूम्यावाहनम् – पृथ्वी का स्पर्श करके कहे।

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छपृथिवींदृ ठं हः पृथिवीं मा हि ठं सी ।।१।।

ॐ महिद्यौः पृथिवीचन इमं यज्ञंमिमिक्षताम् । पिपृतान्नोभरीं मभिः।।२।।

ॐ घृतवती भुवानानाभिश्रियोर्वी पृथ्वी मधुदधेसु पेशसा । द्यावा पृथिवी वरुणस्य धर्मणा विष्कभितेऽअजरे भूरिरेतसा ।।३।।

आगच्छ सर्वकल्याणि वसुधे लोकधारिणी ।
उद्धृतासिवराहेण सशैलवन – कानना ।।
रत्नाकरे विष्णुना त्वं धृता वाराहरूपिणा ।
आगच्छ वरदे धात्रि! यज्ञेऽस्मिन् शुभदायिनी ।।

"मनोजूतिर्जुषातामास्य" मंत्र से सुप्रतिष्ठा करें। फिर नमस्कार करें।

ॐ भूमिर्भूमिमिव प्रागान्माता मातरमप्यगात् ।
भूयाम पुत्रः पशुभिर्यो नो द्वेष्टि स नश्यतु ।।
ॐ शेषमूर्ध्नि स्थितां रम्यां नाना सुख प्रदायिनीम् ।
विश्वधात्रीं महाभागां विश्वस्य जननीं पराम् ।।
यज्ञभागं प्रतीक्षस्व सुखार्थ प्रणमाम्यहम् ।
तवोपरि करिष्यामि मण्डपं सुमनोहरम् ।।

ताम्रपात्र में पंचगव्य लेवे दस बार "ॐ" या गायत्रीमंत्र का उच्चारण करें हरिकुशाओं से भूमि का प्रोक्षण करें।

ॐ इरावती धेनुमतीहि भूतः सूयवसिनी मनवेदशस्या । व्यस्कं भारोदसी विष्णवे तेदाधर्त्थ पृथिवीमभीतो मयूखैः स्वाहा ।।१।। ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम् । समूढमस्यपा ठं सुरे स्वाहा ।।२।।

ॐ मानस्तोके तनये मानआयुषि मा नो गोषु मा नो अश्वेषुरीरिषः। मानो

वीरान्रुद्र भामिनो वधीर्हविष्मंत: सदमित्वाहवामहे ।।३।। ॐ शन्नो देवीरभिष्टय आपोभवन्तु पीतये। शंय्योरभिस्रवन्तुन: ।।४।। ॐ शन्नो मित्र: शं वरुण: शन्नो भवत्त्वर्य्यमा। शन्न इन्द्रो बृहस्पति: शन्नो विष्णुरुरुक्रम: ।।५।।ॐ देवस्य त्वा सवितु: प्रसवेऽश्विनो र्बाहुभ्याम्पूष्णो हस्ताभ्याम् । सरस्वतै वाचौ यन्तुर्यन्त्रोणाग्ने: साम्राज्येनाभिषिञ्चामि ।।६।। ॐ नृसिंह उग्ररूपं ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा ।।

इसके बाद सरसों लेकर "अपसर्पन्तु ये भूता" तथा "पूर्वे रक्षतु गोविन्दो" इत्यादि मंत्रो से दिग्रक्षण करें। इसके बाद षोडशोपचार से पृथिवी पूजन करें। ताम्रपात्र में जल, गंध, दुर्वा, यव, पुष्प, फल लेकर उत्तराभिमुख (उदङ्मुख) होकर अपने जानु को अवनीकृत करके अंजलिपुट होकर भूमि के "अर्घ्य" देवें।

वसुधे पूजितासि त्वं विष्णुना शंकरेण च ।
पार्वत्या चैव गायत्रा स्कन्द वैश्रवणादिभि: ।।१।।
मण्डपं कारयाम्यद्य त्वदूर्ध्व शुभ लक्षणम् ।
गृहाणार्घ्यं मयादत्तं प्रसन्ना भव सर्वदा ।।२।।

इसके बाद हल चला कर भूमिशोधन करें। गायों को यज्ञभूमि में बिठाया जाता है। सप्तधान्य का बीजारोपण भी करते है। यथा लोकाचारानुसार करें।

अथ मण्डप निर्माण कार्यम्

मंडप एक हाथ ऊँचा बनावें। १६ एवं १८ हाथ का मंडप उत्तम, १२—१४ हाथ का मण्डप मध्यम एवं ८—१० हाथ का मण्डप कनिष्ठ कहा जाता है। लंबाई चौडाई समान होवे। पूर्व दिशा का शोधन करके कार्य करें।

चारों दिशाओं में द्वार बनायें, प्रवेश द्वार पश्चिम दिशा का होगा। मध्य में चौकोर गुम्बज जैसा बनायें।

मंडप के चारों और जौ या सप्तधान्य बोने के लिये ईंटों का या पत्थर के छोटे टुकडों से घेरा बनाते है।

कुण्डनिर्माण जो पुस्तक के पृष्ठ भाग में है उस विधि से बनायें।

कुण्ड के प्रत्येक दिशा के तीन भाग करके ९ खंड प्राप्त करें। मध्य खण्ड के चारों कोणों पर चार स्तंभ आठ हाथ के तथा बाहर मंडप के चारों कोणों में

४ तथा बीच मे दो–दो स्तंभ = ८ कुल १२ स्तंभ पांच हाथ के गाड़े। प्रत्येक स्तंभ के पांचवे भाग तक भूमि में रोपण करें।

१६ खंभों पर १६ बल्लियां देवे। उन्हे छिद्र वाली चूडी मे पहिनावें। पूर्वादि चारों दिशाओं में दो–दो बल्लियां और ४ कोणों में चार बल्लियां इस तरह कुल २८ बल्लियां रोपें। मध्य भाग में लट्टू की तरह का शिखर बनायें।

मध्य के चारों कोणों पर ४ बल्लियां लट्टू से खंभ तक देने से ३२ बल्लियां हुई। स्तंभो के साथ देने से कुल ४८ बल्लियां हुई।

मध्य भाग में शिखर बनाकर बांस, चटाई या फूस आदि से चारों द्वारों को छोडकर छा देवें। चारों तरफ टाटी से ढ़क देवें।

वायु एवं पशु आदि से रक्षार्थ चार टाटी चारों द्वारों के लिये बनावें

तोरणादि

पूर्व में बड़ या पिपल का, दक्षिण में गूलर का, पश्चिम में पीपल का या पाकर का, उत्तर में पाकर या बड़ का तोरण बनायें अभाव में एक ही लकडी के सभी तोरण बनाये जा सकते है। द्वार भी इन्हीं लकड़ियों से बनाने को कहा गया है। तोरण द्वार मण्डप द्वार से एक हाथ दूर होता है।

शिवयाग एवं देवीयाग में चारों दिशाओं में त्रिशूल तथा विष्णुयाग में शंख, चक्र, गदा, पद्म पूर्वादि क्रम से लगावें।बड़ी ध्वजा २ हाथ या ३ हाथ चौड़ी ५ हाथ लंबी बनावें।अन्य ध्वजापताकाओं के रंग एवं वाहन पुस्तक में कुण्ड निर्माण विधि के साथ दिये गये है।

महाध्वज ईशान में लगाना चाहिये उसका बांस १०, १६, २१ या २३ हाथ का होवे। ध्वज ३ हाथ चौड़ा ५ या १० हाथ लंबा होवे। उसके कोण पर घंटी, घुंघरू तथा चंवर बांधना चाहिये।

पताका :— पताकायें १ हाथ चौड़ी ३–५–७ हाथ लंबी होवे उसमें दशदिक्पालों के चिन्ह अंकित कर दशों दिशाओं में स्थापित करें। यथा पूर्व दिशा में वज्र, अग्निकोण मे शक्ति, दक्षिण मे दण्ड, नैर्ऋत्य मे खड्ग, पश्चिम में पाश, वायव्य मे अंकुश, उत्तर मे गदा, ईशान में त्रिशूल, पूर्वईशान मध्य में कमण्ड्लु एवं पश्चिम नैर्ऋत्य मध्य मे चक्र बनावें। ध्वजायें भी एक हाथ लंबी दिकपालों के रंग निर्देश के अनुसार पताकाओं की तरह होवे।

कुण्ड निर्माण — कुण्ड निर्माण पुस्तक में दिये अनुसार करें।

वेदी निर्माण – नवग्रह वेदी १$\frac{1}{2}$ हाथ, सर्वतोभद्र की २ हाथ तथा अन्य वेदियां एक—एक हाथ की बनायें। अथवा नवग्रह पीठ ३४ अंगुल, मातृका पीठ १६ अंगुल, वास्तुपीठ, योगिनी एवं क्षेत्रापाल पीठ १२—१२ अंगुल के चौकोर बनावें।

पूर्व और उत्तर के मध्य में नवग्रह मंडल, उनके नीचे रुद्रकलश का स्थान एवं दीप का स्थान होगा। नवग्रह के पास पूर्व में सर्वतोभद्र मंडल, नैर्ऋत्य कोण में ६४ कोष्ठात्मक वास्तु मंडल, वायव्य मे क्षेत्रपाल मंडल बनावें। पश्चिम दिशा में वरुण मंडल बनायें।

योगिनी मातृका के पास पूर्व में स्थापित करें या क्षेत्रपाल के साथ वायव्य कोण में करें। (यही अधिक प्रचलित है।)

मंडप के स्तंभो पर वस्त्र वेष्टन – मंडप के मध्य में स्थित ईशान के स्तंभ पर काला (या लाल), अग्नि कोण मे लाल (या काला), नैर्ऋत्य एवं वायव्य में पीला वस्त्र लगायें।

बाहरी स्तंभो पर १. ईशान में लाल (या काला) २. ईशान एवं पूर्व मध्य में श्वेत ३. पूर्व एंव अग्निकाण के मध्य काला ४. अग्निकोण में काला (या लाल) ५. अग्नि कोण व दक्षिण के मध्य में श्वेत ६. दक्षिण एवं नैर्ऋत्य के मध्य में धूम्र ७. नैर्ऋत्य कोण में पीत ८. नैर्ऋत्य एवं पश्चिम के मध्य में श्वेत ९. पश्चिम एवं वायव्य कोण के पास श्वेत १०. वायव्य कोण में पीला ११. उत्तर एवं वायव्य के मध्य में पीला १२. उत्तर एवं ईशान के मध्य में लाल रंग का वस्त्र वेष्टन करें।

हेमाद्रि स्नानादि कर्म

थाली में स्वास्तिक बनाकर दशविधस्नान की सामग्री लेवें। यथा–

शंख, गरुड़घंटा, तुलसी, वपनप्रबन्ध, जलप्रबन्ध गूलर की दातून, यज्ञभस्म, गोमय, मृत्तिका चोराहे की, पंचगव्य, गोरज, यव, फल, सर्वोषधी, कुशा, सुवर्ण, यज्ञोपवीत, कांसी की कटोरी छायादान के लिये।

सबसे प्रथम कार्य आचार्य और ब्राह्मण सपत्नीक यजमान को तड़ाग पर या अन्यत्र कहीं भी दशविध स्नान करावे छायापात्र या पापघट का दान कराये और हेमाद्रि संकल्प, स्नान तथा स्नानांग तर्पण करावे। यथा–

अथ दश विध स्नानानि

संकल्प :-

ततौ देशकालौ संकीर्त्य मम समस्त पापक्षय पूर्वक विष्णु प्रीत्यर्थं ऽममुक कर्म साध्यर्थं वा अमुक देव प्रतिष्ठा कर्माधिकारार्थं शरीर शुद्ध्यर्थं च अमुक प्रायश्चित्त भूतान्यादौ भस्मादिभि स्नानानि करिष्ये।

भस्मस्नानम् । बायें हाथ मे भस्म लेवे थोड़ा जल डाले दक्षिण हाथ से मले एवं मंत्र पढें ॐ अग्निरिति भस्म वायुरिति भस्म। जलमिति भस्म, स्थलमिति भस्म ॐ व्योमिति भस्म सर्व ठं ह वा इदं भस्म सिर, पैर, मुख हाथ हृदय के लगायें।ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवेनमः। बाहुभ्यामुतते नमः-॥ यथाग्निर्दहते भस्म तृणकाष्ठादि सञ्चयम्॥ तथा मे दह्यतांपापं कुरु भस्मशुचेशुचिम् ॥ २॥ *अथमृत्तिकास्नानम्* । इदंविष्णुर्व्विचक्रमे त्रेधा निदधेपदम्। समूढमस्यपाठं सुरे स्वाहा। उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे पापं यन्मयादुष्कृतं कृतम्॥ मृत्तिके ब्रह्मपूतासि काश्पनाभिवन्दिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्॥ ३॥ *अथ गोमयस्नानम्* । ॐ मानस्ताकेतनयेमानऽ आयुषिमानो गोषुमानोऽ अश्वेषुरीरिषः। मानोवीरानरुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे॥ गोमये वसते लक्ष्मीः पवित्रा सर्वमंगला। स्नानार्थं संस्कृता देवी पाप मे हर गोमय॥ अग्रमग्रं चरन्तीनामोषधीनां वने वने। तासामृपभपत्नीनां पवित्रं कार्यशोधनम्॥ यन्मे रोगं च शोकं त मे दहतु गोमयं ॥ ४॥ *अथ पंचगव्यस्नानम्* । ॐ सह-स्त्रशीर्षापुरुषः सहस्त्राक्षः, सहस्त्रपात्। सभूमिर्ठं सर्व्वतस्पृत्वा त्यतिष्ठ्ठद्दशांगुलम् ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः समन्वितम्। सर्वपापविशुद्ध्यर्थं पञ्चगव्यं पुनातुमाम्॥ ५॥ *अथ गोरजः स्नानम्* ।ॐ आयं गौः पृश्निरक्क्रमीदसदन्मातरम्पुरः। पितरञ्चत्प्रयंत्स्वः ॥ गवां खुरेण निधूतं यद्रेणु गगने गतम्। शिरसा तेन संलेपे महापातक-नाशनम् ॥६॥ *अथधान्यस्नानम्*-ॐ धान्न्यमसि धिनुहि देवान्प्राणा यत्वोदानायत्वा व्यानायत्वा। दीर्ग्घामनुप्प्रसिति मायुषे धान्देवोवः सविताहिरण्यपाणिः प्प्रतिगृब्भ्णात्वच्छिद्रेण

पाणिना चक्षुषे त्वामहीनाम्पयोसि॥ धान्यौषधी मनुष्याणां जीवनं परमम्मृतम्। तेनस्त्रानेन देवेश ममपापंव्यपोहतु ॥७॥ *अथफलस्नानम्-* ॐ याः फलिनीर्य्याऽअफलाऽपुष्पा याश्चपुष्पिणीः। बृहस्पतिप्प्रसूतास्तानो मुञ्चनत्वर्ठुंहसः ॥ वनस्पति रसोदिव्यः फल पुष्पवृतःसदा। तेनस्त्राननमे देव फललब्धमनंतकम् ॥ ८॥ *अथसर्वौषधीस्नानम्* ॐ ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै कृणोतिब्ब्राह्मणस्त ठुंराजन्पारयामसि॥ ओषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः। दूर्वासर्षपसंयुक्ता सर्वोषध्यः पुनतुं माम् ॥९॥ अथ कुशोदकस्नानम्-ॐ देवस्यत्वासवितुः प्प्रसवेश्विनोर्ब्बाहुव्भ्या-म्पूष्णो हस्ताभ्याम्॥ कुशमूले स्थितोब्रह्मा कुशमध्येजनार्दनः। कुशाग्रे शंकरो देवस्तेन नश्यतु पातकम् ॥ १०॥ *अथहिरण्यस्नानम्* - ॐ आकृष्ष्णेन रजासाव्वर्त्तमानो निवेशयन्नऽमृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शान्तिम्प्रयच्छमे॥ ११॥

॥इतिदशविधस्नानानि॥

इसके बाद छायापात्र या पापघट का दान करें अथवा पापघट दान दशविधस्नान से पहले करे भी तो उत्तम रहे।

अथ छायापात्र दानम्

छायापात्र का दान किसी बड़े अनुष्ठान एवं यज्ञ के पूर्व तथा हेमाद्रि संकल्प स्नान के समय विशेष ग्रह पीड़ा समय कराया जा सकता है। तिलाक्षत पुञ्ज पर छाया पात्र रखे एवं उसे धृत से पूरित करें। छायापात्रं स्वपुरस्तिलराश्युपरि संस्थाप्य तत्र धारितशुद्धगोघृतं पूरयेत्, ततः सपत्नीको यजमानः स्वमुखमवलोकयेत्, तत्र मन्त्रौ--

ॐ आज्यं सुराणामाहारमाज्यं पापहरं परम्। आज्यमध्ये मुखं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ १॥ घृतं नाशयते व्याधिं घृतञ्च हरते रुजम्। घृत तेजोधिकरणं घृतमायुः प्रवर्द्धते ॥ २॥

छाया पात्र में अपने मुंह की छाया देखें, पात्र के गंधाक्षत करे पंचरत्न गेरे

तथा संकल्प सहित विप्र को दान करें। **पापघट का दान** कराना हो तो **स्वर्ण या शीशे की पाप पुरुष की मूर्ति बनाये**। पूजन करके घट में रखकर दान करें।

पाप पुरुष ध्यानं :-

वामकुक्षि स्थितं कृष्णमंगुष्ठ परिमाणकं ।
विप्र हत्या शिरोयुक्तं कनकस्तेय बाहुकम् ॥१॥
मदिरापान हृदयं गुरु तल्प कटीयुतम् ।
तत्संयोगिपद द्वन्दमुपपातक रोमकम् ।
खड्ग चर्म धरं दुष्टमधोवक्त्रम् च दुःसहम् ॥२॥

पाप पुरुष का ध्यान कर पूजनकर, उसे **अधोमुख रखें।**

छायापात्राय नमः, एवं गन्धादिभिः पूजयेत्। ॐ अद्य० अमुकदेव प्रीतिपूर्वक सर्व ग्रह पीड़ा निवारणार्थे सोपकरणत्रछायापात्रदानं ददामि। इति विप्रकरे जलं दद्यात्।

संकल्प - **ॐ अद्येत्यादिदेशकालसङ्कीर्तनान्ते-अमुकगोत्रोत्पन्नोहं जन्मनामतः प्रसिद्धनामतश्चामुकशर्मा सपत्नीकोऽहं मम कलत्रादिभिस्सह दीर्घायुरारोग्यसुतेजस्वित्व सुभगत्व सर्वपापप्रशमनोत्तरजन्मराशेस्सका-शान्नामराशेस्सकाशाद्वा जन्मलग्नाद्वर्षलग्नाद्वोचराद्वा ये केचिञ्चतुर्थाष्टमद्वा-दशाद्यनिष्टस्थानस्थिताः क्रूरग्रहास्तैः सूचितं सूचयिप्यमाणञ्च यत्सर्वारिष्टं तद्विनाशार्थ ग्रहासु सर्वदा तृतीयैकादशशुभस्थान स्थिवदुत्तमफलप्राप्त्यर्थ कांस्यपात्रोपन्यस्तं घृतबिन्दुकणिकासम संख्यावच्छिन्नैरुज्य चिरञ्जी-वित्वकामैतत्स्वशरीछायावलोकितघृतपूरितं कांस्यपात्रं पञ्चरत्नादिसहितं सुपूजितं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थ रजत चन्द्रमाप्रजापति स्वर्ण बृहस्पतिदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे।**

ॐ अद्य कृतैतच्छाया पात्रदान प्रतिष्ठार्थमेतद्द्रव्यममुकदैवतं यथानाम-गोत्राय ब्राह्मणाय तुभ्य महं संप्रददे। *ततः प्रार्थयेत्*-**ॐ यानि कानि च पापानि मया कामं कृतानि च। छायापात्रप्रदानेन तानि नश्यन्तु मे सदा ॥१॥ यत्कृतं मे स्वकायेन मनसा वचसा त्वघम्। तत्सर्वनाशमायातु छायापात्र प्रदानतः ॥२॥** *इति पठित्वा हस्तद्वयेन तत्पात्रं गृहीत्वा ब्राह्मणाय समर्पयेत्*-**ॐ सदक्षिणं मया तुभ्यं स्वात्मदेहमिदं परम्। छायापात्रपरं प्रीत्या गृहाण द्विजसत्तम। दानेनानेन मा सन्तु सर्वे रोगादयो मम। आयुरारोग्यमैश्वर्य प्रददातु**

दिवाकरः ॥ *इत्युच्चार्य छायापात्रं ब्रह्मणहस्ते दद्यात् ॥* ऐसा बोलकर छायापात्र ब्राह्मण को देवे

अथवा-आज्यपात्रे छायामवलोक्य देशकालौ स्मृत्वा ममायुरारोग्यप्राप्तये ससुवर्णमिदमाज्य सहितं छाया पात्रममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति कस्मैचित् ब्रह्मणाय दद्यात्।

अथ हेमाद्रि कृतः स्नान संकल्प

आचम्य प्राणानायम्य। प्रार्थना करे

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
वागीशाद्याः सुमनसः सर्वार्थनामुपक्रमे ।
यं नत्वा कृतकृत्यास्यु स्तं नमामि गजाननम् ॥
स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् ।
धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पति ॥
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरम् ।
राहुंकेतुं नमस्कृस्त्य यज्ञारम्भे विशेषतः ॥
शक्रादि-देवताः सर्वानृषींश्चैव तपोधनान् ।
गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा ॥
वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलं ।
अगस्त्यं च पुलस्त्यं च दक्षमित्रं पराशरम् ॥
भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम् ।
अन्ये विप्रास्तपोयुक्ता वेद-शास्त्र विचक्षणाः ।
तान् सर्वान् प्रणिपत्याहं शुभकर्म समारंभे ।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥
अग्रतः श्री-नृसिंहश्च पृष्ठतो देवकीसुतः ।
रक्षतां पार्श्वयोर्देवौ भ्रातरौ राम-लक्ष्मणौ ।

संकल्प :- ॥ ॐ॥ स्वस्ति श्री मुकुन्द-सच्चिदानन्दस्य ब्रह्मणोऽ-

निर्वाच्य-मायाशक्ति-विजृम्भिता विद्यायोगात् कालकर्म स्वभावाविर्भूतमह-त्तत्वोदिताहंकारोद्भूत-वियदादिपञ्च महाभूतेन्द्रिय-देवतानिर्मिते ऽण्डकटाहे चतुर्दश लोकात्मके लीलयातन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभि-कमलोद्भूत सकललोक पितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्ति स्थितिलय- कारणस्य जगद्रक्षाशिक्षा-विचक्षणस्य प्रणतपारिजातस्य श्रीअच्युतानन्त वीर्यस्य श्रीमद्भगवतो महापुरुषस्य अचिन्त्यया परिमितशकृत्या ध्रियमाणस्य महाजलौघमध्ये परिभ्रममाणा नामनेक कोटिब्रह्मण्डा नामेकतमेऽव्यक्त महदहङ्कार पृथिव्यतेजो वाय्वाकाशाद्या वरणैरावृतै अस्मिन्महतिब्र ह्माण्डखण्डे आधारशक्ति श्रीमदादिवाराह दंष्ट्राग्र-विराजिते कूर्मानन्त -वासुकि तक्षक कुलिक कर्कोटक पद्म महापद्म शंखाद्यष्ट-महानागै-र्ध्रियमाणे ऐरावत पुण्डरीक वामन कुमुदाञ्जन पुष्पदन्त-सार्वभौम सुप्रतिकाष्ट-दिग्गज-प्रतिष्ठितानाम् तलवितल सुतल तलातल रसातल महातल पाताल लोकानामुपरिभागे भूलोक भुवर्लोक स्वर्लोक महलोक जनलोक तपोलोक सत्यलो-काख्य सप्तलोकानामधोभाग चक्रवाल शैलमहावलय नागमध्य वर्तिनो महाकाल महाफणिराज शेषस्य सहस्त्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते।

अमरावत्य शोकवती भोगवती सिद्धवती गान्धर्वती काञ्च्यवन-त्यलकावती यशोवतीति पुण्यपुरी प्रतिष्ठिते तथैव इन्द्राग्नियमनिर्ऋति वरुण वायु कुबेरेशानाष्ट दिकपाल प्रतिष्टिते वसुध्रुवाधर सोमपा प्रभञ्जनान-लप्रभासाख्याष्ट वसुभिर्विराजितेहर त्र्यम्बक रुद्रमृगव्यधा-पराजित कपाली भैरव शम्भुकपर्दि वृषाकपि बटुरूपाख्यै-कादशरुद्रैः संशोभिते रुद्रोपेन्द्र सवितृ (सविता) धातृ - त्वष्ट्रर्यमेन्द्रेशानभगमित्र-पूषाख्य द्वादशादित्य-प्रकाशिते यमनियमासन प्राणायाम प्रत्याहार धारणा-ध्यानसमाध्यष्टागर्ग नरतवसिष्ठ वालखिल्य विश्वामित्र दक्ष कात्यायन कोण्डिन्य गौतमांगिरस पाराशर्य व्यासवाल्मीकि शुकशौनक भारतद्वाज सनक सनन्दन सनातन सनत्कुमार नारदादि मुख्यमुनिभिः।

पवित्रिते लोकालोकाचल वलयिते लवणेक्षु सुरा सर्पिर्दधि क्षीरोदक-युक्तसप्तार्णव परिधृते जम्बूप्लक्षशाल्मलि कुशक्रौंच शाक पुष्कराख्य सप्तद्वीपयुते इन्द्रकांस्य ताम्रगभस्ति नागसौम्य गन्धर्व चारण भरतेति

नवखण्ड मण्डिते सुवर्णगिरी कर्णिकोपेत महासरोरुहाकार पञ्चाशतकोटि योजन विस्तीर्ण-भूमण्डले अयोध्या मथुरा माया काशी काञ्च्यवन्तिका द्वारावतीति सप्तमुक्तिदापुरी-प्रतिष्ठिते महामुक्ति-प्रदस्थले शालग्राम शम्भल नन्दिग्रामेति त्रयविराजिते चम्पकारण्य बदरिकारण्य दण्डकारण्यार्बुदारण्य धर्मारण्य पद्मारण्य गुह्यारण्य जम्बुकारण्य विन्ध्यारण्य द्राक्षरण्य नहुषरण्य काम्य कारण्य द्वैतारण्य नैमिषारण्यादीनां मध्ये नैमिषारण्ये सुमेरु निषध कूट शुभ्रकूट श्रीकूट हेमकूट रजतकूट चित्रकूट त्रिकूट किष्किन्धा श्वेताद्रिकूट-हिमविन्ध्याऽचलानां हरिवर्ष किम्पुषवर्षयोश्च दक्षिणे।

नवसहस्त्र-योजन- विस्तीर्णे भरतखण्डे मलयाचल सह्याचल विन्ध्याचलानां उत्तरेण स्वर्णप्रस्थ चण्डप्रस्थ सूक्तिक आवन्तक रमणक महारमणक पांचजन्य सिंहल लंकेति नवखंण्ड मंडिते सिंहललंकाऽ शोक-वत्यल कावती सिद्धवती गान्धर्ववत्यादि पुण्यपुरीणामधरोभागे नवखण्डो-पद्वीपमंडिते दक्षिणावस्थित रेणुकाद्वय सूकर काशी काञ्ची कालिर्वकाल-वटेश्वर कालञ्जर महाकालेति नवोखर युते द्वादश ज्योतिर्लिङ्ग-गंगा (भागीरथी) गोदा (गौतमी) क्षिप्रा यमुना सरस्वती नर्मदा तापी पयोष्णी चन्द्रभागा कावेरी मन्दाकिनी प्रवरा कृष्णा वेण्या भीमरथी तुङ्गभद्रा मलापहा कृतमाला ताम्रपर्णी विशालाक्षी वञ्जुला चर्मण्वती वेत्रवती भोगवती विशोका कौशिकी गण्डकी वासिष्ठी प्रमदा विश्वामित्री फल्गुनी चित्रकाश्यपी सुवर्णरेखा शोणा भवना शिनी शीघ्रगा कुशवर्तिनी ब्रह्मानन्दा महितनयेत्यनेक पुण्यनदीभिर्विलसिते ब्रह्मपुत्र-सिन्धुनदयादि-परम पवित्र जलविराजिते।

हिमवन्मेरु गोवर्धन क्रौंच चित्रकूट हेमकूट महेन्द्र मलय सह्येन्द्र-कील-पारियात्राद्यनेक-पर्वत-समन्विते मतङ्ग माल्य किष्किन्ध-ऋष्यशृङ्गेति महानगसमन्विते अंग बंग कलिंग काश्मीर काम्बोज सौवीर सौराष्ट्र महाराष्ट्र मगध नेपाल केरल चोल पाञ्चाल गौड मालव मलय सिंहल द्रविड कर्नाटक ललाट करहाट पानाट पाण्ड्य निषध मागध आन्ध्र दशार्णव भोज कुरुक्षेत्र गान्धार विदर्भ विदेह वाल्हीक बर्बर कैकेय कोसल विराट शूसेन कोंकण कैकट मत्स्य भद्र पारसिक खर्जुर यावन म्लेच्छ जालन्धरेति सिद्धवत्यन्यदेश बिशेष भूमिपाल-विचित्रिते मालवादि देशे इलावृत कुरुभद्राश्व केतुमाल किम्पुरुष रमणक हिरणमयादि

नव वर्षाणां मध्ये भरतखंडे।

वकुल चंपक पाटलाब्ज पुन्नाग जाति करवीर रसाल कह्लार केतक्यादि नानाविध कुसुम स्तबक विराजिते कोकनत हिरण्य शृंग कुब्जार्बुद मणिकर्णोवटशालग्राम सूकर मथुरा गया निष्क्रमण लोहार्गल पोतस्वामी प्रभास बदरीतिचतुर्दश गुह्यविलसिते जम्बूद्वीपे कुरुक्षेत्रादि समभूमध्यरेखायाः पश्चिमदिग्भागे कुलमेरोर्दक्षिणदिग्भागे बिन्ध्यस्य दक्षिणे देशे श्रीशैलस्य वायव्यदेशे कृष्णावेण्योर्मध्यदेशे दशावताराणां मध्ये बोद्धावतारे गंगादि सरिद्भिः पवित्रिते नवसहस्र योजनविस्तीर्ण भारतवर्षे निखिलजन-पावन परमभागवतोत्तम शौनकादिनिवाससिते नैमिषारण्ये आर्यावर्तान्तर्गत ब्रह्मा वर्तैकदेशे सूर्यान्वयभूभत्प्रतिष्ठिते।

श्रीमन्नारायण नाभिकमलोद्भूत सकल जगत्स्त्रष्टुः परार्द्धद्वय जीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथम दिवसे अह्नोद्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायंभुवादिमन्वतराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृत त्रेता द्वापर कलि संज्ञकानांचतुर्णां युगानां अष्टाविंशतितमे कलियुगे तत्प्रथमे विभागे (पादे)।

श्रीमन्नृपविक्रमार्कात् श्रीमन्नृप शालिवाहनाद्वा यथासंख्यागमेन चन्द्र सावन सौर नाक्षत्रादिप्रकारेणागतानां प्रभवादि षष्टि संवत्सराणां मध्ये अमुक नाम्ने संवत्सरे उत्तरगोलावलम्बिनि श्रीमार्तण्डमण्डले अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभ-पुण्यतिथौ अमुक शर्मणः (भार्ययासहऽधिकृतस्य) मम इह जन्मनि जन्मान्तरे वा बाल्ययौवन वार्धक्यावस्थासु वाक्पाणिपायूपस्था घ्राणरसना-चक्षुः स्पर्शनश्रोत्रमनोभिश्चरित-ज्ञाताऽज्ञात कामाऽकाम महापातकोपपातका-दिसञ्चितानां पापानांब्रह्महनन सुरापान सुवर्णस्तेय गुरुतल्पगमनतत्संसर्गरूप महापातकानां बुद्धिपूर्वकाणां मनो वाक्कायकृतानां बहुकालाभ्यस्तानां उप-पातकानां च स्पृष्टाऽस्पृष्ट-संकरीकरण-मलिनी करणाऽपात्रिकरणा जातिभ्रंश-करण विहिताकरण कर्मलोपजनितानां रसविक्रय-कन्या-विक्रय हयविक्रय गोविक्रय खरोष्ट्र विक्रय दासीविक्रया ऽजादिपशुविक्रय स्वगृह विक्रय नीलीविक्रयाक्के-यविक्रय पण्यविक्रय

जलचरादिजन्तुविक्रय स्थलचरा-दिविक्रय खेचरादिविक्रय सम्भूतानां निरर्थकवृक्षच्छेदन ऋणानपाकरणब्रह्मस्व अपहरण देवस्वापहरण राजस्वापहरण परद्रव्यापहरण-रूपाणां। ब्राह्मणनिन्दा गुरुनिन्दा वेदनिन्दा शास्त्रनिन्दा परनिन्दाऽभक्ष्य भक्षणा-भोज्यभोजनाचोष्य-चोषणाऽहिंस्य-हिंसनाऽवन्द्य-वन्दना ऽपेयपाना -ऽस्पृश्य-स्पर्शना ऽश्राव्य श्रवणाऽहिंस्य-हिंसनाऽवन्दना ऽ चिन्त्यचिन्त-नाऽयाजय याजनाऽपूज्यपूजन-रूपाणां मातृपितृतिरस्कार स्त्रीपुरुषप्रीति भेदन परस्त्रीगमन विधवागमन वेश्यागमन दासीगमन चाण्डालादिहीन -जातिगमन गुदागमन वेश्यागमन दासीगमन चाण्डालादिहीनजातिगमन गुदगमन रजस्वलागमन पश्वादि गमन-रूपाणां कूटसाक्षित्वपैशुन्य-वाद मिथ्यापवाद म्लेच्छसम्भाषण ब्रह्मद्वेषकरण ब्रह्मवृत्तिहरण वृत्तिच्छेदन परवृत्तिहरणारूपाणां।

वित्रवञ्चन स्वामिवंचनाऽसत्यभाषण गर्भपातन पथि ताम्बूलचर्वण हीनजातिसेवन परान्भोजन गणान्नभोजन लशुन पलाण्डु गृञ्जन-भक्षण ताल वृक्षफल-भक्षणोच्छिष्ट भक्षण मार्जारोच्छिष्टभक्षण पर्युषितान्न-भक्षण-रूपाणां पंक्तिभेदकरण भ्रूणहिंसा पशुहिंसा बालहिंसाद्यनेकहिंसो द्भूतानां शौचत्यागस्नानत्याग सन्ध्यात्यागोपासनाग्नित्याग वैश्वदेवत्याग-रूपाणां निषिद्धा-वरण कुग्रामवास ब्रह्मद्रोह पितृमातृद्रोह परद्रोह परनिन्दात्म-स्तुति दुष्टप्रतिग्रह दुर्जनसंसर्गरूपाणां गोयान वृषभयान-महिषीयान गर्दभया-नोष्ट्रयानाजयान भृत्याभरण स्वग्रामत्याग गोत्रत्याग कुलत्याग दूरस्थमन्त्रण विप्राशाभेदनावन्दिताशीर्वाद-ग्रहण पतित-सम्भाषण-रूपाणां पतितजन-पंक्तिभोजनाहः सङ्गम वृथामनोरथादि पापानां तथा-महापापोपपापानां नाना-योनिषु यत्कृतम्।

बालभावेन यत्पापं क्षुत्तडर्थे च यत्कृतम्। आत्मार्थे चैवयत्पापं परार्थे चैव यत्कृतम्। रागद्वेषादिजनितं काम क्रोधेन यत्कृतम्॥ महल्लघु च यत्पापं तन्मे नाशय जाह्नवि॥ ब्रह्महा मद्यपः स्तेयी तथैव गुरुतल्पगः। महापापानि चत्वारि तत्संसर्गी तु पंचमः॥ अतिपातकमन्यञ्च यन्न्यूनमुपपातकम्॥ गोवधो व्रात्यतास्तेय ऋणानां चानपक्रियाः॥ अनाहिताग्नितापण्य-विक्रयः परिवेदनम्। इन्धनार्थे द्रुमच्छेदः स्त्री- हिंसौषधि -जीवनम्॥ हिंसायात्रा विधानंच भृतकाध्यापनं तथा। कृमिकीटादिहननं यत्किञ्चित्प्राणि हिंसनम्। मातापित्रोरुशुश्रूषा तद्वाक्याकरणं तथा। अपूज्

पूजनं चैव पूज्यानां च व्यतिक्रमः। अनाश्रमस्थताग्न्यादि देवाशुश्रूषणं तथा॥ परकार्यापहरणं परद्रव्योप जीवनम्। ततो ज्ञानकृतं वापि कायिकं वाचिकं तथा॥ मानसं त्रिविधं पांप्रायश्चित्तैरनाशितम्। तस्मादशेषपापेभ्यस्त्राहि त्रैलोक्यपावनि॥ निष्पापोऽस्म्युधुना देवि प्रसादात्तव नान्यथा।

[*स्त्रीणांविशेषः*-पाणिग्रहणमारभ्य स्वकर्मापरिपालनम्। इन्द्रिया-भिरतिः पुंसु नानायोनिषुया भवेत्॥ कृमिकीटादिहननं पंक्तिभेदादिकं तथा। स्पृष्टास्पृष्टमनाचारं मनसादोषकल्पनम्॥ तत्सर्वं नाशयेः क्षिप्रं गंगे त्वं यात्र-यानया॥]

इत्यादि प्रकीर्ण-पातकानां एतत्काल--पर्यन्तं सञ्चितानां लघु स्थूल सूक्ष्माणां च निःशेष परिहारार्थं दशावरानृ दशापरान् आत्म-सहितान् एकविंश पुरुषानुद्धर्तुं ब्रह्मलोकावधि पञ्चाशत्कोटियोजन विस्तीर्णेऽस्मिन् भूमण्डले सप्तर्षिमंडलपर्यंत वालुकाभिः कृतराशेः वर्षसहस्त्रावसाने एकैकवालुका पकर्षक्रमेण सर्वराश्यपकर्ष संमित कालपर्यंतं ब्रह्मलोके ब्रह्मसायुज्यता प्राप्त्यर्थं कुरुक्षेत्रादि सर्वतीर्थेषु स्नान पूर्वकं सहस्त्र गोदान जन्यफल प्राप्त्यर्थं तथा-

मम समस्तपितृणां आत्मनश्च विष्णवादि लोक प्राप्तये अधीतनाना मध्येष्यमाणानां चाध्यायानां स्थापनविच्छेद क्रोशघोषण हन्तविवृत्ति दुर्वृत्त द्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविवत्तोच्चारित वर्णानां श्लिष्टास्पष्ट वर्णविघटूनादिभिः पठितानां श्रुतीनां यद्यातयामत्वे तत्परिहारार्थं अष्टत्रिंशदनध्यायाध्ययने रथ्या सञ्चरतः शूद्रस्य शृण्वतोऽध्ययने म्लेच्छान्त्यजादेः शृण्वतोध्ययने अशुचिदेशेऽ ध्ययनेआत्मनोऽशुत्वेध्ययने अक्षर स्वरानुस्वार पदच्छेद कण्डिका व्यञ्जन ह्रस्व दीर्घ प्लुत कण्ठ तालु मूर्धन्यौष्ठ्य दन्त्य नासिकानुनासिक रेफ जिह्वा मूलीयो पध्मानीयोदात्तानुदात्त स्वरिता दीनां व्यत्ययेनोच्चरे माधुर्याक्षरव्यक्तिहीन त्वाद्यनेकप्रत्यवाय परिहारपूर्वकं सर्वस्य वेदस्य सवीर्यत्व सम्पदनद्वारा यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं देवब्राह्मण सवितृ सूर्यनारायण-सन्निधौ गङ्गा भागीरथ्यां वा अमुकतीर्थे वा प्रवाहाभिमुखं स्नानमहं करिष्ये इति संकल्प्य स्नायात्॥

(इति हेमाद्रिकृतः संकल्पप्रयोगः॥)

स्नानांग तर्पणम्

ॐ ब्रह्मादयोदेवास्तृप्यन्ताम्। ॐ भूर्देवास्तृप्यन्ताम् ॐ भुवर्देवास्तृ प्यन्ताम्। ॐ स्वर्देवा स्तृप्यन्ताम्। ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम्। ॐ सनकादि द्वैपायनादय ऋषयस्तृप्यन्ताम्। ॐ भूर्ऋषयस्तृप्यन्ताम् २। ॐ भुवर्ऋषयस्तृप्यन्ताम् २। ॐ स्वर्ऋषयस्तृप्यन्ताम् २। ॐ भूर्भुवः-स्वर्ऋषयस्तृप्यन्ताम् २। ॐ कव्यवाडवानलादयः पितरस्तृप्यन्ताम् ३। भूः पितरस्तृप्यन्ताम् ३। ॐ भुवः पितरस्तृप्यन्ताम् ३। ॐ स्वः पितर-स्तृप्यन्ताम् ३। ॐ भूर्भुवः स्वः पितरस्तृप्यन्ताम् ३।

(ततः आचम्य.सव्येन. यक्ष्मतर्पणं कुर्यात्) यक्ष्मतर्पणम्-यन्मया दूषितं तोयं शरीरमलसम्भवात्। तस्य पापस्य शुद्ध्यर्थं यक्ष्मैयत्तै तिलोदकम्॥ (इतिमन्त्रेण तीर्थतटे तिलमिश्रं जलाञ्जलिं निक्षिपेत्)

पश्चात् लतादिकेषु शिखोदकत्यागः-लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः। ते सर्वे तृप्तिमायान्तु मयोत्सष्टैः शिखोदकैः॥ (इतिमन्त्रेण) स्वदक्षिणभागे स्वशिखाग्रं निष्पीडयेत्। ततौ धौते वाससी परिधाय भस्मादि धृत्वा अथवा गृहे यथेच्छं सन्ध्यादि नित्यकर्माणि कुर्यात्)

इति स्नानाङ्गतर्पणम्॥

भगवत्पूजनं प्रायश्चित्त हवनम्

यज्ञोपवीत बदल कर शुद्ध वस्त्र पहन कर तीर्थ स्थान हो तो वहीं एक वस्त्र पर अक्षतों से अष्टदल बनाकर एक ताम्रकलश पर कटोरी में अक्षतों पर शालिग्रामजी की मूर्ति की पुरुषसूक्त से पूजा करके वेदी पर पंचभू संस्कार करके व्याहृति हवनपूर्वक अग्निपूजन करके बाद में प्रायश्चित मंत्रों से हवन कराके आरती कर पंचगव्य का तथा संस्त्रवप्राशन पूर्णपात्र दानादि करके यज्ञ करने योग्य स्थान पर आ जावे।

तत्रादौ षोडशाङ्ग न्यास पूर्वकं षोडशोपचार पूजनक्रमः।

स्वशरीर न्यास एवं पूजा मंत्र विभाग दानों साथ दिये गये है, अतः पहले न्यास करे फिर पूजा वाले मंत्र पढ़ें पुरुष सूक्त पृष्ठ संख्या ५१७ पर है।

संकल्प :-

अथास्मिन् शुभसंवत्सरे अमुक मासे अमुक पक्षे अमुक तिथौवासरे च अमुकगोत्रोत्पन्नेऽमुकनामाहं अमुकदेवताप्रतिष्ठायामधिकार सिद्ध्यर्थं कृत

हेमाद्रिप्रभृति दशविधस्नानोऽहं विष्णुश्राद्धमहं करिष्ये तत्रादौ देहशुद्ध्यर्थं पुरुषसूक्तेन अंगादिन्यासं कृत्वा षोडशोपचारैः शालिग्राम पूजनमहं करिष्ये एं प्रायश्चित्तांगभूतं हवनं च करिष्ये।

१ सहस्त्रशीर्षा०-आवाहनम्॥ इतिवामकरे **(२) पुरुषऽएवे०- आसनम्॥** इति दक्षिणकरे **(३) एतावानस्य०- पाद्यम्॥** इति वाम पादे **(४) त्रिपादूर्ध्व०- अर्घम्॥** इति दक्षिण पादे **(५) ततो व्विराडजायत०-आचमनीयम्॥** वाम जानौ **(६) तस्माद्यज्ञात्०-स्नानं॥** इति दक्षिण जानौ **(७) तस्माद्य० ऋचः। वस्त्रम्॥** वामकट्याम् **(८) तस्मादश्वा०-यज्ञोपवीतं॥** दक्षिण कट्याम् **(९) तं यज्ञम्०- गन्धाः॥** इति नाभौ **(१०) यत्पुरुषम्०-पुष्पाणि॥** इति हृदये **(११) ब्राह्मणोऽस्य० धूपः॥** इति वामकुक्षौ **(१२) चन्द्रमामनसः०- दीपः॥** दक्षिणकुक्षौ **(१३) नाभ्या आसीद०-नैवेद्यम्** इति कण्ठे। **यत्पुरुषेण०- दक्षिणायुतताम्बूलम्॥ नमस्कारः॥** वक्त्रे-**(१५) सप्तास्यासन्० आरार्तिक्यं प्रदक्षिणाम्॥** अक्ष्णोः **(१६) यज्ञेनयज्ञ०- पुष्पाञ्जलिं नमस्कारं॥** मूर्ध्नि **इति॥**

भगवान की षोडशोपचार से पूजा करलें अब **प्रायश्चित्त हवन** की विशेष विशेष बातें यहां लिखी जा रही है। **सरल ग्रहशांतिवत्** करे।*वि*

उपयमनकुशान् दक्षिणेन पाणिनाऽऽदाय वामहस्ते कृत्वा पवित्रे प्रणीतासु निदध्यात्। *अग्न्याधानम्*

अग्नि स्थापन करे।

ॐ अग्नि दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवां२ आसादयादिह॥

अग्नेरुत्तरत आचार्यब्रह्मणोर्वरणं कुर्यात्। तत्र ग्रहशान्ति वत् संकल्पः ब्रह्मस्थानं दक्षिणे।

अग्नि के उत्तर में आचार्य और ब्रह्मा का वरण कर लेवें। तब संकल्प बोल लेवें॥ ब्रह्मा को दक्षिण में स्थान देवे॥

रेखात्रय की पूजा करे-

ॐ ब्रह्मणे नमः (पूर्वरेखायां) ॐ विष्णवे नमः (मध्यरेखायाम्) ॐ रुद्राय नमः (उत्तर रेखायाम्)

ततो विधिनाग्ने अग्नये नमः।

इससे अग्नि की पूजा करके फिर **सप्त जिह्वाओं** की पूजा करे--

ॐ करालयै नमः ॥ १ ॥ ॐ धूमिन्यै नमः ॥ २ ॥ ॐ श्वेतायै नमः ॥ ३ ॥ ॐ लोहितायै नमः ॥ ४ ॥ ॐ महालोहितायै नमः ॥ ५ ॥ ॐ सुवर्णायै नमः ॥ ६ ॥ ॐ पद्मरागायै नमः ॥ ७ ॥

फिर दक्षिण जानु को ढालकर **ब्रह्मणाऽन्वारब्ध** होकर प्रज्वलित अग्नि में चुपचाप स्रुवे से होमे-

ॐ प्रजापतये स्वाहा (इति मनसा) मन से बोलकर अग्नि में आहुति दें **इदं प्रजापतये न मम** मन से ही त्याग कर हुतशेष को प्रोक्षणी में डाल देवे। इसी प्रकार सर्वत्र जानें।

ॐ इन्द्राय स्वाहा॥ इदमिन्द्राय न मम॥ (इत्याधारौ) **ॐ अग्नये स्वाहा। इदमग्नये न मम॥ ॐ सोमाय स्वाहा। इदं सोमाय न मम॥**

(ये दोनों आज्यभाग की आहुति दे) फिर १०८ वां २८ आहुतियां देवे-

ॐ भूः स्वाहा, इदं अग्नये न मम॥

ॐ भुवः स्वाहा, इदं वायवे न मम॥

ॐ स्वः स्वाहा, इदं सूर्याय न मम॥

ॐ भूर्भुवः स्वः स्वाहा, इदं प्रजापतये न मम॥

इस प्रकार सात बार करने पर २८ आहुतियां हो जाती हैं।

फिर **ब्रह्मकूच** से होम करे। यथा--**सुवर्णपात्र में गायत्री मंत्र से गोमूत्र। गन्धद्वारा इत्यादि से गोमय।**

ॐ आप्यायस्व समेतु ते विष्वतः सोमवृष्ण्यम् (गोदुग्ध)

ॐ दधिक्राब्णो० से दधि। **ॐ तेजोसि शुक्रम्०** से घृत। **ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥** इससे कुशोदक लेवें।

इनका प्रणव से मंथन करके यज्ञियकाष्ठ से फिर मथ कर '**ॐ कार**' से उसे मंत्र कर सात से अधिक हरे दर्भपत्रों **से पंचगव्य का होम करे**। मंत्र ये हैं-

ॐ इरावती धेनुमती हि भूत ॐ सूयवसिनी मनवे दशस्या॥ व्यस्कंम्ना रोदसी विष्णवेते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा॥ इदं पृथिव्वै इदं न

मम॥

ॐ इदं विष्णुर्विचक्रमे०। इदं विष्णवे न मम॥

ॐ मानस्तोके०। इदं रुद्राय इदं न मम॥

ॐ शन्नोदेवी रभिष्टय०। इदमद्भ्यो न मम॥

ॐ अग्नये स्वाहा। इदमग्नये इदन्न मम॥ ॐ सोमाय स्वाहा॥ इदं सोमाय इदन्न मम॥ ॐ तत्सवितुर्वरेण्यम्०। इदं सवित्रे इदन्न मम॥ ॐ "स्वाहा"। ॐ इदं परमेष्ठिने न मम। ॐ भूर्भुवः स्वः स्वाहा॥ इदं प्रजापतये न मम॥

इस प्रकार होमकर पंचगव्य और घी दोनों मिलाकर--

ॐ अग्नये स्विष्टकृते स्वाहा॥ इदमग्नये स्विष्टकृते न मम॥ इति स्विष्टकृत् होमः॥

फिर ब्राह्मणों से प्रार्थना करे--हे ब्राह्मणों मैं **व्रत ग्रहण करुंगा**। तब वे कहें के "**कुरुष्व**" कीजिये।

उनकी आज्ञा से प्रणव (ॐ) बोलकर हुत से शेष **पंचगव्य को पान करे**।

पश्चात् दूसरे दिन या उसी दिन संकल्प करके गौदान अथवा तन्निष्क्रय दक्षिणा देवे। फिर-

ॐ भूः स्वाहा। इदमग्नये इदं न मम॥

ॐ भुवः स्वाहा। इदं वायवे, न मम॥

ॐ स्वः स्वाहा। इदं सूर्याय, न मम॥

ॐ भूर्भुवः स्वः स्वाहा। इदं प्रजापतये न मम॥

इस प्रकार सात बार होम करके-

फिर ब्रह्मणान्वान्ब्ध होकर-

ॐ भूः स्वाहा। इदमग्नये न मम॥

ॐ भुवः स्वाहा। इदंवायवे न मम॥

ॐ स्वः स्वाहा। इदं सूर्यायः। इदं न मम॥

इसके बाद अग्नि में प्रायश्चित हवन की आहुतियां देवे।

गोदानादि — कई आचार्य प्रायश्चित्त हवन के बाद गौ, भू, तिल, हिरण,

आज्य, वस्त्र, धान्य, गुड, रजत एवं लवणादि का दान करवाकर मंगल स्नान कराकर वेदी समीप पूजा आचार्यादि वरण जलयात्रा से पहिले कराते है।

गोदानविधि – देशकालौ संकीर्त्य प्रारिप्सित प्रायश्चित्तस्य पूर्वांग तया विहितं गोदान करिष्ये।

धेनुपूजनं कुर्यात। गोपुच्छे देवर्षिपितृतर्पणं कृत्वा, कांस्यपात्रो गोपुच्छं निधाय दग्धतिलकुश सुवर्ण युतं कृत्वा। (खड़े होकर दान करें।)

यथा – देशकालौ स्मृत्वा मम समस्त पापक्षयार्थं अमुक देव प्रतिष्ठा यज्ञार्हता सिद्धये श्री परमेश्वर प्रीत्यर्थं इमां गां सवत्सा यथाशक्ति विभूषिताय रुद्रदेवतां तुभ्यमहं संप्रददे। संकल्प जल युतं गोपुच्छ विप्रहस्ते दद्यात्।।

ॐ यज्ञ साधन भूता या विश्वस्याघौघनाशिनी ।
विश्वरूपधरो देव: प्रीयतामनया गवा ।।

।इति प्राथयेत्।।

अथ प्रायश्चित्त होम:

ॐ त्वन्नेअग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठा:। यजिष्ठो वह्नितम: शोशुचानो विश्वा द्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा। इदमग्निवरुणाभ्याम् ॥ १॥ ॐ स त्वन्नो अग्ने वमो भवोती नेदिष्ठो अस्या उपसोव्युष्टौ। अवयक्ष्व नो वरुण ᳬ रराणो वीहि मृडीक ᳬ सुहवो न एधि स्वाहा। इदमग्निवरुणाभ्याम्॥२॥ ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्वमित्वमया असि। अया नो यज्ञं वहास्ययानो धेहि भेषज ᳬस्वाहा। इदमग्नये ॥ ३॥ ॐ येते शतं वरुण ये सहस्त्रं यज्ञिया पाशा वितता महान्त:। तेभिर्नो अद्य सवितोत विष्णुविश्वे मुञ्चन्तु मरुत: स्वर्का: स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: ॥४॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधवं विमध्यमं ᳬश्रथाय। अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा। इदं प्रजापतये न मम॥५॥

ततः बर्हिर्होमं स्वाहा ॥ इससे बर्हिहोम करे।

''इदं प्रजापतये न मम'' यह भी बोल दे।

पश्चात् संस्रवप्राशन वा अवध्राण करके दो आचमन करके अग्नि में ''स्वाहा'' शब्द से पवित्री डालकर पूर्णपात्र दान देवे।

फिर अग्नि की प्रार्थना करे--

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रभ्य काम्यम्। सनिं मेधामयासिष ७ स्वाहा ॥ यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधया मेधाविनं कुरु स्वाहा। मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः। मेधामिन्द्रश्च वायुश्च मेधांधाता दधातु मे ॥

उत्तरांग अग्निपूजन तथा पुनः प्रार्थना करे--

ॐ अग्नेनय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यसमज्जुहुराणमेनो भूमिष्ठांते नम उक्तिं विधेम। श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं बलं श्रियम्। आयुष्यं द्रव्यमारोग्यं देहि मे हव्यवाहन ॥

बाद में संकल्प करें-

प्रायश्चित्तोत्तरांग विष्णुश्राद्ध संपत्तये ब्राह्मणचतुष्टयाय आमान्नं पक्कान्नं वा दास्ये ॥

ऐसा बोलकर ४ ब्राह्मणों को कच्चा या पका हुआ अन्न देवे।

पश्चात् त्र्यायुषीकरण (यज्ञभस्म लगावे) ॐ त्र्यायुषं जदमग्ने (ललाटे) कश्यपस्य त्र्यायुषम् (दक्षिणबाहुमूले) यद्देवेषु त्र्यायुषम् (दक्षिणबाहुमूले) तन्नो अस्तु त्र्यायुषम् (हृदि)

फिर आचार्यदक्षिणा ब्राह्मणभोजन संकल्प भगवान की आरती पुष्पांजलि प्रदक्षिणा करके देवता तथा अग्नि का विसर्जन करे पीछे यजमान के तिलक कर रक्षाबंधनादि करे।

(इति होमारंभे प्रायश्चित्त प्रयोगः ॥)

जल यात्रा पूर्व वेदी समीप कार्यम्

यजमान एवं आचार्य यज्ञारंभ या अधिवासन आरंभ से पहले जलयात्रा करके कलश लायें इसके पहिले गणपति पूजन आचार्य वरण पुण्याहवाचन वेदी समीप ही करा देते है। अधिकतर आचार्य ऋत्वक् व अन्य ब्राह्मणों का वरण जलयात्रा के बाद करवाते है।

कार्यारंभ से पूर्व यजमान आसन पर बैठकर आचम्य, प्राणायाम करके स्थिर चित्त होवे। यजमान पत्नी का ग्रंथी बंधन करें ब्राह्मण "भद्रसूक्त" का पाठ करें।

पवित्रीकरणं — ॐ अपवित्र: पवित्रोवेत्यस्य वामदेव ऋषि गायत्री छंद: विष्णुदेवता पवित्र करणे विनियोग —

ॐ अपवित्र: पवित्रो वा सर्वावस्थांगतोऽपिवा ।
य: स्मरेत्पुण्डरीकाक्षं स: बाह्याभ्यन्तर: शुचि: ।।

आचमन करें या बायें हाथ में जल लेकर दाहिने हाथ से दक्षिण कर्ण के जल लगावें —

ॐ केशवाय नम:, ॐ गोविन्दाय नम:, ॐ माधवाय नम:।

हस्तप्रक्षालनं — ॐ हृषीकेशाय नम: ।।

ग्रंथिबंधनं -

यजमान एवं यजमान पत्नी का ग्रंथि बंधन करें।

ॐ तम्पत्नी भिरनुगच्छेम देवा: पुत्रौर्भ्रातृभिरुत वाहिरण्यै: ।
नाकङ्गृब्ण्नाना: सकृतस्य लोके तृतीये पृष्ठेऽअधिरोचने दिव: ।।
गणाधिपं नमस्कृत्य उमालक्ष्मी सरस्वतीम् ।
दंपत्योर रक्षणार्थाय पटग्रंथि करोम्यहम् ।।
श्री देव देवकुरु मंगलानि, संतान वृद्धि कुरु संततञ्च ।
धनायु वृद्धि कुरु इष्टदेव, मद्ग्रंथि बंधे शुभदा भवन्तु ।।

यजमान भाले तिलकं कुर्यात् -

ॐ स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: ।

स्वति न स्ताक्ष्यों अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥
ॐ चंदनं वद्यते नित्यं पवित्रं पापनाशनम् ।
आपदा हरते नित्यं लक्ष्मीर्वसतु सर्वदा ॥

यजमान पत्नि के तिलक -

ॐ श्रीश्च ते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम्। इषणन्निषाणामुम्मइषाण सर्वलोकम्मऽइषाण॥

(आशीर्वाद के समय में)

सर्वलोक वशीकरं सर्वकार्य जयन्ततः ते ।
सर्वे तव वशं प्राघ दास्य भूता भवन्ति हि ॥

ॐ पृथिवीति मंत्रास्य मेरुपृष्ठ ऋषि सतुलं छंद कूर्मो देवता आसने विनियोगः ।

पृथिवी त्वयाधृतालोका देविस्त्वं विष्णुना धृता ।
त्वं च धारय मां देवि ! पवित्रं कुरु चासनम् ॥

बिन्दु-त्रिकोण वृत्त चतुरस्त्र कृत्वा पंचोपचारेन् पूजयेत -

ॐ कूर्मासनाय नमः, योगासनाय नमः, अनंतासनायय नमः, विमलासनाय नमः, आत्मासनाय नमः, ॐ परमासनाय नमः पद्मासनाय नमः ।

गुरु स्मरणम् -

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरुवे नमः ।।१॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्री गुरुवे नमः ॥२॥

भद्रसूक्तम्

ॐ आनोभद्द्राः क्रतवो यन्तु विश्वतोदब्धासोऽ अपरीतासऽउद्भिदः। देवानोयथासद्मिद्वृधे ऽअसन्नप्रायुवोरक्षितारो दिवेदिवे ।।१॥ देवानाम्भद्द्रासुमतिर्ऋजूयतान्देवाना ँ रातिरभिनोनिवर्त्तताम्। देवानाँ

सक्ख्यमुपसेदिमा व्वयन्देवान्ऽआयुः प्रतिरन्तुजीवसे ।।२।।
तान्नपूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्ष मस्त्रिधम् ।
अर्य्यमणंवरुण ठ सोममश्विना सरस्वतीनः सुभगामयस्करत् ।।३।।
तन्नोव्वातोमयोभुवातु भेषजन्तंमातापृथिवी तत्पिताद्द्यौः ।
तद्दग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ।।४।।
तमीशानञ्जगतस्तस्त्थुष स्प्पतिन्धिया–ञ्जिन्वमवसे हूमहेव्वयम् ।
पूषानो यथाव्वेदसा मसद्दव्वृधे रक्षिता पायुरदब्धयः स्वस्तये ।।५।।
स्वति न इन्द्रोव्वृद्धश्रवाः स्वति नः पूषाव्विश्ववेदाः ।
स्वतिनस्ताक्ष्र्योऽअरिष्टनेमिः स्वति नो बृहस्प्पतिर्द्दधातु ।।१।।
पृषदश्श्वामरुतः पृश्निमातरः शुभं यावानो व्विदथेषु जग्गमयः ।
अग्निर्जिह्वामनवः सूरचक्षसो व्विश्श्वेनोदेवाऽअवसागमन्निह ।।२।।
भद्द्रङ्कर्ण्णेभिः श्रृणुयाम देवा भद्द्रम्पश्ये–माक्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवा ठ सस्तनू–र्भिर्व्यशेमहि देवहितँ य्यदायुः ।।३।।
शतमिन्नु शरदोऽअन्तिदेवा यत्रा नश्च्चक्क्रा जरसन्तनूनाम् ।
पुत्त्रासो यत्रपितरो भवन्ति मानो मद्ध्यारीरिषतायुर्ग्गन्तोः ।।४।।
अदितिर्द्यौरदितिरंतरिक्ष मदितिर्म्माता सपिता सपुत्रः ।
विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जात मदितिर्ज्जनित्त्वम्।।५।।
द्यौ शान्तिरन्तरिक्ष ठ शान्तिः पृथिवी शान्तिरापः शान्तिरौषधयः शान्तिः। व्वनस्प्पतयः शान्तिर्व्विश्वेदेवाः शान्तिब्र्ब्रह्मशान्तिः सर्व्व ठ शान्तिः शान्तिरेवशान्तिः सा मा शान्तिरेधि ।।६।। यतोयतः समीहसे ततोनोऽअभयंकुरु। शन्नः कुरुप्रजाभ्यो ऽभयन्नः पशुभ्यः ।।७।। सुशान्तिर्भवतु ।।

अथ संकल्प – ॐ विष्णु र्विष्णुः श्रीमद्भगवतौ महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य श्रीब्रह्मणो द्वितीय परार्द्धे श्रीश्वेतवाराह कल्पे सप्तमे वैवस्वन्मन्वतरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखंडे तत्रापि परमपुनीते भारतवर्षे आर्यावर्तान्तर्गत

ब्रह्मावर्तेकदेशे कुमारिका नाम क्षेत्रे पुष्करारण्ये(अमुकारण्येके) गंगा यमुनयोः पश्चिम तटे नर्मदाया उत्तरे तटे, अमुक राज्ये, अमुक मंडलान्र्तगत अमुक नगरे, अमुक तीर्थसमीपे, अमुक क्षेत्रे, अमुक स्थाने, अमुक विक्रमसंवते अमुक शालिवाहन शताब्दे, अमुकायने अमुकर्तौ, अमुक अमुक राशि स्थाने स्थित ग्रहेषु, अमुक मासे, अमुक पक्षे, अमुक तिथौ अमुक वासरे अमुक नक्षत्रो अमुक योगे अमुक करणे अमुक गोत्रोत्पन्नः अमुक शर्माऽहं ममात्मनः सपरिवारस्य सभार्यास्य इह जन्मनि पूर्वजन्म कृत सकल दोष उत्पात निखिल दुरितोपशमन द्वारा क्षेमायुरारोग्यादि संवृद्धि हेतवे, धन धान्यादि सम्मृद्धि सिद्धर्थ्यं दशानां पूर्वेषां दशानां परेषामात्मनश्च इत्येक विंशति कुलानां निरतिशयानन्द प्राप्यर्थं भगवद्‌भक्ति वृद्धर्थ्यं अद्यप्रतिष्ठास्यमान देवता वर प्रसाद द्वारा श्रुति स्मृति पुराणोक्त तत् प्रतिष्ठा जन्य फल सिद्धर्थ्यं अमुकां देवतानां अचञ्चल भाव भक्ति प्राप्त्यर्थं श्रीविष्णु प्रभति देवेषु देवकलासान्नि॰ यार्थं श्रीपरमेश्वर प्रीतये स्वकारित देव प्रासाद प्रतिष्ठा मूर्तिप्रतिष्ठा सहितां सनवग्रहमखां एक (वाधिक) रात्राधिवासनै का॰ वरयुताम् श्रीलक्ष्मीनारायणयो (सीताराम लक्ष्मण भरत शत्रुघ्न हनुमत्समेतस्य श्रीरामचन्द्रस्य) (श्रीराधाकृष्णयोः) (पार्वतिपरमेश्वरयोः गणपति स्कन्द नन्दीश्वर सहितयोः) (श्रीमारुतेरः) अचलप्रतिष्ठाद्यारभ्य सप्ताहे पंचाहे, चतुरहे, तृतीयाहेश्वः सद्यो वां प्रतिष्ठां करिष्ये।

तदंगत्वेन गणपतिस्मरणं स्वस्ति – पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादि वरण कर्म करिष्ये। तत्रादौ वरुण गणेशाम्बिका पूजन पूर्वकं जलयात्रा कर्म चाहं करिष्ये।

आचार्य थाली में गणेश मातृका नवग्रह पूजन करावें। कलश पूजन करवा कर पुण्याहवाचन करें। यजमान का रक्षाबंधन करें।

दिग्रक्षणं – **"रक्षोहणं बलगहनं"** इत्यादि ऋचाओं या **अपसर्पन्तु ये भूता** इत्यादि मंत्र पढ़ते हुये दिग्ररक्षण करें।

कर्मांगकलशार्चनम् – भूमि का स्पर्श करे।

ॐ भूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीं दृ्ठह पृथिवीं मा हि ठ सी:।।

कलश के निचे धान्य के हाथ लगावें।

ॐ औषधय समवदन्त सोमेन सहराज्ञा ।
यस्मै कृणोति ब्राह्मणस्त ठ राजान पारयामसि ।।

कलश में वरुण का आवाहन करें —

ॐ तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भि:।
अहेडमानो वरुणे हबोध्युरुश ठ समान आयु: प्रमोषी: ।।

ॐ अस्मिन्कलशे वरुण इहागच्छेहतिष्ठ। ॐ अपांपतये वं वरुणाय नम:। गंधाक्षतपुष्पै: संपूज्य:।

कलशस्य मुखे विष्णु... एवं देवदानव संवादे... इत्यादि मंत्रो से प्रार्थना करें। इसके बाद दूर्वा से कलशोदक द्वारा आपोहिष्ठा मयोभुवास्तान... अथवा "पावमान सूक्त" से संप्रोक्षित करें।

ॐ पुनन्तु मा देवजना: पुनन्तु मनसाधिय: ।
पुनन्तु विश्वाभूतानि जातवेद: पुनीहिमा ।१।।
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्नेकृत्वा क्रतूंरनु।।२।।

दीप पूजनं -

ॐ चन्द्रमा मनसो जातश्चक्षो: सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणाश्च मुखादग्निरजायत ।।

दीप पूजनं कुर्यात् एवं प्रार्थयेत्।

भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत ।
यावत्पूजा समाप्ति: स्यात्तावदत्र स्थिरो भव ।।

ततो हस्तप्रक्षालनम्।

अथ गणपति पूजनं

तत्रादौ हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा गणेशावाहनं कुर्यात्।

ध्यानम् -

ॐ एह्येहि हेरम्ब महेशपुत्र समस्त विघ्नौघ विनाशदक्ष ।

मांगल्यपूजा प्रथम प्रधान गृहाण पूजां भगवन्नमस्ते ॥
ॐ गणानां त्वा गणपति ठ हवामहे प्रियाणां त्वा प्रियपति ठ
हवामहे निधीनां त्वा निधिपति ठ हवामहे वसो
मम आहमजानि गर्भधमात्वमजासि गर्भधम् ॥
आवाहयामि पूजार्थं रक्षार्थं च ममक्रतोः ।
इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥
ॐ भूर्भुवः स्वः सिद्विबुद्वि सहित महागणाधिपतये नमः।
गणपतिमावाहयामि स्थापयामि।

षोड़शोपचार से पूजा कर अर्घ प्रदान करे –

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्य रक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।१।।
द्वैमातुर कृपासिन्धो षाण्मातुरग्रज प्रभो ।
वरदस्त्वं वरं देहि वांछितं वाञ्छितार्थद ।।२।।

पुष्पांजलि व प्रार्थना –

विघ्नेश्वराय वरदाय सुरप्रियाय,
लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुति यज्ञ विभूषिताय,
गौरीसुताय गणनाथ नमो नमस्ते ।।१।।
भक्तार्तिनाशन पराय गणेश्वराय,
सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय,
भक्त प्रसन्न वरदाय नमो नमस्ते ।।२।।

मातृका पूजनम् :-

गौरी पद्मा शचीमेधा सावित्री विजया जया ।
देव सेना स्वधा स्वहा मातरो लोकमातरः ॥
धृति पुष्टिस्तथा तुष्टिरात्मनः कुल देवताः ।

गणेशानाधिका ह्येता वृद्धो पूज्याश्चषोडश ।।

गंधोपचारादि से पूजन करें।

नवग्रहपूजनं :-

ब्रह्मामुरारीस्त्रिपुरांतकारी भानुः शशिः भुमि सुतो बुधश्च ।
गुरुश्च शुक्रशनि राहुकेतवः सर्वे ग्रहाः शांतिकराः भवन्तु ।।

नवग्रह मंत्र से आवाहन करके पूजा करें। इसके पश्चात्त रुद्रकलश का पूजन करें। संक्षिप्त "पुण्याहवाचन" कर कंकण बंधन करें।

रक्षा बंधन – यदाऽऽबद्ध्नं दाक्षायणा हिरण्य ठ शतानीकाय सुमनस्यमानाः तन्मः आबध्नामि शतं शरदायायुष्मांजरदष्टिर्यथा सम।।

इसके बाद जलयात्रा के लिये प्रस्थान करें।

अथ जलयात्रा विधानम्

तालाब या कूप के किनारे गोमयादि से भूमि को शुद्ध करें। स्वस्तिक बनाये। नववर्धिनी कलशो के लिये आटा गुलाल से अष्टदल बनावें उन पर कलश रखें, प्रधान ताम्र कलश बीच रखें। सप्तमातृकाओं के लिये कपड़े पर ७ अक्षत पुंज रखें या ७ सिंदूर या ७ कुंकुम की टींकी लगायें।

संकल्प :- ॐ जलयात्राङ्गभूत याज्ञिककार्य साङ्गतासिद्ध्यर्थे श्रीवरुणदेवता प्रसन्नार्थे, गणेश, जलमातृ, जीवमातृ, स्थलमातृ, सप्तसागर योगिनी, क्षेत्रपाल, भूमि पूजन नववर्द्धनी कलशेषु वरुण पूजन चाह करिष्ये।

(१८ कलश अलग मंडप हेतु पंचकुण्डीय यज्ञ मे लेवें) सर्षप विकरण कर दिग्रक्षण करें। गणपति पूजन करें।

जलमातृका पूजनं :– ७ टींकीं या अक्षतपूंजो पर –

(१) ॐ भू र्भुवः स्वः मत्स्यै नमः मत्सीवाहयामि स्थापयामि।

इस तरह नाम मंत्र के चतुर्थी लगाकर आवाहन व प्रथमा से स्थापन करें।

(२) ॐ भू कूर्म्यै.। (३) ॐ वाराह्यै नमः। (४) ॐ भू. मांडूक्यै नमः। (५) ॐ भू. मकर्यै नमः (६) ॐ भू. ग्राहक्यै नमः (७) ॐ भू. क्रौंचिक्यै नमः।

(७ पुंजेषु) सप्तजीवमातृका पूजनं :— (१) ॐ कुमारी आ.। (२) ॐ भू. धनदा आ. (३) ॐ भू. नन्दा. । (४) ॐ भू. विमलां.। (५) ॐ भू. मंगलां. (६) ॐ भू. अचलां.। (७) ॐ भू पद्मां आ. स्था।

(७ पुंजेषु) सप्तस्थलमातृका पूजनं :— (१) ॐ भू ऊर्म्यै नमः ऊर्मि आ. स्था.(२) ॐ भू लक्ष्म्यै.। (३) महामायाायै नमः। (४) ॐ भू पानादेव्यै. (५) ॐ वारुण्यै नमः। (६) ॐ भू निर्मलायै नमः। (७) ॐ भू गौधायै नमः।

(७ पुंजेषु) ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः।

मतांतरेण च (विशेष)

जीवमातृका— मत्सी कूर्मी जलौका च दर्दुरी जल गोधिका ।
मकरी तन्तुकी चैव सप्तैता जीव मातरः ।।
(अष्टमं कर्करी, नवमं सर्पिणी)

जलमातृकाः— उर्मिर्लक्ष्मीर्जला पाना वारुणी जलवासिनी ।
अपागा च क्रमेणैव सप्तैता जल मातरः ।।

स्थलमातृकाः— उमा लक्ष्मीर्महामाया पानादेवी तथैव च ।
वारुणी निर्मला गोधा सप्तैताः स्थलमातरः ।।

जल मातृका, स्थल मातृका एवं जीवमातृका का पूजन नव वर्धिनी कलशों पर करना लिखा है, परन्तु इसके लिये पहिले जलाशय या कूप से जल भरना चाहीये। बाद में जलाशय पूजन करें।

(मेरे दृष्टिकोण से पहले जलाशय पूजन करें फिर कलशों में जल भरें उस स्थिति मे मातृका पूजन अक्षत पुंजों पर अलग से करें।)

अगर नववर्धिनी कलशों मे इनका पूजन करना हो तो आठों दिशाओं में आठ एवं मध्य में प्रधान कलश रखें उसमें मातृका पूजन आदि पूर्वादि क्रमेण करें।

नोट :— मेरे विवेकानुसार मातृका पूजन उपरोक्त क्रम द्वारा इसी प्रकार से करना चाहिये। **यथा क्रम विधि :—**

जलमातृका पूजन समय पूर्वादि क्रम से उर्मिआदि सप्तमातृका तथा ईशान मे शुद्धा तथा मध्य मे वरुण का पूजन करें।

जीवमातृका पूजन समय मध्य कलश मे "ॐ वं वरुणाय जलाधिपतये: नम:।", पूर्व मे "कूर्मी" आग्नेय मे "जलौकी" इस क्रम से आवाहन करते हुये उत्तर मे कर्करी तथा ईशान मे सर्पिणी का आवाहन करें।

स्थल मातृका पूजन समय पूर्वादि क्रम से उमा, लक्ष्मी........सप्तमातृका ईशान में "श्री" तथा मध्य मे प्रधान देव वरुण का पूजन करें।

सर्वेषां गंधादिभि संपूज्य

64 योगिनी :— ॐ भू भुर्वः स्वः दिव्यादि चतु:षष्टि योगिनिभ्यो नम:।अक्षत लेकर जल में छोडें जल में उनकी पूजा करायें।

क्षेत्रपाल :— वायव्य कोण मे त्रिकोण मंडल पर क्षेत्रपाल पूजन करें।

ॐ क्षत्रस्य योनिरसि क्षत्रस्यनाभिरसि। मा त्वाहि ठ सीन्मा मा हि ठ सी:। ॐ भूर्भुवः स्वः क्षेत्रपालाय नम:। क्षेत्रपाल आ. स्था.। गंधादिभि संपूज्य।

बलिदानम् :— दीपक उड़द दही भात नमकीन से बलि देवें।

क्षेत्रापाल महाबाहो महाबल महापराक्रम ।
बलिं गृहाणदेवेश क्षेत्ररक्षण — हेतवे ।।

भो क्षेत्रपाल दिशं रक्ष: बलिं भक्षय सकुटुम्बस्य आयुंकर्ता क्षेमकर्ता तुष्टि पुष्टिकर्ताभव।

जलमध्ये सप्तसागराणाम् पूजनम्

ॐ समुद्रादूर्मिर्मधूमाँ२ उदारदुवाठ शुनासममृतत्वनाट् ।
धृतस्य नाम गुह्यं यदस्ति जिह्वा देवानामृतस्य नाभि ।।

ॐ भू भुर्व स्वः लवणेक्षु सुरासर्पिदधिक्षीर जलमध्यान् सप्तसागरान् आ. पूजयामि।

जल पूजनम् :- ॐ अद्भ्यो नम:। पुष्करादितीर्थभ्यो नम:। ॐ तत्वायामि ब्राह्यणा...। से पूजन करें। पेड़े की बलि प्रदान करें जल मे पंचामृतप्रेक्षण करें। तथा स्रुव से द्वादश घृत की आहुति देवें। (१) ॐ अद्भ्य: स्वाहा इदं अदभ्यो नम: (२) ॐ वार्भ्य: स्वाहा (३) ॐ उदकाय स्वाहा (४) ॐ तिष्ठन्तीभ्य: स्वाहा (५) ॐ स्रवन्तीभ्य स्वाहा (६)

स्यन्दमाभ्य स्वाहा (७) ॐ कूपाभ्य स्वाहा (८) ॐ सूद्याभ्य स्वाहा (९) ॐ धायाभ्य स्वाहा (१०) ॐ अर्णवाय स्वाहा (११) ॐ समुद्राय स्वाहा (१२) ॐ सरिताय स्वाहा।

"वरुणस्योत्तंभनमसि" मंत्र से ३ बार अर्घ देवें।

नव कलाशों का स्थापन पूजन ग्रह शान्त्यानुसार करें। उनको जल से पूर्ण करें। पूजन करें। वैसे विस्तृत में नव कलशों के अलग–अलग मंत्र व सूक्त है।

कलशपूजनम् :-

विनियोग :– ॐ महीद्योरित्यस्य मेधातिथि ऋषिः गायत्री छंदः द्यावा पृथिवी देवते भूमि स्पर्शने विनियोगः ।

(अष्ट दलाग्रे भूमिं स्पृष्ट्वा।)

ॐ महिद्यौः पृथिवी च नः इमं यज्ञं मिमिक्षताम्। पिपृतान्नोभरीमभि।।

अष्ट दलों पर धान्य रख कर विनियोग छोडें।

विनियोग :– ॐ ओषधयो इत्यस बंधुर्ऋषिः निवृदनुष्टुप् छंदसी ओषधयो देवता यव प्रक्षेपे विनियोगः।

ॐ ओषधयः समवन्दत सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्त ठ राजन्या पारमसि ।।

कलश स्थापन करके कलश के हाथ लगाकर कहें

ॐ आजिघ्र कलशम्मह्य त्वा विशिन्त्विन्दवः । पुनरूर्जा निवर्तस्व सा नः सहस्त्रन्धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयि।

कलशों पर सप्तदर्भो से छींटें देकर पवित्र करें।

ॐ चित्पतिर्मा पुनातु वाक्यतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्।।

कलशों के नीचे आधार लगा कर उन्हें स्थिर करें।

ॐ स्थिरोभव वीडवंग आशुर्भव वाज्यर्वन ।
पृथुर्भव सुषदंस्त्वमग्ने पुरीषवाहणः ।।

इसके पश्चात नवकुंभो को जल से आपूरीत करें। प्रत्येक दिशा के कलशों

को जल से पूरित करते समय निम्न ऋचायें पढ़ें —

1. ***मध्यकलशे :—***

ॐ समुद्रज्येष्ठा: सलिलस्यमध्यात्पुनानायंत्यनिविशमाना ।
इन्द्रो या वज्री वृषभोररादता आपो देवीरिह मामवन्तु ।।

2. ***पूर्वकलशे :—***

ॐ या आपो दिव्या उतवास्रवन्ति खनित्रिमा उतवाया: स्वंयजा:।
समुद्रार्थाया: शुचयो पावकास्ता आपो देवीरिह मामवन्तु ।।

3. ***आग्नेयकलशे :—***

ॐ या सा राजा वरुणोयाति मध्येसत्यानुते अवपश्यञ्जनाना।
मधुश्चुत: शुचयो या: पावकास्ता आपो देवीरिह मामवन्तु ।।

4. ***दक्षिणकलशे :—***

ॐ यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदन्ति।
वैश्वानरो यास्वग्नि: प्रविष्टस्ता आपो देवीरिह मामवन्तु ।।

5. ***नैर्ऋत्यकलशे :—***

ॐ समुद्रं गच्छ स्वाहान्तरिक्षंगच्छ स्वाहा देव ठं सवितारं गच्छ स्वाहा मित्रावरुणौगच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दार्ठसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरठं गच्छ स्वाहा मे हार्दिं यच्छ दिवन्ते धूमो गच्छतु स्वज्योर्ति: पृथिवीं भस्मना पृण स्वाहा।।

6. ***पश्चिमकलशे :—***

ॐ समुद्राय त्वा वाताय स्वाहा सरिताय त्वा वाताय स्वाहा।
अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा।
अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा।।

7. ***वायव्यकलशे :—***

ॐ समुद्रोसि नभस्वानार्द्रदानु: शम्भूर्मयो भूरभि मा व्वाहि स्वाहा मारुतोऽसि मारुतांगण: शम्भूर्मयो भूरभि मा व्वाहि स्वाहा वस्यूरसि

दुवस्वाच्छम्भूर्मयो भूरभि मा व्वाहि स्वाहा ॥

8. उत्तरकलशे :—

ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ॥

9. ईशानकलशेजलपूरणम् :—

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीह ॥

सब कुंभो में धान्यप्रेक्षप :—

ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषेधान्देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोसि ॥

गंधप्रक्षेप :—

ॐ त्वांगन्धर्वा अखनस्त्वामिन्द्रस्त्वाम्बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमच्युत ॥

कलशं वस्त्रेणवेष्टनम् :—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातुवसोः पवित्रेण शतधारेण सुप्वाकामधुक्षः॥

अथ सर्वौषधीः :—

ॐ या ओषधिः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा मनैनु बभ्रुणामह ठं शतं धामानि सप्त च ।

अथ दूर्वाप्रक्षेपः :--

ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च।

अथ कलशे कुशाप्रक्षेपः :-

ॐ पवित्रे स्थो वैष्णव्यो सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ।

इसके बाद "स्योना पृथिवी" से सप्तमातृका, या "फलनीर्या" से पूगीफल

कलश में डालें।

द्रव्य प्रक्षेण :– पूर्व कलश में इक्षुरस, दक्षिण कलशे **स्वादूदकाय** (मीठा रस) पश्चिम कलश में **"क्षीर"** उत्तर कलश मे **दधि** तथा मध्य कलश में **"षड्रस"** डालें।

पंचरत्नप्रक्षेप :–

ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत । दधद्रत्लानि दाशुषे ।।

दक्षिणाप्रक्षेप :–

ॐ हिरण्य गर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।

पंचपल्लवाः :– (वट, पीपल, गूलर, आम, पलाश)

ॐ अश्वथेवो निषदनं पर्णेवो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पुरुषम् ।।

इसके बाद **"पूर्णादर्वि"** से पूर्णपात्र तथा **"श्रीश्चते"** मंत्र से नारेल को मोली या वस्त्र से वेष्टन करके रखें। तत्पश्चात् **वरुण पूजा** तथा तीर्थवाहन करें।

(**विशेष विधि** में आवाहन में प्रथम कलश में **"दश दिक्पालों"** के मंत्रो से, द्वितीय मे **"श्री सूक्त"** एवं **"लक्ष्मी सूक्त"** से, तृतीय में **"पुरुष सूक्त"** से, चतुर्थ में **"नारायण अनुवाक"** से, पंचम मे **"पञ्च ब्रह्म"** मंत्रो से, षष्टम मे **"अम्भ्स्य पारेण अनुवाक"** सप्तम में **"ब्रह्मानंदवल्ली"** अष्टम में **"भृगुवल्ली"** मंत्र ऋचाओं से आवाहन, मध्य के **नवम** कलश मे वरुण एवं तीर्थों के मंत्रों से आवाहन करके पूजा करें।)

स्वशरीरे वरुण मंत्र न्यासः :–

ॐ वं वरुणाय जलाधिपतये: अंगुष्ठाभ्यां नमः।। हृदयाय नमः ।।
ॐ रुं वरुणाय जलाधिपतये: तर्जनीभ्यां नमः।। शिरसे स्वाहा।।
ॐ णां वरुणाय जलाधिपतये: मध्यमाभ्यां नमः।। शिखायैवषट् ।।
ॐ यं वरुणाय जलाधिपतये: अनामिकाभ्यांनमः।। कवचाय हुं।।
ॐ नं वरुणाय जलाधिपतये: कनिष्ठिकाभ्यां नमः।। नैत्रत्रयाय वौषट्।।
ॐ मं वरुणाय जलाधिपतये: करतलकर पृष्ठाभ्यां नमः।। अस्त्रायफट्।।

कलश में वरुण देवता की प्रतिष्ठा करें।

ॐ तत्वायामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणे हबोध्युरुश ठं समानऽआयुः प्रमोषीः ।।१।।
ॐ वरुणस्योत्तम्भनसि........।।२।। ॐ भुर्भुवः स्वः वरुण इहागच्छेह, इहतिष्ठ। इत्यावाह्य ॐ वरुणाय नमः ।

सर्वदेवाऽऽवाहनम् :-

कलशस्य मुखे विष्णु कण्ठे रुद्र समाश्रितः ।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृता ।।१।।
कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी ।
ऋग्वेदो यजुर्वेदा सामवेद च अथर्वणः ।।२।।
अंगैश्च कलशस्तु सर्वेसमाश्रिता ।।३।।
आगच्छन्तु महाभागाः समुद्राः सरितोह्वदा ।
प्रभासं पुष्करं चैव विशाला विरजा गया ।।४।।
कुरुक्षेत्रं प्रयागं च भद्रकर्णं पृथूदकम् ।
गंगा च यमुना चैवं ब्रह्मपुत्रा सरस्वती ।।५।।
ताप्ती गोदावरी चैव माहेन्द्री नर्मदा तथा ।
नदाश्च विविधाजाता नद्यः सर्वस्तथापरा ।।६।।
एवमादीनि तीर्थानि यानि सन्ति धरातल ।
आयान्तु तानि सर्वाणि कलशेषु समन्ततः ।।७।।

श्वेत गंधाक्षत पुष्प धूप दीप नैवेद्य ताम्बूलं नानाफल दक्षिणाभि. संपूज्य। नारिकेलेनार्घ्यं दद्यात्।

सर्वोपचार पूजा पश्चात् कलश से प्रार्थना करें।

देवदानव संवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदाकुंभ विधृतो विष्णुना स्वयम् ।।१।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।२।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।

आदित्य वसवो रुद्रा विश्वेदेवा: सपैतृका: ।।३।।
त्वयि तिष्ठन्ति सर्वेऽपि यत: कामफलप्रदा: ।
त्वत् प्रासादादिमं यज्ञं कर्तुमीहे जलोद्भव ।।४।।
सान्निध्यं कुरु मे देव प्रसन्नोभव सर्वदा ।।५।।

नमो नमस्ते स्फटिक प्रभाय,
सुश्वेत हाराय सुमंगलाय ।
सुपाशहस्तोय झषासनाय,
जलाधिनाथाय नमो नमस्ते ।।

पाशपाणे नमस्तुभ्यं पद्मनी — जीवनायकम् ।
यावत् कर्म समाप्ति तावत्त्वं स्थिरो भव ।।

(पुष्पांजली प्रदान करें।)

ब्राह्मणों को तिलक करें एवं दक्षिणा देवें।

पश्चात् यजमान पत्नि व अन्य सुवासिनियां कलश को धारण करें। अन्य २८ कलश मंडप के कलश भी सुवासिनियां धारण करें। राजमार्ग होते हुये जल यात्रा यज्ञ मंडप की ओर प्रस्थान करें।

अर्द्धमार्ग में किसी चौराहे पर क्षेत्रपाल, भैरव को बलि प्रदान करें। चौराहे पर भूमि को गोबर से लिपकर अक्षत पुंज पर सिंदूर लगाकर पाषाण या सुपारी रखें उस पर क्षेत्रपाल, भैरव का आवाहन करें।

ॐ नहिस्पशम विदन्नन्य— मस्माद्वैश्वानरात्पुर एतारमग्ने ।
एमे नमवृधन्नमृता अमर्त्य वैश्वानरं क्षेत्रजित्याय देवा: ।।

ॐ भूर्भुव: स्व: क्षेत्रपालाय नम: । क्षेत्रपालमावाहयामि स्थापयामि।
स्नान, वस्त्रा, गंधोपचार से पूजन कर बलि प्रदान करें।

ॐ क्षेत्रस्योत्वमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसिन्द्रस्य बार्त्रघ्नमसि मित्रस्यासि वरुणस्यासि त्वयायं वृत्रं वधेत्। दुवासि रुजासि क्षमासि। पातैनं प्राञ्चं पातैन प्रत्यञ्चं पातैन तिर्यञ्चं दिग्भ्य: पात: ।।

ॐ ऐहि ऐहिदेवीपुत्र बटुकनाथ कपिल जटा भार भास्वर ज्वालामुख

क्षेत्रपाल अवतर अवतर कपिल पिंगल त्रिनेत्र उर्ध्वकेश जिह्वाललन शत्रुन छिन्धि छिन्धि भिन्धि भिन्धि कुरु कुरु मुरु मुरु चल चल लं ल: ह्रां ह्री ह्रूं ह्रैं ॐ भगवन् क्षेत्रपाल मम यज्ञं रक्ष रक्ष इमं दधिमाषमुद्गभक्त सुगन्धित तैल रक्तवस्त्रादियुतं बलिं गृहाण स्वाहा ।।

आचार्य व ब्राह्मण मार्ग मे तथा यज्ञ मंडप मे प्रवेश करते समय **"भद्रसूक्त"**, **"शांतिसूक्त"**, **"पावमानसूक्त"**, **"शाकूनसूक्त"** **(सुमंगलसूक्त)** आदि सूक्त पढ़ें।

पावमान सूक्तम्

(१)

यह पावमान सूक्त रक्षाकरण, पवित्रीकरण, त्रिसूत्रीकरण, प्रोक्षण एवं अभिषेक में भी काम आता है।

ॐ पुनन्तु मा देव जना: पुनन्तु मनसाधिय:। पुनन्तु विश्वाभूतानि जातवेद: पुनीहिमा ।।१।। पवित्रेण पुनीहिमा शुक्रेण देव दीद्यत्। अग्ने कृत्वा क्रतूँरनु ।।२।। यत्ते पवित्र मर्चिष्यग्ने वितत मन्तरा । ब्रह्म तेन पुनातु मा ।।३।। पवमान: सोअद्यन: प्रवित्रेण व्विचर्षणि:। य: पोता स पुनातु मा ।।४।। उभाभ्यान्देव सवित: पवित्रेण सवेन च। माम्पुनीहि विश्वत: ।।५।। वैश्वदेवी पुनतीदेव्व्या गाद्यस्यामिमा बहव्यस्तन्वो वीतपृष्ठा: । तयामदन्त: सधमा देषुवयꣳस्यामपतयो रयीणाम् ।।६।।

।। इति पावमान सूक्तम् ।।

(२)

ॐ पवमान: सवर्जन:। पवित्रेण विचर्षणि:। य: पोता सपुनातुमा। पुनन्तु मा देवजना: । पुनन्तु मनवोधिया । पुनन्तु विश्वआयव: । जातवेद: पवित्रवत्। पवित्रेण पुनिहिमा। शुक्रेण देवदीद्यत्। अग्नेक्रत्वा क्रतू ठं रनु ।।१।। ॐ यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा । बह्मतेन पुनीमहे। उभांभ्यादेव सवित: पवित्रेण सवेन च ।इदं ब्रह्म पुनीमहे ।। वैश्वदेवी पुनती देव्यागात्। यस्मै बह्वीस्तनुवो वीतपृष्ठा:।

तया मदंतः सदमाद्येषु। वय ठं स्यामपतयो रयीणाम्।।२।। ३ॐ वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयोभूः । द्यावा पृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम । वृहद्भिः सवित स्तृभिः । वर्षिष्ठै र्देवमन्मभिः अग्ने दक्षैः पुनीहिमा । येनदेवा अपुनत । येनापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्मपुनीमहे ।।३।। ३ॐ यः पावमानी रध्येति । ऋषिभिः संभृत ठं रसम्। सर्वठंसपूत मश्नाति। स्वदितं मातरिश्वना। पावमानी र्यो अध्येति। ऋषिभिः संभृत ठं रसम्। तस्मै सरस्वती दुहे। क्षीर ठं सर्पिर्म धूदकम्। पावमानीः स्वस्त्यनीः ।।४।।

३ॐ सुदुघाहि पयस्वतिः । ऋषिभिः संभृतोरसः । ब्रह्मणेष्वमृतं हितम्। पावमानी दिशंतुनः । इमं लोक मथोअमुम्। कामान्त्समर्धयन्तुनः । देवी र्देवैः समाभृताः। पावमानीः स्वस्त्ययनीः सुदुघाहिवृतश्चुतः । ऋषिभिः संभृतोरसः ।।५।। ३ॐ ब्रह्मणेष्वममृत ं हितम् । येन देवाः पवित्रेण। आत्मानं पुनतेसदा। तेनसहस्रधारेण। पावमान्यः। पुनन्तुमा। प्राजापत्यं पवित्रम् । शतोद्याम ं हिरण्मयम् । तेन ब्रह्म विदोवयम्। पूतं ब्रह्मपुनीमहे। इन्द्रः सुनीती सहमापुनातु । सोमः स्वस्त्या वरुणः समीच्या। यमोराजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयत्या पुनातु ।।६।।

।। इति पावमान सूक्तम् ।।

अथ सुमंगलम् सूक्तम्

(शाकून सूक्त)

(मंडप प्रवेशे गृह प्रवेशे, शुभकार्येषु मूर्ति प्रतिष्ठा स्थापन प्रवेशसमये)

३ॐ कनिक्रदज्जनुषं प्रबुवाणऽइयर्तिवाचमरितेव नावम् । सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्याविदत्।।१।। मात्वा श्येन उद्वधीन्मा सुपर्णो मात्वाविदद्दिषुमान् वीरोऽस्ता ।

पित्र्यामनु प्रदिशं कनिक्रदत् सुमंगलो भद्रवादीवदेह ।।२।।
अवक्रन्द दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुन्ते ।
मानः स्तेन ईशत माघशं सो बृहद्वदेम विदथे सुविराः ।।३।।

।। इति सुमंगलम् सूक्तम् ।।

अथ स्वस्ति सूक्तं

शुभ कार्य में, प्रवेश में तथा तिलक एवं आशिर्वाद समय पढ़ें।

ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावा पृथिवी सुचेतना ।।१।।
स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ।।२।।
विश्वेदेवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ।।३।।
स्वस्ति मित्र वरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ।।४।।
स्वस्ति पंथामनुचरेम सूर्या चन्द्रमसाविव ।
पनुर्ददता घ्नता जानता सङ्गमेमहि ।।५।।   (इति ऋग्वेदीय)
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाविश्ववेदाः ।
स्वस्ति नस्ताक्ष्योंअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ।।६।।

।। इति स्वस्ति सूक्तम् ।।

अथ पूजनप्रकरण:

मंडपे

हाथ में पुष्प अक्षत पुन: लेकर गणेश जी का ध्यान करें—

सुमुखश्चैकदन्तश्च कपिलो गजकर्णक: ।
लंबोदरश्च विकटो विघ्ननाशो विनायक ।।१।।
धुम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजानन: ।
द्वादशैतानि नामानि य: पठेच्छृणुयादपि ।।२।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ।।३।।
अभीप्सितार्थ सिद्ध्यर्थं पूजितो य: सुरासुरै: ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नम: ।।४।।
वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।५।।
सर्वमंगलमांगल्ये शिवे सवार्थसाधिके ।
शरण्ये त्र्यंबके गौरी नारायणि नमोऽस्तुते ।।६।।
शुक्लाम्बरधरं देवं शशिवर्ण चतुर्भजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।७।।
सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ।
येषां हृदिस्थो भगवान् मंगलायतनो हरि: ।।८।।
तदैव लग्नं सुदिनं तदैव विद्याबलं दैवबलं तदैव ।
ताराबलं चन्द्रबलं तदैव लक्ष्मीपतेस्तेऽङ्घ्रियुगंस्मरामि ।।९।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजय: ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दन: ।।१०।।
यत्र योगेश्वर: कृष्ण यत्र पार्थो धनुर्धर: ।
तत्र श्रीर्विजयोभूतिर्ध्रुवा — नीतिर्मतिर्मम ।।११।।

सर्वेष्वारम्भकार्येषु देवास्त्रिभुवनेश्वराः ।
देवाः दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।१२।।
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ।
सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ।।१३।।
विश्वेशं माधवं ढुण्डिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गंगां भवानीं मणिकर्णिकाम् ।।१४।।

श्रीलक्ष्मीनारायणाभ्यांनमः, उमामहेश्वराभ्यांनमः शचीपुरन्दराभ्यांनमः वाणीहिरण्यगर्भाभ्यांनमः । इष्टदेवताभ्योनमः, कुलदेवताभ्यो नमः, स्थानदेवताभ्योनमः, वास्तुदेवताभ्योनमः, ग्रामदेवताभ्योनमः, मातापितृभ्यो नमः। सर्वेदेवेभ्योनमः सर्वेभ्यो ब्राह्मणेभ्यो नमः। एतत्कर्म प्रधान देवताय नमः।

प्रधान संकल्प :— पृष्ठ संख्या ५४ के अनुसार करें।

दिग्रक्षणं :— (बायें हाथ मे सरसों लेकर दाहिने हाथ से ढकें। सूक्त पृष्ठ संख्या ५२२ पर दिया गया है।)

ॐ रक्षोहणं वलगहनं वैष्णवीमिद महन्तं वलगमुत्किरामि यम्मेनिष्ट्यो यममात्यो निचखादेन महन्तं वलगमुत्किरामि यम्मे समानो यम समानो निचखादेन महन्तं वलगमुत्किरामि यम्मे सबंधु र्यम सबंधुर्निचखानेद महन्तं वलगमुत्किरामि यम्मे सजातो यम सजातो निंचखानोत्कृत्याङ्किरामि।

अपसर्पन्तु ते भूता ये भूता भूमि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।
अपक्रामन्तु भूतानि पिशाचाः, सर्वतोदिशम् ।
सर्वेषामवरोधेन पूजाकर्म समारंभे ।।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः ।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।।
भूतप्रेत — पिशाचाद्या अपक्रामन्तु राक्षसा ।
स्थानादस्माद् व्रजन्त्वन्यत्स्वीकारोमि भुवंत्विमाम् ।।
भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन ।

ते सर्वेऽप्यप गच्छन्तु पूजा कर्म करोम्यहम् ॥

इसके बाद थोड़ी सरसों लेकर चारों दिशाओं मे बिखेरें फिर दसों दिशाओं में दिग्रक्षण करें।

ॐ पूर्वे रक्षतु गोविन्दः आग्नेयां गरुड़ध्वजः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैऋत्ये ॥
वारुण्या केशवो रक्षेद्वायव्यां मधुसूदनः ।
उत्तरो श्रीधरो रक्षेदीशाने तु गदाधरः ॥
उर्ध्वं गोवर्धनो रक्षेदधस्ताच्च त्रिविक्रमः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥

या –

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यमग्निदेवता ।
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ।
उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ॥
उर्ध्वं ब्रह्माणि मे रक्षेद् धस्ताद् वैष्णवी तथा ।
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ।
अजिता वामवाश्र्वे तु दक्षिणे चापराजिता ॥

शिखाबंधन :-

ॐ ब्रह्मवाक्यसहस्रेण शिववाक्यशतेन च ।
विष्णोर्नामसहस्रेण शिखाग्रंथि करोम्यहम् ॥

(ततौ वाम पादेन त्रिवारं भूमि ताडयेत्)

दुष्टानां दमनं कृत्वा पापानिघ्नन्तुमेऽमराः ।
निर्यान्तुते सर्वविघ्नाः आगच्छन्तु अत्र देवता ॥

प्राणायाम् :– १६ बार ॐ या व्याहृति से पूरक, ६४ बार जप से कुंभक तथा ३२ बार जप से रेचक करें। अथवा मूल मंत्र का जाप १–४,२ के अनुपात से करें।

भूत शुद्धि

(अपनी बांई कोख में पाप पुरुष का ध्यान करें।)

वाम कुक्षि स्थितं कृष्णमंगुष्ठ परिमाणकं ।
विप्रहत्या शिरोयुक्तं कनकस्तेये – बाहुकम् ।।
मदिरा पान हृदयं गुरु तल्प कटीयुतम् ।।
तत्संयोगि पदद्वन्द्वयमुप पातक रोमकम् ।
खड्गचर्मधरं दुष्टमधोवक्त्रम् च दुःसहम् ।।

इसके बाद **"यं"** बीज मंत्र १६ बार जपता हुये बायीं नासिका से वायु के साथ भगवती के तेज का स्मरण कर पूरक करें। फिर कुंभक करें **"रं"** का ६४ बार जाप करे और समझे इससे पाप पुरुष भस्म हो गया है, **"यं"** मंत्रा ३२ बार जपता हुआ रेचक करें। यह समझें की पाप पुरुष की भस्मी बाहर चली गई है।

फिर **"वं"** का १६ बार जाप करें भवना करें की सहस्रार के अमृत से मरी देह अमृतमय हो गयी है। **"लं"** इस मंत्र का १६ बार जाप करें और समझें मेरी देह वज्र समान हो गई है।

अथवा – **"ॐ हौं"** इस मंत्र का १०८ बार जाप करें।

वरुण पूजा

पृथ्वी पर यंत्र बनाकर अक्षत रख उस पर वरुण पात्र रखें। (यंत्र में बिन्दु त्रिकोण वृत्त उस पर वरुण चतुस्त्र बनावें।)

ॐ महीद्यौः पृथ्वी च नऽइमं यज्ञंमिमिक्षताम्। पिपृतान्नो भरीमभिः।

कलश के हाथ लगावें या अनामिका से स्पर्श करें।

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणहवोध्युरुश ठ समान आयुः प्रमोषीः ।।
मकरस्थं पाशहस्तमम्भसां पतिमीश्वरम् ।
आवाहये प्रतीचीशं वरुणं यादसां पतिम् ।।

ॐ भूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवार सायुधं सशक्तिकम् आवाहयामि स्थापयामि।

स्नानं –

ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभ सर्जनीस्थो । वरुणस्य

ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसद नमासीद।।

पंचामृतंप्रक्षेप –

ॐ पंचनद्यः सरस्वती मपियन्ति सस्त्रोतसः ।
सरस्वती तु पंचधासोदेशे भवत्सरित् ।।

गंगाजल डलें –

नमामि गंगे तव पादपंकजं, सुरासुरैर्वन्दित दिव्य रूपम् ।
भुक्तिं च मुक्तिं प्रददासि नित्यं, भावानुसारेण सदा नराणाम् ।।

वस्त्रम् –

सर्वभूषाधिके शुद्धे लोक लज्जा निवारणे ।
मयोपपादिते वस्त्रे गृहाण परमेश्वर ।।

उपवस्त्रम् –

ॐ सुजातो ज्योतिषा सहशर्म वरुथ मा सदत्स्वः ।
वासो अग्नेविश्वरूपः ठ संव्ययस्व विभावसो ।।

गंधम् –

गंधद्वारां दुराधर्षां नित्य .पुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

अक्षताः –

अक्षताधवलाः शुभ्राः कुंकुमेन विराजिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।

पुष्पं

पत्रं पुष्पं फलं तोयं रत्नानि विविधानि च ।
गृहाणार्घं मयादत्तं देहि मे वांछितं फलम् ।।

धूपं –

वनस्पतिरसोद्भूतो गंधाढ्यं सुमनोरहरः ।
आघ्रेयः सर्वं देवानां धूपोऽयं प्रतिगृह्यताम् ।।

दीपं –

साज्यं च वर्तिं संयुक्तं वन्हिना योजितं मया ।

दीपं गृहाण देवेश त्रैलोक्य तिमिरापह ।।

सुगंधित द्रव्यं -

ॐ अ ठ शुनाते अ ठ पृच्यताम्परुषापरुः ।
गंधस्ते सोममवतु मदाय रसोऽअच्युतः ।।

नैवेद्यं -

शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च ।
आहारं भक्ष्यभोज्यञ्च नैवेद्यं प्रतिगृहताम् ।।

आचमनीयम् -

शीतलं निर्मलं तोयं कर्पूरेण सुवासितम् ।
आचम्यतां सुरश्रेष्ठ मयादत्तं च भक्तितः ।।

ताम्बूलं समर्पयामि -

नागवल्लीदलं चैव पूगीफलं समन्वितम् ।
कर्पूरेण समायुक्तं ताम्बूलं प्रतिगह्यताम् ।।

पूगीफलं समर्पयामि -

समुद्रतीरसम्भूतं नानारोगनिवारणम् ।
पूगीफलं मयादत्तं गृहाण परमेश्वरम् ।।

दक्षिणा समर्पयामि -

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसो ।
अनंतपुण्यफलद मतः शांतिं प्रयच्छ मे ।।

विशेष आवाहन -

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिसन् सानिध्यं कुरु ।।
ब्रह्माण्डोदर तीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देहि दिवाकर ।।
पूर्वेऋग्वेदाय नमः। दक्षिणे यजुर्वेदाय नमः। पश्चिमे
सामवेदाय नमः उत्तरे अथर्वण वेदायनमः

अंकुश मुद्रा से सूर्य मंडल के तीर्थो का आवाहन करें, "वं" मंत्र बोलकर

धेनुमुद्रा से अमृतीकरण, हुँ मंत्र से चुटकी बजाकर (चारों ओर) रक्षा करें। कलश पर बाँयां हाथ रखकर उस पर दाहिना हाथ रखकर मत्स्य मुद्रा बनावें और "वं" वरुण मंत्र का जाप करें।

पुष्पांजलिमादाय -

नमोनमस्ते स्फटिकप्रभाय, सुश्वेतहाराय सुमंगलाय ।
सुपाशहस्ताय झषासनाय, जलाधिनाथाय नमोनमस्ते ।।
पाशपाणे नमस्तुभ्यं पद्मीनी जीवनायकम् ।
यावत्कर्म समापप्येत् तावत् त्वं स्थिरो भवेत् ।।

इसके बाद जल से पूजा सामग्री का प्रोक्षण करें —

ॐ आपोहिष्ठा मयोभुवस्तान् ऊर्जेदधातन। महेरणाय चक्षसे।
योवः शिव तमोरसस्तस्य भाजयतेहनः । उशतीरिवमातरः ।।

इसके बाद भूमि पर जल छोडें।

तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ ।
(पुनः प्रोक्षण) — आपोजन यथाचनः ।।

दीपपूजनम् (हाथ में अक्षत लेकर आवाहन करें)

ॐ अग्निर्ज्योति ज्योतिरग्नि स्वाहा। सूर्यो ज्योति ज्योतिः सूर्यः स्वाहा । अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा ।
सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्योज्योतिःस्वाहा।।
ॐ दिवे दिवे सदृशी रन्यमर्ध्यकृष्णा असेदधपसद्म नोजा ।
अहं दासा वृषभो वस्नपयं तोदव्रजे वर्चिनं शं वरं च ।।

फिर दीपक को षोडशोपचार से पूजन एवं प्रार्थना करे।

भो दीप देवस्वरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत ।
यावत्पूजासमाप्ति स्यात्तावदत्र स्थिरो भव ।।

शंख पूजनम्-

ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्य पुरोहितः । तमीमहे महागयम्।
उपयामगृहीतोस्यग्नये त्वा वर्चस ऽएषतेयोनिरग्नये त्वावर्चसे।।
ॐ शङ्ख चन्द्रार्कदैवत्यं वरुणं चाधिदैवतम् ।

पृष्ठे प्रजापति विद्यादग्रे गंगा – सरस्वती
त्र्यैलोक्य यानि तीथानि वासुदेवस्य चाज्ञया ।
शङ्खे तिष्ठति वै नित्यं तस्माच्छंखं प्रपूजयेत ।।

शङ्ख की पूजा के बाद प्रार्थना करे।

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्वदेवैश्च पाञ्चजन्य नमोस्तुते ।।

गरुड पूजनम्

ॐ सुपर्णोसि गुरुत्क्माँ स्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथंतरेपक्षौ।
स्तोम आत्क्माच्छान्दा ँ स्यज्ञानियजू ँषिनाम ।।
सामते तनूर्वाम देव्यं यज्ञा यज्ञि यम्पुच्छन्धिष्ण्या: शफा: ।
सुपर्णो सिगरुत्क्मान्दिवङ्गच्छस्व: पत ।।

ध्यानम् –

आजानोस्ततप्त हेमप्रभममलहिमं प्रख्य मानहि तस्मादकर्ण
कुंकुमाभं भ्रमरकुलभि वश्यामलं मूहिर्त केशम् ।
ब्रह्माण्ड व्याप्त देहं भुजमिह प्रवैरभूषणैर्भूषिताङ्ग पिङ्गाक्षं
ताक्ष्र्यद्रंष्ट्रै वरदमभयदं ताक्ष्र्यमुग्रं नमामि ।।

पूजन करने के बाद घंटा बंजायें।

आगमनार्थं तु देवानां गमनार्थन्तु राक्षसाम् ।
कुरु घण्टे वरं नादं देवतास्थानसन्निधौ ।।

(देवता के स्नान, नैवेद्य तथा आरती के समय घंटा नाद करें।)

स्नाने धूपे च नैवेद्ये दीपे वस्त्रे च भूषणे ।
घण्टानाद प्रकुर्वीत तथा नीराजनेपि च ।।

गणपति पूजनम्

स्वस्तिक बनाकर, उसके मध्य में अक्षत पर, दीपपात्र के अक्षत पर सुपारी के मोली लपेटकर रखें।

हाथ में पुष्प अक्षत लेकर स्वति चक्र की पीठ देवियों का ध्यान पूर्वादि क्रम से करें।

तीव्रा चालिनी नंदा भोगदा कामरूपिणीम् ।
उग्रा तेजोवती सत्यान्ततो विघ्नविनाशनीम् ।।१।।
रक्तांग राग वसना माल्याभरण भूषिताम् ।
वराभीति करा सर्वा प्रसूनादिभिरर्चयेत ।
तस्योपरि स्वस्ति चक्रं कल्पयित्वा यथा विधि ।।२।।

पुन: हाथ मे अक्षत पुष्प लेकर गणपति का ध्यान एवं आवाहन करें। **(गणानांत्व मंत्रेण)**

ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो व्रातेभ्यो
व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च
वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ।।१।।
सजयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरण् ।
वासरमणिरिव तमसां राशीन्नशयति विघ्नानाम् ।।२।।
गंडपाली गलद्दान पूरलाल समानसान ।
द्विरेफान कर्णतालाभ्यां वारयन्तुं मुहुर्मुहुः ।।
कराग्रधृतमाणिक्य कुंभवक्त्रे र्विनिर्गतैः ।
रत्नवर्षैः प्रीणयन्तं साधकान् मद विह्वलम् ।।
माणिक्यमुकुटो पेतं सर्वाभरणभूषितम् ।।३।।
ॐ हे हेरम्ब त्वमेह्येहि ह्यंबिका त्र्यम्बकात्मज ।
सिद्धि बुद्धिपतेत्र्यक्ष लक्षलाभ पतिः पित्रः ।।४।।
नागास्य नागहारत्वं गणराज चतुर्भुजम् ।
भूषितः स्वायुधैर्दन्त पाशांकुश परश्वद्यै ।।५।।
श्री महागणाधिपतये रिद्धि सिद्धि लाभ शुभ सहिताय आवाह्यामि ।।
आवाह्यामि पूजार्थ रक्षार्थ च मम क्रतोः ।
इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे ।।

(बांयी ओर की दो लकीरों में रिद्धि एवं लाभ, दाहिनी ओर की दो लकीरों में शुभ व बुद्धि का आवाहन करें। बीच की चार बिन्दुओं में अग्नि कोण में

शिव, वायव्य मे दुर्गा, नैऋत्य में सूर्य, ईशान में विष्णु का आवाहन करें)

(*नोट* :— षोडशोपचार के वैदिक व पौराणिक दोनों मंत्र दिये है। सभी मंत्र पढ़ना अनिवार्य नहीं है, किसी एक मंत्र से सभी पूजा करा सकते है।)

आसनम् -

ॐ वर्स्मोऽस्मि समानानामुद्यता मिव सूर्यः ।
इमन्तमभितिष्ठामि यो माकश्चाभि दासति ॥
ॐ पुरुष एवेदः ठसर्वयद्भूतं यच्चभावव्यम् ।
उतामृतत्वस्येशानो यदन्ने नातिरोहति ॥
विचित्र रत्न खचितं दिव्यास्तरण संयुक्तम् ।
स्वर्ण सिंहासनं चारु गृहाण गुहाग्रजः ॥
ॐ सिद्धि बुद्धि सहित श्री महागणपतये आसनं समर्पयामि॥

पाद्यम् -

ॐ एतावानस्य महिमातो ज्यायाँश्चपुरुषः ।
पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥
उष्णोदकं निर्मलं च सर्वसौगन्ध संयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगह्यताम् ॥ पाद्यं स.॥

अर्घ्यम् -

ॐ त्रिपादूर्द्ध उदैत पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विस्वङ व्यक्रामत् साशनानशनेऽअभि ॥
गणाध्यक्ष नमस्तेस्तु गृहाण करुणाकर ।
अर्घ्यं च फल संयुक्तं गंधमाल्याक्षतैर्युतम्।।अर्घ्यम् स. ॥

आचमनीयम् -

ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके ।
कर्पूर वासितं तोयं मंदाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मयादत्तं प्रयत्नतः ॥ आच. स.॥

स्नानम् -

तस्माद् यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।

पशूंस्ताश्चक्रे वायव्यान् आरण्यान् ग्राम्यांश्च ये ।।
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितास्तथा ।
आवाहिता मया तुभ्यं कुरु स्नानं गणेश्वर ।।

पयः स्नानं -

ॐ पयसो रूपं यद्यवाद्दध्नो रूपङ्कर्कन्धूनि ।
सोमस्य रूपं वाजिनः सौम्यस्यरूप मामिक्षा ।।
ॐ पयः पृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षे पयोधा।
पयस्वतिः प्रदिशः सन्तु मह्ययम् ।।
कामधेनु समुद्भूतं सर्वेषां जीवनं परम् ।
तेजः पुष्टिकरं दिव्यं स्नानार्थ प्रति गृह्यताम् ।।

फिर शुद्धोदक स्नान कराकर, पुनः आचमन करायें।

दधिस्नानम् -

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभिर्नो मुखा करत्प्रण आयु ठं षितारिषत ।।
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मयोदेव स्नानर्थं प्रतिगृह्यताम् ।।

पुनः शुद्धोदक स्नान एवं आचमन

घृत स्नान -

ॐ घृतेनांजन्तसम्पथो देवयानान्प्रजान्वाज्यप्येतुदेवान ।
अनुत्वासप्ते प्रदिशः सचन्ता ठं स्वधा मस्मै यजमानाय धेहि।।१।।
ॐ घृतं घृतपावनः पिबतवसां वसापावानः पिबतांतरिक्ष हविरसि
स्वाहाः ।। दिशः प्रदिश आदिशो विदिशउद्दिशो दिग्भ्यः स्वाहाः।।२।।
नवनीतं समुत्पन्नं सर्व संतोषकारक ।
घृतं तुभ्यं प्रदस्यामि स्नानार्थं प्रतिगृह्यताम् ।।३।।

(पुनः शुद्धोदक स्नान एवं आचमन करायें)

मधुस्नानं -

ॐ स्वाहा मरुद्भिः परिश्रीयस्व दिव

स ठ स्पृशस्पाहि मधु मधु मधु ।१॥
ॐ मधुवाता ऋतायते मधुक्षरन्ति सिंधवः ।
माध्वीर्नः संत्वोषधीः मधुनक्त मुतोष सो मधु
मत्पार्थिव ठ रजः मधु द्यौरस्तुनः पिता ॥२॥
ॐ मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥३॥
पुष्परेणुसमुद्भूतं सुस्वादु मधुर मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥४॥

(पुनः शुद्धोदक स्नान एवं आचमन करायें)

शर्करा स्नानं -

ॐ अपां ठ रसमुद्वय सः ठ सूर्येसन्तः ठ समाहितम् ।
अपां ठ रसस्य यो रसस्तं वो गृहणाम्युत्तम मुपयाम ।
गृहीतोसीन्द्राय त्वा जुष्टं गृहाणाम्येषते ।
योनिरिन्द्राय त्वा जुष्टत्तमम् ।१॥
इक्षुसारसमुद्भूतं शर्करा पुष्टिदा शुभा ।
मलापहारिका दिव्या स्नानर्थं प्रतिगृहताम् ॥२॥

(शुद्धोदक स्नानं समर्पयामि । शद्धोदक स्नानान्ते आचनीयं सम.)

गंधोदक स्नानः -

ॐ गंधर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै ।
यजमानस्य — परिधि — रस्यग्निरिड ऽ ईडितः ।१॥
चम्पकाशोक — वकुलं — मालती मोगरादिभि ।
वासितं स्निग्धता हेतु चारु प्रतिगृह्यताम् ॥२॥

(गंधोदक स्नानान्ते शुद्धोदक स्नानं समर्पयामि । शुद्धो. स्ना.आचनीयं सम.)

कुशोदक स्नानम् -

ॐ शरासः कुशरासो दर्भासः सैर्याउत ।
मोंजाअदृष्टा वैरिणा सर्वेसाकं न्यलिप्सत ॥

उद्वर्तन स्नानम् -

ॐ अ ठं शुनाते अ ठं शुः पृच्यतां पुरुषा परुः ।
गंधस्ते सोममवतु मदाय रसो ऽ अच्युतः ।।

पुनः शुद्धोदक स्नानं समर्पयामि । शद्धोदक स्नान्ते आचनीयं सम.

ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः ।
श्येतः श्येताक्षो रुणस्ते रुद्राय पशुपतये
कर्णायामा ऽ अवलिप्ता रौद्रा नभो रूपाः पार्जन्याः ।।

अभिषेक -

गणपति अथर्वशीर्ष से करायें या गणपतिध्यान मंत्रो से अथवा गणपति द्वादश मंत्रावलि से करायें। पृष्ठ ५३० पर अवलोकन करें।

शुद्धोदक स्नानं समर्पयामि ।शद्धोदक स्नान्ते आचनीयं सम.

वस्त्रम् (उपवस्त्र) -

ॐ युवा सुवासाः परिवीत आगात्स उश्रेयान् भवति जायमानः।
तं धीरा सः कवयऽउन्नयंति स्वाध्यो मनसा देवयंतः ।१।।

यज्ञोपवीतं -

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।।
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीत मयादत्तं गृहाण परमेश्वर ।।

(ॐ भू भुर्वः स्वः सिद्धि बुद्धि सहिताय महागणाधिपतये यज्ञो. स.)

देव देव नमस्तुभ्यं त्रायस्व भवसागरात् ।
ब्रह्मसूत्र मयादत्तं गृहाण परमेश्वर ।।

यज्ञोपवितान्ते आचमनीयम् समर्पयामि

उपवस्त्र (पट्टवस्त्र) -

वसो पवित्रमसि शतधारं वसो पवित्रमसि
सहस्त्रधारं देवस्त्वा सविता पुनातु वसोः
पवित्रेण शतधारेण सुप्वा कामधुक्ष्वः ।

गंधम् -

ॐ त्वां गंधर्वा अखनं स्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमोराजा विद्वान् यक्ष्मादमुच्यत ।।१।।
श्रीखण्डं चंदनं दिव्यं गंधाढ्य सुमनोरहम् ।
विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम् ।।२।।

अक्षताः -

ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत
स्वभानवो विप्रान विष्ठयामती योजान्विन्द्रते हरी ।।१।।
अक्षताधवलाशुभ्राः कुंकुमेन विराजिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।२।।

सिन्दूर -

ॐ मध्याह्न चण्डार्क मरीचि सन्निभम् ।
विघ्नेश्वर श्रीहनुमद बहुप्रियम् । भो सिन्धु पुत्र्या
सह नंदनात्मज सिन्दूरचूर्णं परिगृह्यतां विभो ।।

पुष्प -

ॐ औषधीः प्रतिमोद्ध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव साजित्वरी र्वीरुधः पारयिष्णवः ।।
पत्रं पुष्पं फलं तोयं रत्नानि विविधानि च ।
गृहाणार्घं मयादत्तं देहि मे वांछित फलम् ।।

सुगन्धितद्रव्य -

ॐ अ ठं शुनाते अ ठं शुःपृच्यताम्परुषापरुः ।
गंधस्ते सोममवतु मदाय रसो अच्युतः ।।
ॐ त्र्यंबकं यजामहे सुगंधिम् पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ।।

(पुनः आचमनम् समर्पामि)

अबीर गुलाल -

ॐ अहिरिव भौगैः पर्य्येति बाहुञ्ज्यायाहेतिं परिबाधमानः ।

हस्तघ्नो विश्वावयुनानि विद्धान् पुमान् पुमा ठ संपरिपातु विश्वत:।।

धूपं -

ॐ अश्वस्यत्वा वृष्ण: शक्ना धूपयामि देवयजने पृथिव्या:।
मखायत्वा मखस्य त्वा शीर्ष्णे ।।१।।
ॐ धूरसि धूर्वंधूर्वन्तं धूर्वं तं योऽस्मान् धूर्वति तं धूर्वयं वयंधूर्वाम: ।
देवानामसि वह्नितम ठसस्नितमं प्रप्रित मज्जुष्टतमं देवहूतमम्।।२।।
वनस्पति — रसोद्भूतो गंधाढ्य: सुमनोहर: ।
आघ्रेय: सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।। धूपं घ्रापयामि ।।

दीपं -

ॐ दिवे दिवे सदृशी रन्यमर्ध्यंकृष्णा असेदधपसद्म नोजा ।
अहं दासा वृषभो वस्नपयं तोदव्रजे वर्चिनं शं वरं च ।।

दूर्वांकुर समर्पण -

ॐ काण्डात्काण्डात् प्ररोहन्ती परुष: परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ।।१।।
दूर्वे ह्यमृत संपन्ने शतमूले शतांकुरे ।
शत — पातक — संहन्त्री शतमायुष्य वार्धिनी ।।२।।
विष्णवादि सर्वदेवानां दूर्वे त्वं प्रीतिदासदा ।
क्षीरसागरसम्भूते वंशवृद्धिकरी भव ।।३।।

नेवैद्यम् -

ॐ अन्नपते ऽन्नस्य नो देह्यनमीवस्य शुष्मिण: ।
प्रप्रदातारं तारिष ऊर्जनो धेहि द्विपदे चतुष्पदे ।।१।।
ॐ नाभ्या आसीदन्तरिक्ष ठ शीर्ष्णो द्यौ: समवर्त्तत ।
पद्भयां भूमिर्दिश: श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।।२।।
अन्नं चतुर्विधं स्वादु रसै: समन्तिवतम् ।
नैवेद्यं गृह्यता देव: भक्ति मे ह्यचलां कुरु ।।३।। नै. स.

आचमनीयम्-

ॐ इममे वरूण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके ॥
शीतलं निर्मल तोयं कर्पूरेण सुवासितम् ।
आचम्यतां सुर श्रेष्ठ मयादत्तं च भक्तितः॥ आ. स.

(पुनः नैवेद्यं पुनराचमनीयं समर्पयामि नमः)

ॐ यत्पुरुषेण हविषा देवा यज्ञ मतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्मइध्मः शरद्धविः ॥

करोद्वर्तनम्-

करोद्वर्तनकं देवः सुगन्धैः परिवासितै ।
ईप्सितं मे वरं देहि परत्र च पराङ्गतिम् ॥

(करोद्वर्तनार्थे सुगंधि जलम् समर्पयामि)

हस्त प्रक्षालनम् -

गंधतोयं समानीतं सुवर्ण कलशे स्थितम् ।
हस्तप्रक्षालनार्थाय पानीयं ते निवेदये ॥

ऋतु फलम् -

द्राक्षाखर्जूर कदली पनसाम्र कपित्थकम् ।
नारिकेलेक्षु जंबुवादि फलानि प्रतिगृह्यताम् ॥

मुखवासार्थे ताम्बुलं -

ॐ उतस्मादस्यद् द्रव तस्तुरण्यतः पर्णन्नवेरनुवाति प्रगर्द्धिनः ।
श्येनस्येवद्ध्रजतोऽअङ्कसंपरि दधिक्राव्णः सहोर्जातरित्रः स्वाहा ॥

पूगीफलम् -

ॐ याः फलिनिर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पति प्रसूतास्तानो मुञ्चंत्व ठ हसः ॥२॥

दक्षिणा -

ॐ यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः ।
तदग्नि वैश्वकर्मणः स्वर्द्देवेषु नोदधत् ॥१॥
ॐ हिरण्य गर्भ गर्भस्थं हिरण्यबीज विभवसो ।

अनंतपुण्य: फलद: सुख शांतिं प्रयच्छ मे ।।२।।
ॐ हिरण्य गर्भ: समवर्तताग्रे भूतस्य जात: पतिरेकआसीत्।
सदाधार पृथिवीन्द्यामुतेमां कस्मैदेवाय हविषा विधेम ।।३।।

आरती -

ॐ आरात्रि पार्थिव ठ रज: पितुरप्रायिधामभि: ।
दिव: सदा ठ सिबृहतीवितिष्ठ सऽआत्वेषंवर्त्ततेतम: ।।१।।
ॐ इदᳬहवि: प्रजननमे अस्तु दशवीर ठसर्वगणठस्वस्तये।
आत्मसनि प्रजासनि पशुसनि लोकसन्य भयसनि ।
अग्नि: प्रजां बहुलां मेकरोत्वन्न पयोरेतो अस्मासुधत्त: ।।२।।
चन्द्रादित्यौ च धरणी विद्युदग्नि स्तथैव च ।
त्वमेव सर्व ज्योतिषि आर्तिक्यं प्रतिगृहताम् ।।३।।

अर्घम् -

पान पर गंध अक्षत पुष्प जल दक्षिणा ले कर अर्घ देवें ।

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्य रक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात ।।१।।
द्वैमातुर कृपासिन्धो षाण्मातुरग्रज प्रभो ।
वरद त्वं वरं देहि वांछित वांछितर्थद: ।।२।।

पुष्पांजलिम् -

विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुति यज्ञ विभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ।।१।।
भक्तार्तिनाशन पराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय
भक्त प्रसन्न वरदाय नमो नमस्ते ।।२।।

त्वां विघ्न शत्रु दलनेति च सुंदरेति
भक्तप्रियेति सुखदेति फलप्रदेति ।
विद्या प्रदेत्यघ हरेति च ये स्तुवन्ति
तभ्यो गणेश वरदो भव नित्यमेव ॥३॥

नमस्ते ब्रह्मरूपाय विष्णुरूपाय नमः
नमस्ते रुद्र रूपाय करिरूपाय नमः ।
विश्वरूप स्वरूपाय नमः ब्रह्मधारिणे
भक्त प्रियाय देवाय नमस्तुभ्यं विनायक ॥४॥

नमस्ते मूषिकारूढ शुभंकरायवै नमः
नमः कात्यायनी पुत्र लम्बकर्णायवै नमः ।
गजदंत विरूपात्मन विद्याबुद्धिविचक्षणः
देहि मे पुत्रसौभाग्यदेहि मे सुखसंपदः ॥५॥

इच्छासमधिपं देवं वरं विनायकेश्वरम्
शत्रु दुष्टाश्च ये केचिद् दुर्जनांश्चैव ये ऽखिला ।
तेषा दंड हितार्थाय प्रार्थये त्वां गणेश्वरम्
नाशयेत् सर्व विघ्नानि कल्याणं मे प्रदेतसदा ॥६॥

लम्बोदर नमस्तुभ्यं सततं मोदक प्रिय ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥७॥

॥ इति गणपति पूजा विधानम् ॥

वैश्वदेवकर्मः

अविघ्नो मंडपश्चैव मातृणां पूजनंसुकृत। वैश्वदेवं वसोर्द्धारानान्दी श्राद्धमतः परम् । अविघ्नपूजनत्पूर्वं विधाय च ॥

एक पात्र में चावल भरकर फल व दक्षिणा लेकर ब्राह्मण को देवें।

तद्करणे संकल्पः -

इदं वैश्वदेव हवनीय द्रव्यं सदक्षिणाकमत्रावसरे वैश्वदेवाकरण जनित प्रत्यवाय परिहारार्थ करण जनित फल प्राप्त्यर्थम् अमुकशर्मणे ब्रह्मणाय

विष्णुरूपाय तुभ्यमहं संप्रददे ।

अनेन् वैश्वकरण जनित फलसिद्धिरस्तु ।।

षड्विनायकपूजा

गोधूमादिधान्य हरिद्रा रंजित करके षटकोण बनायें (षटकोष्ठक बनावें) फिर उसमें षड्विनायक का आवाहन करें **ॐ मोदाय नमः, ॐ प्रमोदाय नमः, ॐ सुमुखाय नमः, ॐ दुर्मुखाय नमः, ॐ अविघ्नाय नमः, ॐ विघ्नकर्त्रे नमः।**

ॐ भूर्भुवः स्वः मोदादिषड् विनायकाः सुप्रतिष्ठता वरदा भवत। एवं षोडशोपचारैः संपूज्य। अनयापूजया मोदादि षड्विनायकाः प्रीयन्ताम्। (जल छोडें)

अथ गौर्यादि मातृकाणां पूजनम्

अग्किोण में (उत्तराभिमुख पूजन करें तो स्वदक्षिण याने ईशानकोण में) रक्त वस्त्र पर गोधूमाक्षत पुञ्ज से षोडश कोष्ठक बनायें। फिर गणेश गौर्यादि का आवाहन करें।

आवाहन क्रम —अगर मध्य के चार कोष्ठक को एक भाग माने तो शेष १२ खाने उनके चारों और बन जातें है।

मध्य के चार कोष्ठक में वायव्य में गणेश, नैर्ऋत्य में गौरी, अग्नि कोण में पद्मा ईशानमें कुलदेवी का आवाहन करें।

स्वधा	मातरः	लोकमातरः	स्वाहा
देवसेना	कुलदेवी	पद्मा	सावित्री
जया	गणेश	गौरी	विजया
धृतिः पुष्टि	मेघा	शची	तुष्टि

यथा —

कुलदेवीं गणेशं च गौरीं पद्मासमन्विताम् ।
पूजयेन्मध्यमे कोष्ठे शेषा बाह्ये हि कोष्ठके ।।
गणेशं वायुकोणे च मध्यमे च कुलेश्वरीम् ।
गौरीं च नैर्ऋत्ये पूज्या पद्मा पावक कोणके ।।

शची च पश्चिमे स्थाप्या मेधा चैवद्वितीयके ।
सावित्री दक्षिणे पूज्या विजया च द्वितीयके ।।
जया च उत्तरे स्थाप्या देवसेना द्वितीयके ।
स्वाहाऽऽग्नेयां समभ्यर्च्या ईशानां च स्वधा तथा ।।
पूर्वतु मातरः पूज्यास्वदग्रे लोकमातरः ।
धृतिः पुष्टिर्वायुकोणे तुष्टिं च नैर्ॠते तथा ।।
एवं हि मातरः स्थाप्याः स्व स्वस्थाने पृथक् पृथक् ।।

गणपति आवाहन – (मध्य चतुर्कोष्ठे वायव्य कोणे)

ॐ गणानान्त्वाः मंत्रेण । ॐ गणेशाय नमः आवाहयामि स्थापयामि।
भो गणपते इहागच्छ इहतिष्ठ।

गौरी (मध्यचतुर्कोष्ठे नैर्ॠत्यकोणे) –

हिमाद्रितनयां देवीं वरदां भैरव प्रियाम् ।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ।।
ॐ आयंगौः पृश्निरक्रमीद सदन्मातरं पुरः ।
पितरञ्च प्रयन्त्स्वः ।।१।। गौर्यै नमः। गौरीम् आ. स्था।

पद्मा (मध्य चतुष्कोष्ठे अग्निकोणे) –

ॐ हिरण्य रूपा ऽउषसो विरोक ऽउभाविंद्रा ऽउदिथः
सूर्यश्च । आरोहतं वरुण मित्र मित्रगर्तंततश्चक्षाथा
मदितिं दितिं च मित्रोसि वरुणोऽसि ।।
सुवर्णाढ्यां पद्महस्तां विष्णोर्वक्षस्थले स्थिताम् ।
त्रैलोक्ये पूजितां देवीं पद्मामावाहयाम्यहम् ।।२।।

शची (पश्चिमे) –

ॐ कदाचनस्तरीरसिनेन्द्र सश्चसिदाशुषे ।
उपोपेन्नुमघवन्भूयऽइन्नुतेदानं देवस्य पृच्यतआदित्त्येभ्यस्त्वा ।।
उत्पलाक्षीं सुवदनां शचीं (शशि) कुंडल धारिणीम् ।
देवराज प्रियां भद्रां शचीमावाहयाम्यहम् ।।३।।

मेधा (पश्चिम वायव्यतः द्वितीय कोष्ठे)

मेधां मे वरुणो ददातु मेधामग्नि: प्रजापति: ।
मेधामिन्द्रश्च वायुश्च मेधांधाताददातु मे स्वाहा ॥
वैवस्वत प्रफुल्लाभाममलेंदीवर स्थिताम् (सुगंधि पद्मवासिताम्)
बुद्धि प्रसादिनीं सौम्यां मेधामावाहयाम्यहम् ॥४॥

सावित्री : (दक्षिणे - अग्निकोण के नीचे द्वितीय कोष्ठक) -

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियोयोन: प्रचोदयात् ॥
जगत्स्रष्टीं जगद्धात्रीं पत्निं (पक्षि) रूपेण संस्थिताम् ।
ओंकाराक्षीं भगवतीं सावित्री माह्वायाम्यहम् ॥५॥

विजया (दक्षिणे - नैऋत्य से दूसरा कोष्ठक पूर्व की ओर). -

ॐ विज्यंधनु: कपर्दिनो विशल्यो बाणवाँ ३ उत ।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधि: ॥
दैत्यपक्ष — क्षयकरीं देवानां चाभयप्रदाम् ।
गीर्वाण वंदितां देवीं विजयामावाहयाम्यहम् ॥६॥

जया (उत्तरे वायव्य कोण से पूर्व की ओर द्वितीय कोष्ठक) -

ॐ याते रुद्र शिवातनूर घोरा पापकाशिनी
तयानस्तन्वा शंतमया गिरिशंताभि चाकशीहि ॥
विश्वभद्रां जयां रक्तां रक्तांबर धरांसदा (विष्णु रुद्रार्कशक्रादि
गीर्वाणेषुव्यस्थिताम्)त्रैलोक्यवंदितां देवींजयामावाहयाम्यहम् ॥७॥

देवसेना (उत्तरे - वायव्यकोण से पूर्व की ओर तृतीय कोष्ठक)-

ॐ देवानां भद्रा सुमतिर्ऋजूयतां देवाना ठरातिरभिनोनिवर्त्तताम् ।
देवानां ठसख्य मुपसेदिमा व्वयन्देवानऽ आयु: प्रतिरंतु जीवसे ॥
मयूरवाहनारूढां शक्तिखड्ग धनुर्द्धराम् (धनुर्धराम्)
आवाहयेद्देवसेनां तारकासुरमर्दिनीम् ॥८॥

स्वधा (ईशाने) -

ॐ पितृभ्य: स्वधायिभ्य: स्वधा: नम:। पितामहेभ्य: स्वधायिभ्य: स्वधानम:। प्रपितामहेभ्य: स्वधायिभ्य: स्वधानम: । अक्षन्नपितरोऽमीमदंत पितरोतीतृपंतपितर: पितर: शुन्धध्वम् ॥
कव्यमादाय सततं पितृभ्यो या प्रयच्छति
पितृलोकार्चितां देवीं स्वधामावहयाम्याहम् ॥९॥

स्वाहा (अग्निकोणे) –

ॐ स्वाहा यज्ञंमनस: स्वाहोरोरंतरिक्षात्स्वाहा । द्यावा पृथिवीभ्या स्वाहा वातादार भे स्वाहा ॥
हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति ।
वह्निप्रिया तु स्वाहा समगच्छतु मे ऽध्वरे ॥
(स्वर्गे लोचते स्वाहे समागच्छममाध्वरे) ।१०॥

मातर: (पूर्वे, ईशान से द्वितीय कोष्ठक अग्निकोण की ओर)–

ॐ आपोऽअस्मान्मातर: शुंधयंतु घृतेनो घृतप्व: पुनंतु । विश्वर्ठ हिरप्रम्प्रवहंति देवीरुदिदाभ्य: शुचिरापूतऽएमि । दीक्षातपसो—स्तनूरसितान्त्वाशिवा ठंशग्माम्परि दधे भद्रंवर्णं ष्यन् ॥
भूतग्राममिमं कृस्त्नं यया उत्पदितं पुरा (मया प्रीत्यादितं पुरा) ।
त्रैलोक्य पूजितां देवीं मातरं आवाहयाम्यहम् ।१९॥

लोक मातर: (मध्य चतुर्कोष्ठे – ईशाने)

ॐ स्वाहा यज्ञं वरुण: सुक्षत्रो भेषजं करत् । अतिच्छंदा ऽइन्द्रियं वृहदृष भोगौर्वयोदधु: ॥
ॐ भवतन्न: समनसौ सचेत सावरे पसौ । मा यज्ञ ठं हि ठं सिष्टं मा यज्ञपतिं जातवेदसौशिवौभवतमद्यन: ॥
मावाहयेल्लोकमातरं जगत्पालन संस्थिताम् ।
शक्रांद्यैर्वंदिता देवीं स्तोत्रपाठाभिचारकै(देवीं तत्रैत्यैश्च सुरैरपि) ।१२॥

धृति, पुष्टि (दोनों ही वायव्य कोण में) –

यत्प्रज्ञानमुत चेतो धृतिश्च यज्जोति रंतरमृतं प्रजासु ।

यस्मान्नऽऋते किंचन कर्म क्रियते तन्मे मनः शिव संकल्पमस्तु ॥
नमस्तुष्टिकरीं (मनस्तुष्टिकरीं) देवीं लोकानुग्रह कारिणीम् ।
सर्वकाम समृद्ध्यर्थं धृतिमावाहयाम्यहम् ।१३॥

पुष्टि -

ॐ तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणे हवोध्युरुश ठ समाान ऽआयुः प्रमोषीः ॥

ॐ रयिश्चमे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभुच मे प्रभुच मे। पूर्णं च मे पूर्णतरंच मे कुयवंच मे ऽक्षितं च मे ऽन्नं च मे ऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥ प्रणतानां (प्रणता या) हि लोकेऽस्मिन् पुत्र पुष्टि सुख प्रदां। भक्तेभ्यश्चापि वरदां विद्युज्ज्वालार्क कुण्डला। (पुष्टिमावहयाम्यहम्) ।१४॥

तुष्टि (नैर्ऋत्यकोणे बाह्य कोष्ठे) -

ॐ बृहस्पते परीदिया रथेन रक्षोहा मित्राँ २ अपबाधमानः ।
प्रभंजन्त्सेनाः प्रमृणो युधाजयन्नस्माकमेध्यविता रथानाम् ॥
त्वष्टा तुरीपोऽअद्भुत ऽइन्द्राणी (ग्नी) पुष्टि वर्द्धना ।
द्विपदाच्छंद इन्द्रिय मुक्षागौर्नवयोदधुः ॥
आवाहयामि तां तुष्टिं सर्वलोकेषु पूर्णताम्। संतोष भवनादीनां
रक्षणाायाध्वरे (रक्षणीयेऽध्वरे) मम ।१५॥

आत्मकुलदेवताः (मध्यकोष्ठे ईशान कोणे) -

प्राणाय स्वाहा, ऽपानाय स्वाहा, व्यानायस्वाहा चक्षुषेस्वाहा, श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ अम्बे ऽ अम्बिकेऽम्बालिके नमानयति कश्चन । ससस्त्य श्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

त्वमात्मादिहितां (त्वमात्मा देहिना) देवी सर्वकाम फलप्रदाम् । वंश रक्षा करी गोत्री (कर्त्री) देवीमावाहयाम्ययहम् (आगच्छागच्छ मेऽध्वरे)॥

[illegible]ः अक्षत पुष्प हाथ में लेकर) -

गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा

स्वाहा मातरो लोकमातरः ।। धृति पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः । गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चषौडश ।।

ततस्तासांप्रतिष्ठं कुर्यात् –

ॐ तदस्तु मित्रा वरुणा तदग्नेशंयोरस्मभ्यमिदमस्तु शस्तम् । अशी महिगाधमुत प्रतिष्ठान्नमो दिवे वृहतेसादनाय ।।१।।

मनोजूतिर्जुषतामाज्यस्य बृहस्पति र्यज्ञमिमंतनोत्वरिष्टं यज्ञ ठं समिमंदधातु । विश्वेदेवा स ऽइहमादयंतामों ३ प्रतिष्ठ ।।२।।

एषव प्रतिष्ठा नामयज्ञो यत्रैतेन यज्ञेन यन्ते सर्वमेव प्रतिष्ठितंभवति ।।३।।

साधारणतः नवदुर्गा, सप्तमातरः, अन्य मातृकाओं का पुजन इस मंडल पर करा देते हैं। या प्रधान मंडल पर कराते हैं –

यथा – ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही चतथेंद्राणी चामुण्डा सप्तमातरः।। प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी। तृतीयं चन्द्रघंटेति कूष्माण्डेति चतुर्थकम् ।। पंचमं स्कंदमातेति षष्ठं कात्यायनीति च। सप्तमं कालरात्रिति महागौरीति चाष्टमम्।। नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः।

ॐ जयन्ती मंगला काली भद्रकाली कपालिनी ।
दुर्गाक्षमा शिवाधात्री स्वधा स्वाहा नमोस्तुते ।।

(अगर योगिनी क्षेत्रपाल का अन्य मंडल नहीं बनाया हो तो इसी मंडल पर आवाहन कर देना चाहिये।)

सर्वेषां मातृकेभ्यो मंडल दैव्यानां गंधादिभिः संपूज्य। पुष्पाञ्जली मादाय एवं सनारीकेल दक्षिणा सहिताय समर्पण कुर्यात् ।

पत्रं पुष्पं फलं तोयं रत्नानि विविधानि च ।
गृहाणार्घ्यं मया दत्तं देहि मे वांछित फलम् ।।
रूपं देहि जयं देहि भाग्यं भगवति देहि मे ।
पुत्रान देहि, धनं देहि सर्वान् कामान् प्रयच्छ मे ।।

सप्तघृत मातृका पूजनं (वसोर्द्धारा)

किसी पट्ट, शिला या दीवार पर सिन्दूर से बिंदिया नीचे से ऊपर की ओर ७,६,५,४,३,२,१ संख्या में बनावें उनके ऊपर १,१,१ क्रम से स्तूप बनावें (स्तूप में चार बिन्दु अगल—बगल में ३,३) बनावें इन मातृकाओं की बांयी-ओर गणेश, गौत्र (नीचे ३ फिर २,१,१) तथा दाहिनी ओर कालाभैरव मन्दिर या नीचे ३ फिर २,१,१ आकृति बनावें । कुल ५२ बिन्दु होते है।

घृत देने का मंत्र -

ॐ वसो: पवित्रमसि शतधारं वसो: पवित्रमसि सहस्त्र धारम् । देवस्त्वा सविता पुनातु वसो: पवित्रेण शतधरेण सुप्वा कामधुक्ष: ।।

तत्पश्चात् सातों बिन्दुओं को गुड से एकीकृत करें, कुंकुमादि से अलंकारित करें। हाथ में अक्षत लेकर एक—एक देवी की प्रतिष्ठा करें।

कीर्ति लक्ष्मी र्धृतिर्मेधा सिद्धि: प्रज्ञा सरस्वती । मांगल्येषु प्रपूज्यन्ते सप्तैता: घृतमार:। अन्यच्च: श्रीश्च लक्ष्मीघृति मेधा स्वाहा प्रज्ञा सरस्वती। मांगल्येषु प्रयूज्यन्ते.....। मतांतरे — श्रीश्च लक्ष्मी धृतिर्मेघा पुष्टि श्रद्धा सरस्वती। मांगल्येषु.....।

श्रीप्रतिष्ठापनम् -

ॐ मनस: काममाकूतिं वाच: सत्यमशीय पशूना ठं रूपमन्नस्य रसोयश: श्री: श्रयतां मयि स्वाहा ।।१।।

("मयि" पदभेदेन — रुपमन्नस्य मयि श्री श्रयतांयश:)

ॐ भूर्भुव: स्व श्रियै नम: श्रियम् आवाह्यामि स्थापयामि।

लक्ष्मीप्रतिष्ठापनम् -

ॐ श्रीश्चते लक्ष्मीश्चपत्क्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण।।२।।

ॐ भूर्भुव: स्व: लक्ष्मै नम: । लक्ष्मीम् आवाह्यामि स्थापयामि।

धृतिप्रतिष्ठापनम् -

ॐ भद्रंकर्णेभि: श्रृणुयामदेवा भद्रं पश्येमाक्षभिर्यजत्रा: । स्थिरैरंगैस्तुष्टुवा ठं सस्तनूभिर्व्यशेमहि देवहितं यदायु: ।।३।।

ॐ भूर्भुव: स्व: धृत्यैनम:। धृतिमावहयामि स्थपयामि।

मेधाप्रतिष्ठापनम् –

ॐ मेधाम्मे वरुणो ददातु मेधामग्नि: प्रजापति ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ।।४।।

ॐ भूर्भुव: स्व: मेधायै नम: । मेधाम् आवाह्यामि स्थापयामि ।

स्वाहाप्रतिष्ठापनम् –

ॐ प्राणय स्वाहा: ऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा मनसे स्वाहा ।।५।।

ॐ भूर्भुव: स्व: स्वाहाये नम: । स्वाहाम् आवाह्यामि स्थापयामि।

प्रज्ञाप्रतिष्ठापनम् –

ॐ आयंगौ पृश्निर क्रमीद सदन्मान्तरम्पुर:। पितरंचप्रयन्तस्व: ।।

ॐ भूर्भुव: स्व: प्रज्ञायै नम: प्रज्ञाम् आवाह्यामि स्थापयामि ।।५।।

सरस्वतीप्रतिष्ठापनम् –

ॐ पावकान: सरस्वतीवाजेमि र्वाजनीवति। यज्ञवष्टुधियावसु: ।।

ॐ भूर्भुव: स्व: सरस्वतै नम: । सरस्वतीम् आवाह्यामि स्थापयामि।

सामूहिक रूप से चावल चढाते हुये **निम्न मंत्रों से प्रतिष्ठा करें। –**

ॐ मनोजुतिर्जुषतामाज्यस्येती मनसावाऽइद ठ सर्वमाप्त तन्मनसेवैतत्सर्वमाप्नोति बृहस्पतिर्यामिमन्तो त्वरिष्टं यज्ञ ठ समीमंद घातृवीतीयद्विवृढंऽतत्संदधाती विश्वेदेवा सऽइहमादयंता मिति सर्वं वैविश्वेदेवा: सर्वेणैवै तत्संदधाति सयदि कामेयत्ब्रुयात्ब्रुयु: प्रतिष्ठेति। एषवै प्रतिष्ठा नाम यज्ञो यत्रैतेने यज्ञेनयजन्ते सर्वमेव प्रतिष्ठतं भवति।।

गणेश गौत्र प्रतिष्ठापनम् –

ॐ भूर्भुव: स्व: गणेश गौत्र देवेभ्यो आवाह्यामि स्थापयामि।

भैरव प्रतिष्ठापनम् – वसोर्द्धारा के दाहिनी ओर **बं बटुकाय नम:। काल भैरवाय नम:। गौर भैरवाय नम:।** से प्रतिष्ठापन करें।

तत्पश्चात् सर्वेभ्यो देवेभ्यो गंधादिभिः पूजयेत्।

अथ नान्दीश्राद्धम्

नान्दीश्राद्ध में कुछ बातें ध्यान रखने योग्य है –

१. इस श्राद्ध से स्वधा की जगह **"स्वाहा"** कर उच्चारण करें।

२. मूल रहित दर्भा ग्रहण करें।

३. सारे कर्म सव्य (दक्षिण यज्ञोपवित) से करना चाहिये।

४. नान्दी श्राद्ध पूजन समय यजमान अकेला पूजन करें पत्नि को दूर बिठायें।

५. ब्राह्मण, कुशा दर्भ दूर्वा प्रत्येक वस्तु युग्म हो।

६. इस कार्य मे यजमान उत्तराभिममुख हो तो ब्राह्मण पूर्वाभिमुख होवे। यजमान पूर्वाभिमुख हो तो ब्राह्मण उत्तराभिमुख बैठे।

७. इस श्राद्ध में पिण्डों के विषय में दही, मधु, दाख, आँवला, बेर, (मतांतर मे आम्रफल) काम में लिये जाते है।

८. लाल पुष्प माला काम में नहीं आती, मालती, कमल, केतकी, मल्लिका ग्राह्य है।

९. तिल व पितृतीर्थ जल काम में नहीं लिया जाता है। अपसव्य नहीं होता।

१०. श्राद्ध का अंगरूप तर्पण भी नहीं होता है।

११. नांदीश्राद्ध में पिता, दादा और षडदादा (प्रपितामह), माता, नाना, पडनाना, षडनाना (वृद्धप्रमातामह), का स्मरण कर उन्हें श्रद्धांजलि दी जाती है, जो जीवित हो उनका नाम नहीं बोलते है।

१२. कर्पूर से आरती नहीं होती है।

१३. सर्वत्र उच्चारण विषय में नाम व गौत्र का उच्चारण नहीं होता, गौत्र की जगह **"काश्यप गौत्र"** नाम की जगह **"नारायण"** नाम का उच्चारण किया जाता है।

१४. प्रथमा विभक्ति को लगाकर अन्त में संकल्प किया जाता है।

१५. वर का द्वितीय विवाह होतो नांदिश्राद्ध वर स्वयं करे पिता नहीं करे।

१६. अष्टकादिश्राद्ध में नांदिश्राद्ध नहीं होता है।

१७. विधवा नांदीश्राद्ध संकल्प करे कर्म अन्य से या ब्राह्मणों से कराये।

१८. गौरी एवं मातृका पूजन का नांदीश्राद्ध अंग समझना इसके बिना मातृका पूजन यथेष्ट नहीं

१९. वोपदेव, कालदर्श, श्राद्ध कौमुदी, मत्स्यपुराण के अनुसार पुन्सवन, सीमान्त, व्रतनामकरण, अन्नप्राशन, चौल, उपनयन, आधान, अग्न्याधान, विवाह, यज्ञ, पुत्रजन्म, गृहप्रवेश, प्रतिष्ठा, पुत्र का प्रथममुख दर्शन, आश्रम स्वीकार राज्याभिषेक, स्त्री के प्रथम रजोदर्शन पर, वृक्ष, जल एवं देवप्रतिष्ठा में तीर्थ यात्रा और वृषोत्सर्ग में नान्दीश्राद्ध वृद्धिश्राद्ध करना कहा है, परन्तु कामधेनु में कहा है कि जलाशय व माता पिता के वृषोत्सर्ग में नान्दीश्राद्ध नहीं करना चाहिये।

अथ नान्दीश्राद्ध प्रयोग

यदि यजमान पूर्वाभिमुख हो तो दक्षिण जानु दबाकर पात्र दूने या पात्र में उत्तरमुख वाले दोब के युग्म चट स्थापित करें। वैश्वदेव के स्थान पर २ चटें व २ सुपारी। २ सुपारीयाँ व चटे २ सपत्निक पितृपार्वण के स्थान पर। २ सुपारीयाँ व २ चटे सपत्निक मातामह पार्वण के स्थान पर रखें।

क्षणदानं कुर्यात् -

(१) यव हाथ में लेकर निम्न मंत्र से विश्वेदेवा पर छोड़ें।

ॐ सत्यवसु संज्ञकानां विश्वेषां देवानां नान्दीमुखानाम् अद्य कर्तव्य प्रधान संकल्पोक्तकर्माङ्ग सांकल्पिक नान्दी श्राद्धे भवद्भ्यां क्षणः क्रियताम्।

यजमान ब्राह्मणों से कहें — **प्राप्नुतां भवन्तौ।**

ब्राह्मण प्रतिवचन कहें — **प्राप्नवाव**

(२) पुनः यव हाथ में लेवें — (गौत्राः)

गोत्राणां नान्दीमुखानां पितृ पितामह प्रपितामह प्रपितामहनां सपत्निकानाम् अद्य कर्तव्य प्रधान संकल्पोक्त कर्मांगसांकल्पित नान्दीश्राद्धे भवद्भ्यां क्षणः क्रियताम् (ऐसा कहकर यव छोडें)

यजमान ब्राह्मणों से कहें — **प्राप्नुतां भवन्तौ।**

ब्राह्मण प्रतिवचन कहें — **प्राप्नवाव**

(३) पुनः यव हाथ में लेवें —

द्वितीय गोत्राः

द्वितीय गोत्राणां नान्दीमुखानां मातामह प्रमातामह वृद्धप्रमातामहानां सपत्निकानाम् अद्य कर्तव्य प्रधान संकल्पोक्त कर्मांग

सांकल्पिक नान्दीश्राद्धे भवद्भ्यांक्षण: क्रियताम् ।

ऐसा कहकर यव छोडें ।

यजमान ब्राह्मणों से कहें — **प्राप्नुतां भवन्तौ।**

ब्राह्मण प्रतिवचन कहें — **प्राप्नवाव**

पाद्यदानम् -

एक तामड़ी या सुराई में दही, रोली, जौ, दूध, मधु व जल इकट्ठा करें तथा जल को दर्भा से हिलाते रहें, फिर जब **स्वाहानामयं च वृद्धि:** बोलें तब दूर्वांकुर या दर्भा के मोटक से जल चटों पर छोड़ते जायें।

(१) ॐ सत्यवसुसंज्ञका: विश्वेदेवा नान्दीमुखा: ॐ भर्भुव: स्व: इदं व: पाद्यं स्वाहानामयं च वृद्धि:।

गोत्रा: -

(२) ॐ मातृ पितामही प्रपितामह्य: नान्दीमुखा: ॐ भूर्भुव: स्व: इदं व: पाद्यं पादवनेजनं पादप्रक्षालनं स्वाहानामयं च वृद्धि । ॐ पितृपितामह प्रपितामहा: नांदीमुखा ॐ भूर्भुव: स्व: इदं व: पाद्यं पादवनेजनं पादप्रक्षालनं स्वाहानामयं च वृद्धि ।

द्वितीय गोत्रा: -

(३) ॐ मातामह प्रमातामह वृद्धप्रमातामहा: सपत्नीका: नांदीमुखा: ॐ भूर्भुव: स्व: इदं व: पाद्यं पादवनेजनं पादप्रक्षालनं स्वाहानामयं च वृद्धि ॥

रक्षाविधानम् — पहले पाद्य पात्र को हटालें तथा दूसरे कर्मपात्र की स्थापना करें। संकल्प इसी कर्म पात्र के जल से करें। कर्मपात्र में दूर्वा कुशादि धरें और **"शन्नोदेवी"** मंत्र से जल भरें। **"स्वस्ति न इन्द्रो"** इस मंत्र से यवाक्षत द्वारा रक्षा विधान करे।

यवप्रक्षेप -

यवोसि यव यास्मद् द्वेषोयव यारातीदिवे त्वान्तरिक्षायत्वा पृथिव्यै त्वाशुन्धंताँलोका: पितृसदना: पितृसदनमसि ।

संकल्प -

अद्य पूर्वोच्चारित शुभपुण्यतिथौ साङ्कल्पितविधिना नान्दीश्राद्धंकरिष्ये।

आसन दानम् –

(१) ॐ सत्य वसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भर्भुवः स्वः इमे आसने वो नमोनमः नान्दी श्राद्धे क्षणौ क्रियेतां।

पूर्व की ओर मुंह करके यजमान कहें **प्राप्नुवन्तोभवतः**। ब्राह्मण कहें **प्राप्नुवामः** ऐसा कह कर चट के नीचे डाब (दर्भा) या पुष्प का आसन दें। इसी तरह दानों गोत्रों को आसन देवें।

गोत्राः –

(२) नान्दीमुखाः पितृ पितामह प्रपितामह प्रपितामहाः सपत्निकाः इदं वः आसनं स्वाहानामयं च वृद्धिः ।

द्वितीय गोत्राः –

(३) नान्दीमुखाः मातामह प्रमातामह वृद्धप्रमातामहाः सपत्निकाः इदं व आसनम् स्वाहानामयं च वृद्धिः ।

एवं चन्दन पुण्य छोड़ें, दधिक्राव्णो मंत्र से दही डाले।

फिर यवाक्षत लेकर **"स्वस्तिनऽ इन्द्रो"** से पूर्वादि दिशाओं में दिग्बंधन करे।

गंधादिदानम् –

गंधदान में गंध चन्दन धूप अगरबत्ति, धूप(लगावे) ताम्बूल, पूगीफलं, वस्त्र, यज्ञोपवीत चटों पर चढ़ावे। निम्न मंत्र से पित्रों को दो-दो बार गंधादि दान करें –

यवोसि सोम देवत्यो गोवसे देवनिर्मितः। प्रत्नवद्भिः पत्तः पुष्ट्या नान्दीमुखान् पितृनिमाँल्लोकान् प्रीणया हि नः स्वाहा न मम।

(१) ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भू र्भुवः स्वः इदं गंधाद्यर्चन यथा विभागं स्वाहा संपद्यतां च वृद्धिः।

(2) गोत्राः –

नान्दीमुखाः पितृ पितामह प्रपितामहाः सपत्नीकाः इदं वो गन्धाद्यार्चनं यथाविभागं स्वाहा सम्पद्यतां च वृद्धिः ।

(३) द्वितीय गोत्राः

नान्दीमुखाः मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः इदंवो गन्धाद्यार्चनं यथाविभागं स्वाहा सम्पद्यतां च वृद्धिः ।

(४) *गणेशाम्बिकयोः* **ॐ भूर्भुवः स्वः वः इदं आसन गंधाद्युपचार**

कल्पनं स्वाहानामयं च वृद्धिः।

दीपकं – ज्योतिः सूर्योज्योतिः दीपकं ज्योतिः – दीपकं दर्शयामि स्वाहा नामयं च वृद्धिः। पाणिहोम करे तो **अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा** इन दो आहुतियों से करे।

विश्वेदवाओं व पित्रों को साग्नि या आग्न्याधानरहित सबशाखा वाले अन्यपाक को अर्पण करे। दाख आंवला आदि चटों पर चढ़ावे।

भोजननिष्क्रयद्रव्यदानम् –

यजमान दो ब्राह्मणो से कहें कि आप हमारे घर पर यथारुचि तृप्त होकर भोजन करें।

ब्राह्मण कहें कि भोजन हुआ। भोजन दक्षिणा के साथ द्राक्षा आंवला भी देवे।

(१) ॐ सत्यवसु संज्ञकाः विश्वेदेवा नान्दीमुखाः युग्म ब्राह्मण भोजन पर्याप्तां निष्क्रयीभूतं किञ्चित् हिरण्यं दत्तम् अमृतरूपेण वः स्वाहानामयं च वृद्धिः।

(2) *गोत्रा* -

नान्दीमुखाः पितृ पितामह प्रपितामहाः सपत्नीकाः युग्म ब्राह्मण भोजन पर्याप्तां निष्क्रयी भूतं किञ्चित हिरण्यं दत्तम् अमृतरूपेण वः स्वाहानामयं च वृद्धिः।

(२) *द्वितिय गोत्राः*

नान्दीमुखाः मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः युग्म ब्राह्मण भोजन पर्याप्तां निष्क्रयीभूतं किंचत् हिरण्यदत्तम् अमृतरूपेण इदं वः स्वाहा सम्पद्यतां च वृद्धि ।

(३) श्री गणेशाम्बिकयोः ॐ भू र्भुवः स्वः इदं वः युग्म ब्राह्मण भोजनं पर्याप्तां निष्क्रयीभूतं किञ्चित् हिरण्यं दत्तम् अमृतरूपेण वः स्वाहानामयं च वृद्धिः।

इत्यष्ट ऋचः पठेत् -

(इस ऋचाओं को पढ़ सकें तो ठीक अन्यथा आगे का क्रम करें)

ॐ उपास्मैगायतानरः पवमानयोदेवे। अभिदेवाँ इयक्षते ।।१।।

येत्वाहिहत्येमघवन्नुवर्द्धन्येशाम्बरेहवोयेगविष्टौ । ये त्वानून मनुमदन्ति विप्राः पिबेन्द्र सोम ठ सगणो मरुद्भिः ।।२।। जनिष्ठा ऽउग्रः सहसे तुरायमन्द्र ओजिष्ठो बहुलाभिमानः । अवर्द्धनिंद्रं मरुतश्चिदत्र माता यद्वीरन्दधनद्धनिष्ठा ।।३।। आतूनऽइन्द्र वृत्र हन्नस्माकमर्द्धमागाहि।

महान्महीभिरुतिभिः ।।४।। त्वमिन्द्र प्रतूर्तिष्वभि विश्वाऽअसिस्पृधः। अशस्ति हाजनिता विश्वतूरसि त्वन्तूर्य। तरुष्यतः ।।५।। अनुतशुष्म–न्तुरयन्तमीयतुः क्षोणी शिशुन्नमातरा । विश्वास्तेस्पृधः श्रथयन्त मन्यवे वृत्रंयदिन्द्र तूर्वसि ।।६।। यज्ञो देवानाम्प्रत्येति सुम्नमादित्या सो भवता मृडयन्त । आवोर्वाची सुमतिर्वावृत्याद ठ होश्चिद्या वरिवोवित्तरासत् ।।७।। अदब्धेभिः सवितः पायुभिष्ट्व ठ शिवे भिरद्य परिपाहिनोगयम् । हिरण्य जिह्वः सुवितायनव्यसे रक्षामाकिर्नो अघशर्ठसऽईशत ।।८।।

सक्षीरयवमुदक दानम् (तत्पश्चात् चटों पर दूध जल पंचामृत चढ़ावें)

(१) ॐ सत्यवसुसंज्ञका विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम् च वृद्धिः ।

(२) (गोत्राः) नान्दीमुखाः पितृपितामह प्रपितामहाः सपत्नीकाः प्रीयन्ताम्।

(३) (द्वितीय गोत्राः) नान्दीमुखाः मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः प्रीयन्ताम् ।

ततो जलं दद्यात् (अंगुठे से ब्रह्मतीर्थ मुद्रा से चटों पर ज़ल चढावें)

ॐ अघोराः पितरः सन्तु। सन्तु अघोराः पितरः (इति जलम्)

ततः पुष्पम् – ॐ सौमनस्यमस्तु (इति पुष्पम्)

ततः यवाः – ॐ अक्षतं चारिष्टं चाऽस्तु (इति यवाः)

बद्धांजलि आशीर्ग्रहणम् –

(यजमान हाथ जोड़कर पितरो से आशीर्वाद ग्रहण करें यजमान वचन माँगता जाये ब्राह्मण प्रतिवचन कहें)

गोत्रं नो वर्धताम्	–	वर्धताम् वो गोत्रम्।
दातारोनऽभिवर्द्धन्ताम्	–	अभिवर्द्धन्ता वो दातारः।
वेदाश्चनोऽभिवर्द्धन्ताम्	–	अभिवर्द्धन्ता वो वेदाः।

सन्ततिनोऽभिवर्द्धन्ताम् — अभिवर्द्धन्ता वःसंतति।
श्रद्धा च नो मा व्यगमत् — माव्यगमद्वः श्रद्धा।
बहुदेयं व नो अस्तु — अस्तु वो बहुदेयम्।
अन्नं च नो बहुभवेत् — भवतु वो बह्वन्नम् ।
अतिथीश्च लभेमहि — अतिथींश्च लभध्वम्।
याचितारश्च नः सन्तु — सन्तु वो या चितारः ।
एता आशिषः सत्याः सन्तु — सन्त्वेताः सत्या आशिषः।

दक्षिणादानम् -

(ब्राह्मणों को द्रव्य दक्षिणा, यव दाख आँवले फल पुष्प दक्षिणा देवें)

(१) ॐ सन्तु वसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः कृतस्य नांदीश्राद्धस्य फल प्रतिष्ठासिद्ध्यर्थं द्राक्षमलकयव मूल निष्क्रयीयभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः।

(2) गोत्रेभ्य -

नान्दीमुखेभ्यः पितृपितामह प्रपितामहेभ्य सपत्नीकेभ्यः कृतस्य नान्दीश्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थं द्राक्षामलकयव मूल निष्क्रयीयभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः।

(3) द्वितीय गोत्रेभ्यः -

नान्दीमुखेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः नान्दीश्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थं द्राक्षामलकयव मूल निष्क्रयीयभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः।

अर्घ्य -

फिर चट के आगे अर्ध्य दान करते हुये इन दो मंत्रों को पढ़ें।

ॐ उपास्मैगायतानरः पवमानायेन्देवे। अभि देवां ऽ इयक्षते ।।१।।
ॐ इडामग्नेपुरूद ठं स ठं सनिङ्गो शश्वत्तम ठं हवामनायसाध।
स्थान्नः सूनुस्तनयो विजावाग्ने साते सुमतिर्भूत्वमस्ये ।।२।।

(अब यजमान कहें नान्दीश्राद्ध संपन्नम् । ब्राह्मण कहें — सुसम्पन्नम्।

यजमान कहें —

तेन श्रीकर्मांग देवता: प्रीयन्तां वृद्धि:। ३ॐ विश्वेदेवा: प्रीयन्ताम्।।

देवविसर्जनम् –

ॐ वाजे वाजे वतवाजिनो नो धनेषु विप्राऽअमृता ऽऋतज्ञा: ।
अस्यमद्ध्व: पिबतमादयध्वं तृप्तायातपिथभिर्देवयानै: ।।

इतना कहकर जल छोडें, पात्र टंकार करें या घंटा बजाते हुये विश्वदेवों का विसर्जन करें।

पितृविसर्जनम् –

ॐ आमावाजस्य प्रसवो जगम्यादेमेद्द्यावा पृथिवी विश्वरूपे ।
आमागन्तां पितरामातरा चामासोमो ऽअमृतत्वेगम्यात् ।।

(पितरो की चटों को पात्र टंकारते हुये विसर्जन करें)

यजमान हाथ में जल लेवें

मयाऽऽचरिते ऽस्मिन्सांकल्पिक नान्दीश्राद्धेन्यूनातिरिक्तो यो विधि: स उपविष्ट ब्राह्मणानां वचनाच्छ्री नान्दीमुख प्रासादाच्च सर्व: परिपूर्णोस्तु ।।

कलश में वरुण देवता का आवाहन करें जल से भरें और उसमें सर्वोषधि, सप्तमातृका, पंचपल्लव, पंचकषाय छोड़ देवें उस पर पूर्णपात्र स्थापित करें एवं वास्तु पुरुष की मूर्ति को अग्न्युत्तारण एवं प्राण प्रतिष्ठा (पृष्ठ ५२५) करके स्थापित करें इसके बाद पुष्पाक्षत लेकर निम्न ऋचाओं से आवाहन करें —

१. ॐ वास्तोष्पते प्रतिजानी ह्यस्मान त्स्वावेशो ऽअनमीवो भवानः यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।।

२. ॐ वास्तोष्पते प्रतरणो न एधिगयस्फानो गोभि रश्वेभिरिंदोः अजरासस्ते सख्ये स्याम् पितेव पुत्रान् प्रतितन्नो जुषस्व। शन्नो भव द्विपदे शं चतुष्पदे।।

३. ॐ वास्तोष्पते शग्मया सर्ठ सदाते सक्षीम हिरण्यमया गातु मत्या याहिक्षेम उतयोगे वरन्नो यू यं पात स्वस्तिभिः सदा नः।।

४. ॐ अमी वहा वास्तोष्पते विश्वरूपाण्या विशन् सखा सुशेव एधिः नः।।

५. ॐ वास्तोष्पते ध्रुवा स्थूणां सत्रं सौम्यानां द्रप्सोभेत्ता पुरां शाश्वती

ना मिक्षे मुनीनां सखा।।

ॐ भूर्भुव: स्व: भो वास्तु पुरुष इहागच्छेह तिष्ठ।।

शिव पुत्र होने के कारण शिव का ध्यान करें –

ॐ अघोरेभ्यो ऽथ घोरेभ्यो घोरघोरतरेभ्य: ।
सर्वेभ्य सर्व शर्वभ्यो नमस्ते अस्तु रुद्ररूपेभ्य: ।।

श्वेत परिधौ (६) ईशान्याम् (धूम्रवर्ण पुंजेषु) चरक्यै.। (४७) आग्नेय्याम् (रक्त पुंजेषु) विदार्यै (४८) नैऋत्यां (पीत पुंजेषु) पूतनायै। (४९) वायव्याम् (कृष्ण पुंजेषु) पापराक्षस्यै.। (५०) पूर्वे (रक्त पुंजेषु) स्कंदाय.। (५१) दक्षिणे (कृष्ण पुंजेषु) अर्यम्णे.। (५२) पश्चिमे (रक्त पुंजेषु) जृम्भकाय.। (५३) उत्तरे (पीत पुंजेषु) पिलिपिच्छाय.।

मण्डलाद्वहि द्वितीय रक्त परिधौ – (५४) पूर्वे इन्द्राय: (५५) आग्नेयाम्—अग्नेये. (५६) दक्षिणे—यमाय (५७) नैऋत्याम्—निर्ऋत्ये. (५८) पश्चिमे—वरुणाय. (५९) वायव्यां—वायवे (६०) उत्तरे—कुबेराय. (६१) ईशान्याम्—ईश्वराय. (६२) पूर्वशानयोर्मध्ये—ब्रह्मणे (६३) निर्ऋतिपश्चिमयो र्मध्ये—अनंताय.

(६४) पूर्वेइन्द्रादुत्तरत: (शुक्ल पुंजेषु) उग्रसेनाय: (६५) दक्षिणे यमादुत्तरत: (कृष्ण पुंजेषु) डामराय. (६६) पश्चिमे वरुणादुत्तरत: (कृष्ण पुंजेषु) महाकालाय. (६७) उत्तरे सोमादुत्तरत (पीत पुंजेषु) पिलिपिच्छाय.।

मण्डलाद्वहि तृतीय कृष्ण परिधौ – (पूर्वादि क्रमेण) (६८) पूर्वे कृष्ण पुंजेषु—हेतुकाय. (६९) अग्निकोण कृष्ण पुंजेषु—त्रिपुरान्तकाय (७०) दक्षिणे कृष्ण पुंजेषु—अग्नि वैतालय. (७१) नैऋत्य कोणे (पीत पुंजेषु)—असिवैतालाय. (७२) पश्चिमे (कृष्ण वर्णे) —कालाय. (७३) वायव्ये (रक्त वर्णे)—करालाय. (७४) उत्तरे (पीतवर्णे)—एकपादाय. (७५) ईशान्याम् (रक्त वर्णे)—भीमरूपाय (७६) पूर्वईशानमध्ये (पीत वर्ण) रवेचराय. (७७) नैऋत्य वरुणमध्ये (पीत वर्ण)—तलवासिने नम:।

गंधाक्षत पुष्प हाथ में लेकर ऋचायें पढ़ें – ॐ वास्तोस्पते

प्रतिजानीह्यमान्स्वावेशो अनमीवो भवानः। यत्वेमहे प्रतितन्नो जुषस्व शन्नो अस्तु द्विपदे शं चतुष्पदे।।१ ।।ॐ अमीवहा वास्ताष्पते विश्वरूपाण्या विशन् सखा सुशेवऽएधिनः।

ॐ वास्तवे नमः ॐ भूर्भुवः स्वः सर्वेवास्तुमण्डलदेवता इहागच्छन्तु इहतिष्ठन्तु। सर्वेषां देवानां षोडशोपचारै प्रपूजयेत। बलिम् दद्यात्।

वैसे तो सब देवताओं के अलग—अलग बलिद्रव्य है परन्तु सामुहिक रूप से दधिमाष, चर्वण(नमकीन), पय, मिष्ठान्न व सुवर्ण की बलि प्रदान करें। गंधाक्षत करें।

भो वास्तुमंडल देवताया दिशं रक्ष बलिं भक्षय मम सकुटुम्बस्य सपरिवारस्य आयुकर्तारः क्षेमकर्तारः तुष्टिकर्तारः वरदाः भवत।।

क्षमा प्रार्थना – वास्तुदेव नमस्तेऽस्तु भूशय्याभिरत प्रभो। मद्गृहे धनधान्यादि समृद्धिं कुरु सर्वदा।। ॐ भूर्भुवः स्वः वास्तु पुरुष महाबल पराक्रम सर्वदेवाश्रित शरीर। ब्रह्मपुत्र सकलब्रह्माण्डधारक संकटेभ्यो मां रक्ष रक्ष।।

(दुर्ग देवालय शल्योद्धार में विशेषकर ६४ पद के वास्तु का पूजन करना चाहिये कहीं—कहीं पर दुर्ग हेतु १०० पद वास्तु का पूजन उल्लेख है)

वास्तु खनने विशेष :— वास्तु—खनन, मूर्ति प्रतिष्ठा समय वास्तु को अधोमुख करके अग्निकोण या ईशान कोण मे स्थापित करें पूजन के लिये मंडल नैऋत्य में होता है।

।। इति ८१ पद वास्तु पूजनम्।।

अथ चतुषष्टिपद वास्तुमण्डल देवतास्थापनम्

गृह प्रतिष्ठा में ८१ पद, जीर्ण गृह में ४९ पद, देवप्रतिष्ठा में ६४ पद, दुर्ग व विशाल भवन में १०० पद एवं विशेषकर दुर्ग कार्यों में १२१, १४४, १६९, १७६, २२५, २५६, २८९, ३२४, ३६१, ४००, ४४१ एवं इस तरह वृद्धि क्रम से १००० कोष्ठक पद के वास्तु मंडल का विधान लिखा है जो देखने में कम ही

आता है। एवं विधान अनुपलब्ध सा है। अधिकतर प्रयोगों में ६४ पद देवकार्यों में, गृहकार्य में ८१ पद का विधान सर्वत्रोपयोगी है एवं प्रचलित है। कूप जलाशय व बगीचे की प्रतिष्ठा में १६९ पद वास्तु का उल्लेख भी है।

अथ शंकु पूजनम्

वास्तु मंडल के चारों ओर कोणें में शंकु रोपे पूजा करें एवे बलि देवें। उनको त्रिसूत्रीकरण से २ बार वेष्टन करें। (द्विगुणीतकृत सूत्रेण वेष्टनं भी लिखा है।)

विशन्तु भूतले नागा लोकपालश्च सर्वत: ।
अस्मिन्(प्रासादे) गृहेऽवतिष्ठन्तामायुर्बलकरा: सदा ॥

अग्निकोण शंकु समीपे बलिं संस्थाप्य -

ॐ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिता ।
बलिंतेभ्य: प्रयच्छामि पुण्यमोदनमुत्तम् ॥

नैर्ऋत्यकोण शंकु समीपे बलि संस्थाप्य -

ॐ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसा: ।
बलिंतेभ्य: प्रयच्छामि पुण्यमोदनमुत्तम् ॥

वायव्यकोण शंकु समीपे बलिं संस्थाप्य -

ॐ नमो वै वायु रक्षोभ्यो ये चान्ये तान्समाश्रिता: ।
बलिंतेभ्य: प्रयच्छामि पुण्यमोदनमुत्तम् ॥

ऐशानकोण शंकु समीपे बलिं संस्थाप्य -

ॐ रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तान्समश्रिता: ।
बलिं तेभ्य प्रयच्छामि गृह्णन्तु सततोत्सुका: ।

शंकु देवताभ्यो नम: बलिं समर्पयामि ।

अथ रेखाकरणं पूजनंच -

पश्चिम से पूर्व दिशा की ओर – ॐ लक्ष्म्यै नम:। यशोवत्यै., कान्तायै., सुप्रियायै., विमलायै., शिवायै., सुभगायै., सुमत्यै. इडायै।

दक्षिण दिशा से उत्तर की ओर – धन्यायै., प्राणायै., विशालायै, स्थिरायै., भद्रायै., जयायै., निशायै., विरजायै., विभवायै नम:।

ॐ रेखा देवताभ्यो नम:, पञ्चोपचारै: पूजयेत्।

ततो वास्तुमण्डलदेवतास्थापनं प्रतिष्ठा च पूजनं कुर्यात्

आवाहन की सरलता के लिये यहाँ ८१ कोष्ठक वास्तु से इस वास्तु पूजा में क्रम संख्या में ३३ से ४५ तक भिन्नता कर दी गई है।

सभी देवताओं का चतुर्थी लगाकर आवाहन तथा प्रथमा से स्थापना करें।

ईशान से अग्निकोण तक १ से ८ —

।।१।। ऐशानकोणदक्षिणार्ध पदे — ॐ शिखिने नमः शिखिनम् आ. स्था. (रक्त $\frac{1}{2}$) **।।२।। तद्दक्षिणे सार्धपदे–पर्जन्याय नमः पर्जन्य आ. स्था.** (पीत १$\frac{1}{2}$) **।।३।। तद्दक्षिण पदद्वये– जयन्ताय** (श्वेत २)**।।४।। तद्दक्षिण पदद्वये कुलिशायुधाय.** (पीत२)**।।५।। तद्दक्षिणे पदद्वये– सूर्याय.** (रक्त २) **।।६।। तद्दक्षिण पदद्वये–सत्याय.** (श्वेत २) **।।७।। तद्दक्षिणे सार्धपदे–भृशाय.** (कृष्ण १$\frac{1}{2}$) **।।८।। तद्दक्षिणाग्नेय पदार्धे –आकाशाय.** (कृष्ण $\frac{1}{2}$) **(अग्नि कोण से नैर्ऋत्य कोण तक ९ से १६) ।।९।। तत्पश्चिमार्द्धे–वायवे** (धूम्र $\frac{1}{2}$)**।।१० तत्पश्चिमे सार्धपदे पूष्णे.** (रक्त १$\frac{1}{2}$)**।।११।। तत्पश्चिमे पदद्वये दक्षिणपार्श्वे–वितथाय.** (श्वेत २)**।।१२।। तत्पश्चिमे पदद्वये दक्षिण पार्श्वे–गृहताक्ष.** (पीत२)**।।१३।। तत्पश्चिमे पदद्वये दक्षिणोरुभागे–यमाय.** (कृष्ण २)**।।१४।। तत्पश्चिम पदद्वये–गंधर्वाय.** (रक्त २)**।।१५।। तत्पश्चिम सार्द्धपदे–भृङ्गराजाय.** (कृष्ण १$\frac{1}{2}$) **।।१६।। पश्चिमे. नैर्ऋत्यपदार्द्धे–मृगाय.**(पीत $\frac{1}{2}$)। (नैर्ऋत्य से वायव्य तक १७ से २४)**।।१७।। तदुत्तरार्द्धपदे –पितृभ्यो** (रक्त $\frac{1}{2}$) **।।१८।। तदुत्तरे सार्द्धपदे–दौवारिकाय. (रक्त १$\frac{1}{2}$) ।।१९।। तदुत्तरेपद्वये–सुग्रीवाय.** (श्वेत २) **।।२०।। तदुत्तरेपद्वये– पुष्पदन्ताय.** (रक्त २) **।।२१।। तदुत्तरपद्वये–वरुणाय.** (श्वेत २) **।।२२।। तदुत्तरेपदद्वये–असुराय.** (पीत २) **।।२३।। तदुत्तरेसार्द्ध पदे–शोषाय.** (कृष्ण १$\frac{1}{2}$)**।।२४।। तदुत्तरे वायव्य पदार्द्धे–पापाय** (पीत $\frac{1}{2}$)।

(वायव्य से ईशान कोण तक २५ से ३२) **।।२५।। तत्प्राक्यार्द्ध पदे–रोगाय.** (रक्त $\frac{1}{2}$)**।।२६।। तत्प्राक्पदार्द्धे–अहये.** (रक्त १$\frac{1}{2}$) **।।२७।। तत्प्राक्पदाये–मुख्याय.** (रक्त २) **।।२८।। तत्प्राक्पद्वये–भल्लाटाय.**

(कृष्ण २) ।।२९।। तत्प्राक्पदद्वये—सोमाय. (श्वेत २) ।।३०।। तत्प्राक्पदद्वये —सर्पाय. (कृष्ण २) ।।३१।। तत्प्राक्सार्द्धपदे—आदित्यै. (पीत १$\frac{1}{2}$) ।।३२।। तत्प्रागर्द्धपदे— दित्यै (रक्त १$\frac{1}{2}$)।।

(मध्य पदों के ईशान, अग्नि, नैऋत्य, वायव्य कोंणो में)

ईशानेऽर्द्धपदे आपाय. (शुक्ल $\frac{1}{2}$)।। ३४ आग्नेयपदोत्तरार्धे—सावित्राय. (रक्त $\frac{1}{2}$) ।। ३५ नैर्ऋत्यपदोत्तरार्धे—जयाय. (श्वेत $\frac{1}{2}$)।।३६।। वायव्य पदोत्तरार्धे—रुद्राय (रक्त $\frac{1}{2}$)।।

ब्रह्मा के पूर्व से ईशान तक क्रमशः ।।३७।। मध्येप्राक्पद्वये—अर्यम्णे (कृष्ण २) ।।३८।। आग्नेयपद पूर्वार्द्धे—सवित्रे. (रक्त $\frac{1}{2}$) ।।३९। तत्पश्चिमपदद्वये—विवस्वते. (श्वेत २) ।४०।। नैर्ऋत्य पदपूर्वार्द्धे—विबुधाधिपाय. (रक्त $\frac{1}{2}$) ।४१।। तदुत्तर पदद्वये—मित्राय. (श्वेत २) ।४२। तदुत्तरेवायव्य पद पश्चिमार्द्धे—राजयक्ष्मणे. (रक्त $\frac{1}{2}$)।४३। तत्प्राक्पदद्वये—पृथ्वीधराय. (रक्त २) ।४४।। ईशान पददक्षिणार्द्धे —आपवत्साय. (श्वेत $\frac{1}{2}$) ।४५।। ततो मध्येपदचतुष्टये—**ब्रह्मणे नमः ब्रह्मण आ. स्था.** (श्वेत ४)।।

वैसे यहाँ वास्तु का अंग पूर्ण बन गया है अतः वास्तु मंत्र की ५ ऋचाओं व अघोरेभ्यो मंत्र से आवाहन करना चाहीये सम्पूर्ण पूजन क्रम ८१ कोष्ठक में जो लिखा है वह अवलोकन करने से ६४ पद का पूजन भी समझ में आ जायेगा अथवा सभी वास्तु देताओं का आवाहन करके मध्य में कलश पूर्णपात्र श्रीफल [illegible] उस पर वास्तु की मूर्ति की अग्न्युत्तरण कर प्रतिष्ठा (पृष्ठ संख्या ५२५) फिर ऋचायें पढ़ें जो पृष्ठ संख्या १४१ पर है।

शिव पुत्र होने के कारण शिव का ध्यान करें —

ॐ अघोरेभ्यो ऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्य सर्व शर्वभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।।

श्वेत परिधौ (४६) ईशान्याम् (धुम्र पुंजेषु) **चरेक्यै.। (४७) अग्नियाम्** (रक्त पुंजेषु) **विदार्यै (४८) नैऋत्यां** (पीत पुंजेषु) **पूतनायै.। (४९) वायव्याम्** (कृष्ण पुंजेषु) **पापराक्षस्यै.। (५०) पूर्वे** (रक्त) **स्कंदाय.। (५१) दक्षिणे** (कृष्ण) **अर्यम्णे. (५२) पश्चिमे** (रक्त) **जृम्भकाय. (५३)**

उत्तरे (पीत) पिलिपिच्छाय।

मण्डलाद्बहि द्वितीय रक्त परिधौ — (५४)पूर्वे—इन्द्राय: (५५) आग्नेयाम्—अग्नेये. (५६) दक्षिणे—यमाय (५७) नैऋत्याम्—निर्ऋत्ये. (५८) पश्चिमे—वरुणाय. (५९) वायव्यां—वायवे (६०) उत्तरे—कुबेराय. (६१) ईशानन्यम्—ईश्वराय. (६२) पूर्वेशानयोर्मध्ये—ब्रह्मणे (६३) निर्ऋति पश्चियो र्मध्ये—अनंताय नमः अनंतम् आ. स्था.।

ॐ भूर्भुवः स्वः शिख्यादि वास्तुमण्डल देवताभ्यो नमः ।।
सर्वेषां पूजनं कुर्यात् (बलिं दद्यात्)।।

अथ मंत्रसहितम् वास्तुअंगदेवता आवाहनम्

आपका वास्तु मंडल ६४ या ८१ पद का है उसी के अनुसार रेखा देवताओं का आवाहन व शंकु पूजन करें जैसा कि पूर्व मे नामावली से आवाहन में बताया है।

इसके बाद वास्तु के अंग देवताओ का मंत्र सहित आवाहन ईशान कोण से प्रारंभ करते हुए करे। ६४ व ८१ पद के देवताओं का आवाहन मंत्र एक ही है अंतर केवल पद का है अर्थात पद में $\frac{1}{2}$, १$\frac{1}{2}$। पद एवं ८१ पद में एक पद द्विपद आदि पद भेद है।

नोट :— वास्तु पुरुष को सभी देवताओं नें मिलकर भूमि पर **अधोमुख** गिरा दिया था **और उस समय जिन—जिन देवताओं ने उसके अंगों को खड़े होकर दबाया उसी क्रम में अधोमुख वास्तु पर उनके आवाहन मंत्र है, अतः पूर्ण आवाहन के बाद स्वाभिमुख वास्तु का ध्यान करें।**

तद्यथा — **तत्रेशानकोणादारभ्याधोमुखपातित वास्तु पुरुष शिर स्थाने ईशानकोण पदे। (आवाहन में स्वाभिमुख एवं खनन विषये अधोमुख ध्यान करे)**

(१). कर्पूरधवलं वृषवाहनं शिखिनमेकपम्
आवाहयामि देवेशं शंकरं शिखिरूपिणम् ।।
चतुर्हस्तं त्रिनेत्रं च स्नुक् शूलं दक्षिणे करे ।

डमरुं स्रुवकं वामे स्वाहोमासहितं विभुम् ।।

आगच्छ त्वं शिखिन्देव क्षेत्रेऽस्मिन्संनिधो भव।। ॐ नमः शंभवाय च मयोभवाय च नमः शंकराय च। मयस्कराय च नमः शिवाय च शिवतराय च।। इत्यावाह्य भोः शिखिन् इहागच्छ।।

शिखी कर्पूरधवल — स्त्रिनेत्रो वृषवाहनः ।
वरत्रिशूलहस्तश्च वास्तोः शिरसि संस्थितः ।।

ॐ तमीशानं जगतस्तस्थुषपतिं धियंजिन्वमवसेहूमहेवयम्।। पूषानोयथा वेदसामसद्वृधे रक्षितापायुर दब्धः स्वस्तये।। ॐ भूर्भुवः स्वः शिखिन्निहागच्छ इह तिष्ठ ॐ शिखने नमः।१ ।।

(२). (तद्दक्षिणपदे नेत्रैकपदे पर्जन्यमावाहयेत्)

आवाहयामि पर्जन्यं यादसां मुख्यनायकम् ।
कुंभीरथ — समारूढं पाशहस्तं वरप्रदम् ।।

ॐ शन्नोवातः पवता॰शन्नः स्तपतुसूर्यः।। शन्नःकनिक्रदद्देवः पर्जन्योऽअभिवर्षतु।। इत्यावाह्य भोः पर्जन्य इहागच्छ इह तिष्ठ।।

नौस्थस्तडित्वान्पर्जन्यो नानावर्ण परिप्लुतः ।
ज्योतिर्भूतां बुवाहात्मा वास्तोर्दक्षे दृशि स्थितः ।।

ॐ महाँइंद्रो वज्रहस्तः षोडशीशर्मयच्छतु।। हंतु पाप्मानं योस्मान्द्वेष्टि।। उपयाम गृहीतोसि महेंद्रायत्वेषते योनिर्महेंद्रायत्वा।१ ।। ॐ भूर्भुवः स्वः पर्जन्य इह तिष्ठ ॐ पर्जन्याय नमः।।२।।

(३). (तद्दक्षिणे) तदधः पदे च श्रोत्रे द्विपदं जयंतं ध्यात्वा ऽऽवाहयेत्।।

आवाहयामि तं देवं महेन्द्रतनयं प्रभुम् ।
मुद्रिका कंकणैर्युक्तं सर्वाभरण भूषितम् ।
वरदाभयंहस्तं च जयंत पूजयाम्यहम् ।

ॐ मर्म्माणि तेवर्म्मणाच्छादयामि सोमस्त्वाराजामृते नानुवस्ताम्।। उरोर्वरीयो वरुणस्तेकृणोतु जयंतं त्वानुदेवामदंतु।१ ।। ॐ भूर्भुवः स्वः भो जयंत इहागच्छ।।

जटिलः श्मश्रुलः श्रांतः कमंडल्वक्षसूत्रभृत् ।
जयंतोऽब्जासनो गौरो वास्तोर्दक्षश्रवस्थितः ॥

ॐ जीमूतस्येव भवति प्र.॥ इति स्थापनम्॥ ॐ भूर्भुवः स्वः जयंत इहागच्छ इह तिष्ठ ॐ जयंताय नमः॥३॥

(४). (तद्दक्षिणपदद्वये अंसे कुलिशायुधं ध्यात्वैन्द्रमावाहयेत्।

एहि देव सहस्राक्ष देवारिबलसूदन ।
ऐरावत — समारूढ शचीहृदयनंदन ।
वज्रहस्तं सुराध्यक्षमिंद्रमावाहयाम्यहम् ॥

ॐ आयात्विंद्रोवसउपन दूहस्तुतः सधमादस्तु शूरः॥ वावृधानस्तविषीर्यस्य पूर्वीद्यौर्नक्षत्रमभिभूतिपुष्यात् भो इद्रं इहागच्छ इह तिष्ठ॥

इन्द्र ऐरावतारूढः पीतो दैत्यविमर्द्दकः ।
कुलिशाक्षकरो वास्तोरंसस्थल समाश्रितः ॥

ॐ इन्द्रश्चसम्राड् वरुणश्चराजातौतेभक्षं चक्रतुरग्रएतम्॥ तयो रहमनु भक्षंयामिवाग्देवी जुषाणा सोमस्यतृप्यतु सहप्राणेन स्वाहा॥ ॐ भूर्भुवःस्वः इंद्र इहागच्छ इह तिष्ठ ॐ इंद्राय नमः॥४॥

(५). (तद्दक्षिण पदद्वये दक्षिणबाहौ सूर्यमावाहयेत्)

आवाहयामि देवेशं भास्करं तिग्मतेजसम् ।
कलिंग काश्यपं रक्तं सप्ताश्वं सप्तरज्जुकम् ॥
द्विभुजं पद्महस्तं च त्रैलोक्य तिमिरापहम् ।
सर्वसौख्यप्रदातारं कर्मसाक्षिणमीश्वरम् ।
आगच्छ भगवन्सूर्य क्षेत्रेऽस्मिन्संनिधो भव ॥

ॐ बण्महाँ२ असिसूर्यबडादित्यमहाँअसि॥ महस्ते सुतोमहिमा पनस्यतेद्धा देवमहाँअसि॥

भोः सूर्य रक्तो ग्रहाध्यक्षो धृताब्जो द्विभुजः प्रभुः ॥
सप्ताश्वरथगो भास्वान्वास्तोर्दक्षांससंस्थितः ॥

ॐ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविताज्ज्योतिरुदयाऽअजस्त्रम्।। तस्य पूषा प्रसवेयाति विद्वान संपश्यन विश्वाभुवनानि गोपाः। ॐ भूर्भुवः स्वः सूर्य इह आगच्छ इहतिष्ठ। सूर्याय नमः।

(६). (तद्दक्षिण पदद्वये दक्षिण प्रवाहौ सत्यमावाहयेत्)

आवाहयामि तं सत्यं पुण्ययुक्तम कल्मषम् ।
पद्महस्तं महाबाहुं वरदं निर्मलं शुभम् ।।
ज्ञानमुद्राधरं देवं चिंतितं ब्रह्मकेवलम् ।
आगच्छ देव सत्य त्वं क्षेत्रेऽस्मिन्सन्निधो भव ।।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।। दक्षिणया श्रद्धामाप्नोतिश्रद्धया सत्यमाप्यते।। भोः सत्य इहागच्छ।।

सत्यो भूतहितो धर्म्मो वरदाभय पाणिकः ।
प्रसन्नाब्जनिभो वास्तवोर्दक्षबाहौ च संस्थितः ।।

ॐ सत्यंचमे श्रद्धाच मे जगच्चमे धनंचमे यज्ञेनचमे यज्ञेनकल्पंताम्।।
ॐ भूर्भुवः स्वः सत्य इह तिष्ठ ॐ सत्याय नमः।।६।।

(७). (तद्दक्षिण पदद्वये दक्षिण प्रबाहो दक्षिणकूर्परि भृशमावाहयेत्)

आवाहयेऽहं भृशमादिदेवं संचारशीलं भुवनत्रयेऽपि ।
एकेन हस्तेन वरं दधानमभीष्टदानं त्वपरेण तेन ।।

ॐ आत्वाहार्षमंतरेभृध्र्धुवस्तिष्ठाविचाचलिः।। विशस्त्वा सर्व्वावांछतु मात्वद्राष्ट्रमधिब्भ्रशत्।। भो भृश इहागच्छ।।

भृशः पुष्पविमानस्थः सपुष्पेषुधनुः करः ।
गौरो नादरतः कामी यो वास्तोर्दक्षबाहुगः ।।

ॐ भायैदार्वाहारं प्रभाया अग्नेधं ब्रध्नस्यविष्टपायाभिषेक्तारंवषिष्ठाय नाकायपरिवेष्टानरन्देवलोकायपेशितारं मनुष्य लोकाय प्रकारितार७ सर्वेभ्योलोकेभ्यऽउपसेक्तारमवऋत्यैव धायोप मंथितारंमेधाय वासः पल्पूलींप्रकामायरजयित्रीम्।। ॐ भूर्भुवः स्वः भो भृश इह तिष्ठ ॐ भृशाय नमः।।७।।

(८). (तद्दक्षिणपदे बाहौ आकाशमेकपदमावाहयेत्)

आवाहये तमाकाशं विष्णोः पदमनंतकम् ।
यत्र देवास्तथा यक्षा ग्रहाः सर्वे प्रतिष्ठिताः ।
आगच्छ त्वं महाकाश क्षेत्रेऽस्मिन्संनिधो भव।।

ॐ यावांकशा मधु मत्यश्विना सूनृतावती।। तया यज्ञं मिमिक्षतम्।। उपयामगृहीतोऽस्यश्विभ्यांत्वैषते योनिर्माध्विभ्यांत्वा।। भो आकाश इहागच्छ।।

शंखचक्रधरं देवमसितं स्वस्तिकासनम् ।
सशब्दं सर्वगं व्योम प्रबाहौ चैव संस्थितम् ।।

ॐ भूर्भुवः स्वः आकाश इह तिष्ठ ॐ आकाशाय नमः।।८।।

(९). (तद्दक्षिणपदे आग्नेयकोणे प्रबाहौ वायुमेकपदमावाहयेत्)

आवाहयामि देवेशं भूतानां देहधारिणम् ।
आगच्छ भगवन्वायो क्षेत्रेऽस्मिन्संनिधोभव ।।

ॐ वायोयेतेसहस्रिणोरथासस्तेभिरागहि।। नियुत्वान्त्सोमपीतये।। भो वायो इहागच्छ।।

वायुर्धन्वी मृगारूढो जगत्प्राणश्चलो युवा ।
अंकुशध्वज बिभ्राणः प्रबाहोर्दण्डसंस्थितः ।।

ॐ वातोवामनोवागधर्वाःसप्तवि७शतिः।। तेऽग्रेश्वमायुंजंस्तेऽअस्मिञ्जव मादधुः ।। ॐ भूर्भुवः स्वः वायो इह तिष्ठ ॐ वायवे नमः।।९।।

(१०). (मंडलदक्षिणभागे वायुपदाधः पदे मणिबंधे पूषणमेक पदमावाहयेत्)

आवाहयामिदेवेशं पद्महस्तं वरप्रदम् ।
रक्तवस्त्रपरीधानं विद्युद्वर्णे महाबलम् ।
आगच्छ भगवन्पूषन्क्षेत्रेऽस्मिसंनिधोभव ।।

ॐ पूषंतवव्रतेवयंनरिष्येमकदाचन।। स्तोतारस्तइहस्मसि ।। ॐ भूर्भुवः स्वः पूषन्निहागच्छ।।

महास्वन: शोणवर्णो द्विभुजाब्जकमंडलु: ।
पूषा गजासन: शुभ्रो मणिबंध समाश्रित: ।।

ॐ स्वयं भूरसिश्रेष्ठोरश्मिर्वर्चोदाअसिवर्चोव्येदेहि।। सूर्यस्या' वृत्तमन्वावर्ते।। ॐ भू र्भुव: स्व: पूषन्निह तिष्ठ ॐ पूष्णे नम:।।१०।।

(११). (तदध: द्विपदे दक्षिणपार्श्वे वितथतमावाहयेत्)

आवाहयेत्तं वितथं पुराणं द्यावापृथिव्यंतरचारिणं च ।
गृहाण पूजां चणकौदनाख्यां बलिं च गृह्णन्भगवन्नमस्ते।।

ॐ तत्सूर्यस्यदेवत्वंतन्महित्वंमद्ध्याकर्तोर्विततठंसंजभार।। यदेदयुक्त हरित: सधस्थादाद्रात्रीवासस्तनुतेसिमस्मै।। भो वितथ इहागच्छ।।

कृष्णवर्णस्तु वितथ: कलेरप्रतिमासन: ।
मद्यमांसालयो रक्तकरश्चालस्थ पार्श्वग: ।।

ॐ सविताप्रथमेहन्नग्निर्द्धितीये वायुस्तृतीय ऽआदित्यश्चतुर्थे
चंद्रमा: पंचम ऋतु: षष्ठे मरुत: सप्तमेबृहस्पतिरष्टमे ।
मित्रोनवमे वरुणो दशम इंद्र एकादशे विश्वेदेवा द्वादशे।।

ॐ भू र्भुव: स्व: वितथ इह तिष्ठ ॐ वितथाय नम:।।११।।

(१२). (तदध: पदद्वये दक्षिणपार्श्वे गृहक्षतं द्विपद मावाहयेत्)

आवाहयामि त्वां देव गृहक्षत समाख्यक ।
पूजां गृहाण देवेश मम स्वस्तिकरो भव ।।

ॐ अक्षन्नमीमदंतह्यवप्रियाअधूषत।। अस्तोषतस्वभानवो विप्रान विष्ठयामती। योजान्विंद्रतेहरी।। भो गृहक्षत इहागच्छ।।

गृहक्षत: पाटलांगो गदासिवरचर्मभृत् ।।
पंचास्यवाहन: क्रूरो वास्तोर्दक्षकटिस्थित: ।।

ॐ गृहमाविभीतमावेयध्वमृर्जे बिभ्रतएमसि।। ऊर्जेबिभ्रद्व: सुमना: सुमेधा गृहानैमिमनसा मोदमान:।। ॐ भूर्भुव: स्व: भो गृहक्षत इह तिष्ठ ॐ गृहक्षताय नम:।।१२।।

(१३). (तदधः दक्षिणरुभागे द्विपदं यममावाहयेत्)

आवाहयामि देवेशं दक्षिणां दिशमाश्रित् ।
महिषे च समारूढ मंजनाद्रिसमप्रभम् ।।
चित्रगुप्तसहायं तं दंडमुद्गरधारिणम् ।
सप्तर्षिभिः समायुक्तं धर्माधर्म प्रवर्तकम् ।।
लोकसंयमनार्थाय किंकरैः परिवारितम् ।
आगच्छ भगवन्धर्म क्षेत्रेऽस्मिन्सिंनिधो भव ।।

ॐ यमायत्वांगिरस्वते पितृमते स्वाहा। स्वाहा धर्माय स्वाहा धर्मः पित्रे।। भो यमइहागच्छ।।

रक्ताक्षो महिषारूढो दंडपाशधरो यमः ।
कर्मज्ञोऽअञ्जनसंकाशो वास्तोर्दक्षिण संश्रितः ।।

ॐ यमायत्वा मखायत्वा सूर्यस्यत्वा तपसे।। देवस्त्वा सविता मध्वानक्तु पृथिव्याःसँ स्पृशस्पाहि।। अचिरसि शोचिरसि तपोसि ॐ भूर्भुवः स्वः भो यम इह तिष्ठ ॐ यमाय नमः।।१३।।

(१४). (तदधः पदद्वये दक्षिणजानुप्रदेशे गंधर्वं द्विपदमावाहयेत्।।)

आवाहयामि गंधर्वं षड्विंशद्रागतत्परम् ।
वीणां गृहीत्वा हस्तेन तद्वादनरतं विभुम् ।।
अप्सरोगण संकीर्णं नानागंधैश्च चर्चितम् ।
गंधर्व त्वमिहागच्छ पूजेयं प्रतिगृह्यताम् ।।

ॐ गंधर्वस्त्वाविश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ।। मित्रा वरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽईडितः।। भो गंधर्व इहागच्छ।।

सुष्ठुवेषः शिखीगौरो गंधर्वो ध्यानवच्छुचिः ।
वीणाकमंडलु धरो वास्तोर्दक्षिणजानुगः ।।

ॐ ऋष्ताषाड् ऋतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसोमुदोनाम।। सन

इदं ब्रह्मक्षत्रंपातु तस्मैस्वाहा वाट्ताभ्य: स्वाहा।। ॐ भूर्भुव: स्व: भो गंधर्व इह तिष्ठ ॐ गंधर्वाय नम:।।१४।।

(१५). (तदध: पदद्वये दक्षिणजंघायां भृंगराजं द्विपद मावाहयेत्)

आवाहयामि तं देवं भृंगराजं महाबलम् ।
षट्पदै: सेव्यमानं च कुसुमामोदसंयुतम् ।
आगच्छालिकुल त्वं हि क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ सौरी बलाकाशार्गा: सृजय: शयाकस्तेमैत्रा: सरस्वत्यै शारि: पुरुषवाक्श्वाविद्भौमीशार्दूलोकवृक: पृदाकुस्ते मन्यवे सरस्वते शुक: पुरुषवाक्।। भो भृंगराज इहागच्छ।।

सुनीलांगो महाकाय: कुंकुमारुणविग्रह: ।
खड्गखेटधरो वास्तोर्दक्ष जंघासमाश्रित: ।।

ॐ यमायत्वांगिरस्वते पितृमते स्वाहा।। स्वाहा धर्मायस्वाहा धर्म: पित्रे।। ॐ भूर्भुव: स्व: भृंगराज इह तिष्ठ ॐ भृंगराजाय नम:।।१५।।

(१६). (तदध: पदे दक्षिणस्फिचि मृगमेकपदमावाहयेत्)

मृगमावाहयिष्यामि शशांककृत चिन्हकम् ।
कृष्णवर्णं चतुष्पादं श्वेतोदरविषाणकम् ।
आगच्छ भगवनिह क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ प्रतद्विष्णुस्तवते वीर्येण मृगोन भीम: कुचरोगिरिष्ठा:।। यस्योरुषुत्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा।। भो मृग इहागच्छ।।

मृग: कृष्णो भूषितांगो वरदाभयमुद्रिक: ।
वरासनश्चारुनेत्रो वास्तोर्दक्षिण स्फिक्स्थित: ।।

ॐ पुरुषमृगश्चंद्रमसो गोधा कालकादार्वाघाटस्ते वनस्पती नांकृकवाकु: सावित्रोहंस: सोवातस्यनाक्रोमकर: कुलीकयस्ते कूपार स्यैंद्रियैशल्यक:।। ॐ भूर्भुव: स्व: मृग इह तिष्ठ ॐ मृगाय

नमः।।१६।।

(१७). (तदधः पदे नैऋत्यकोणे पादयोः पितृगणमेक पदमावाहयेत्।।)

पितृनावाहयिष्यामि सोमपादीननुक्रमात् ।
पिगाक्षान्कपिल जटान्हस्तेकुशमंडलूकन् ।।
दधानान् सितवस्त्राणि सितयज्ञोपवीतिनः ।
गृहणीयुः कृशरान्नं च पितृन् संपूजयाम्यहम् ।।

ॐ उशं तस्त्वानिधीमह्युशंतः समिधीमहि।। उशन्नुशत आवह पितृन्हविषे अत्तवे।। भो पितरः इहागच्छ।।

कुशपिंड धराः स्वस्थाः पितरः श्यामलांगकाः ।
महोदराः सोमलोकवासिनो वास्तुपादगाः ।।

ॐ पुनंतुमापितरः सोम्यासः पुनंतुमा पितामहाः पुनंतु प्रपितामहाः।। पवित्रेणशतायुषा।। विश्वमायुव्यश्नवै।। ॐ भू र्भुवः स्वः पितरः इह तिष्ठ ॐ पितृभ्यो नमः।।१७।।

(१८). (अथ मंडल पश्चिम भागे निर्ऋतिकोणोत्तर वामस्फिचि प्रदेशे दौवारिकमेक पदमावहयेत्।।)

एह्येहि दौवारिक रक्षणाय द्वाराणि सर्वाणि च मंदिरस्य ।
पैष्टं बलिं वासितदन्तकाष्ठं गृहाण पूजां भगवन्नमस्ते ।।

ॐ द्वेविरूपे चरतः स्वर्थेऽअन्यान्यावत्समुपधापयेते।। हरिरन्यस्यांभवति स्वधावान शुक्रो ऽअन्यस्यांदद्दशे सुवर्चाः।। ॐ स्थिरो भव वीड्वंग आशुर्भववाज्यर्वन। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः।। भो दौवारिक इहागच्छ।।

दौवारिको वेत्रमुद्राधरो भूति विभूषितः ।
मुक्ताभपाकारूढो वास्तोर्वामस्फिचि स्थितः ।।

ॐ द्वारोदेवीरन्वस्य विश्वेव्रतादतेअग्नेः।उरुव्यचसोधाम्नापत्यमानाः।। ॐ भूर्भुवः स्वः दौवारिक इह तिष्ठ ॐ दौवारिकाय नमः।।१८।।

(१९). (तदुत्तरपदोर्ध्वपदे वामजंघायां सुग्रीवं द्विपद्मावाहयेत्।।)

आवाहये तं कपिराजमुख्यं सुग्रीवराजं नभमंडलेऽस्मिन्।
पाषाणवृक्षौ दधतं कराभ्यां गृहाण पूजां भगवन्नमस्ते ॥

ॐ नीलग्रीवा: शितिकंठा दिव ठं रुद्राऽउपश्रिता:॥ तेषां ᳚ सहस्रयोजने वधन्वानितन्मसि॥ भो: सुग्रीव इहागच्छ॥

पद्मासनो हेमवर्ण: सुग्रीवोऽध्वरगात्रभृत ।
द्विभुज: कामदो वास्तोर्वामजंघासमाश्रित: ॥

ॐ सुषुम्ण: सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयोनाम। सन इदं ब्रह्मक्षत्रं पातुतस्मै स्वाहा वाट्ताभ्य: स्वाहा॥ ॐ भूर्भुव: स्व: सुग्रीव इह तिष्ठ ॐ सुग्रीवाय नम:।१९॥

(२०). (तदुत्तर पदद्वये वामजानुप्रदेशे पुष्पदंतं द्विपदमावाहयेत्॥)

आवाहयामि देवेशं पुष्पदंतं विनायकम् ।
लंबोदरं महाकाय गजवक्रं चतुर्भुजम् ॥
सिद्धिबुद्धि समायुक्तं सर्वविघ्नविनाशनम् ।
पुष्पदंत समागच्छ पूजेयं प्रतिगृह्यताम् ॥

ॐ नमोगणेभ्यो गणपतिभ्यश्च वोनमो। नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो। नमो विरूपेभ्यो नमो। विश्वरूपे भ्यश्च वो नमो नम:। भो पुष्पदंत इहागच्छ॥

पुष्पदंतोऽभ्रसंकाश: खगपक्षविराजित: ।
महाबलो व्यालहस्त: श्रीवास्तोर्वामजानुग: ॥

ॐ ओषधी: प्रतिमोदध्वंपुष्पवती: प्रसुवरी: अश्वा इव सजित्वरी वीरुध: पारयिष्णव: ॥ ॐ भूर्भुव: स्व: पुष्पदंत इह तिष्ठ ॐ पुष्पदंताय नम:॥२०॥

(२१). (तदुत्तर पदद्वये वामोरौ वरुणं द्विपदमावाहयेत्॥)

आवाहयामि देवेशं वरुणं जलनायकम् ।
कुम्भीरथसमारूढं श्वेताद्रिशिखरोपमम् ॥
पाशहस्तं महाबाहुं यादोगणसमन्वितम् ।

आगच्छ वरुण त्वं हि क्षेत्रेऽस्मिन्सन्निधो भव ॥

ॐ इमंमे वरुण श्रुधी हवमद्याचमृडय॥ त्वामवस्युराचके॥ भो वरुण इहागच्छ॥

वरुणो यादसां नाथो नक्रस्थः पाटलांशुकः ।
शंखपाशधरः शुभ्रो वास्तोर्वामोरुसंश्रितः ॥

ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऽऋतसदनमसि वरुणस्य ऽऋतसदनमासीद॥ ॐ भूर्भुवः स्वः वरुण इह तिष्ठ ॐ वरुणाय नमः॥२१॥

(२२). (तदुत्तर पदे वाम पार्श्वे असुरं द्विपदमावाहयेत्)

असुर त्वं समागच्छ रक्षोगणसमन्वितः ।
शक्तिशूलधरो नित्यं रक्ताक्षश्च महाबलः ।
हिरण्यपाशभृद्देव पूजां स्वीकुरु मे प्रभो ॥

ॐ यमश्विनानमुचेरा सुरादधि सरस्वत्यसुनोदिंद्रियाय॥ इमंत ठं शुक्रंमधुमंत मिंदु ठं सोम ठं राजमिहभक्षयामि॥ भो असुर इहागच्छ॥

असुरो मेचकाभासः करालास्योंगवर्जितः ।
सिंहारूढो वारुणाक्षो वास्तोर्वामकटि स्थितः ॥

ॐ ये रूपाणि प्रतिमुंच माना असुराः संतः स्वधयाचरंति। परापुरोनिपुरोये भरंत्यग्निष्टॉल्लोका त्प्रणुदात्य स्मात्॥ ॐ भूर्भुवः स्वः असुर इह तिष्ठ ॐ असुराय नमः॥२२॥

(२३). (तदुत्तर पदद्वये वामपार्श्वे शेषं द्विपदमावाहयेत्)

आवाहयामि देवेशं पातालतलवासिनम् ।
सहस्रशिरसं नागं फणामणिविराजितम् ॥
कर्पूरपूरविशदं नागराजं महाबलं ।
परोपकारनिरतमनतं विष्णुवाहनम् ।
आगच्छ नागराज त्वं क्षेत्रेऽस्मिन्सन्निधो भव ॥

ॐ या इषवो यातुधाना नायेवा वनस्पति ठं रनु।। येवावटेषु शेरतेतेभ्य: सर्पेभ्यो नम:।। ॐ भूर्भुव: स्व: भो: शेष इहागच्छ।।

शेष: कृष्णतनु: शूरो वरशूलेषुचापभृत् ।
गृध्रपक्ष: कृशो दीर्घो वास्तोर्वै वामपार्श्वग: ।

ॐ शन्नो देवीरभिष्टय आपोभवंतु पीतये।। शंय्योरभिस्त्रवंतुन:।। ॐ भूर्भुव: स्व: शेष इह तिष्ठ ॐ शेषाय नम:।।२३।।

(२४). (तदुत्तरोपरिदाधस्थैक पदे वाममणिबन्धे पापयक्ष्माण मेकपदमावाहयेत्)

आवाहयामि तं पापं नाम्ना यक्ष्मेति विश्रुतम् ।
निर्मांसं निघृणं चैव शक्तिपाणिं महाबलम् ।
आगच्छ भगवन्पाप पूजा मे प्रतिगृह्यताम् ।।

ॐ एतत्ते रुद्रा वसंतेन परोमूजवतोतीहि।। अवतत धन्वा पिनाका वस: कृत्तिवासा अहि ष्ं सन्न: शिवोतीहि।। भो यक्ष्मन्निहागच्छ।।

पापयक्ष्मा धूम्रवर्णो गदावरदमुद्रिक: ।
कपोतवाहनो वामे मणिबंधे समाश्रित: ।।

ॐ बट सूर्यश्रवसामहाँ असिसत्रादेवमहाँअसि।। मह्नादेवानामसूर्य्य: पुरोहितो विभुज्ज्योतिरदाभ्यम्।। ॐ भूर्भुव: स्व: पापयक्ष्मन्निह तिष्ठ ॐ पापयक्ष्मणे नम:।।२४।।

(२५). (तदुत्तरतो वायव्य कोणपदे वामप्रबाहौ रोगमेकपदमावाहयेत्)

आवाहयामि तं रोगं वातादित्रिगुणात्मकम् ।
त्रिपादं त्रिशिरो रक्तनेत्रं भस्मविभूषितम् ।।
लोकनां च सुखं देहि बलिभिर्घृतमोदकै: ।
पूजां गृहाण भो रोग क्षेत्रे ऽस्मिनसंनिधो भव ।।

ॐ द्रापे ऽअंधसस्पते दरिद्र नीललोहित।। आसां प्रजानां मेषांपशूनां माभेर्म्मारोङ्मोचन: किंचनाममत्।। भो रोग इहागच्छ।।

रोग: पापधरो रक्तो दुरात्मा ब्याधिसंगह: ।।

दुष्कर्ममदर्दको वास्तोर्वामदोर्दंड संस्थितः ॥

ॐ यद्देवा देव हेडनं देवा सश्च कृमा वयम्। अग्निर्मा तस्मादेवसो विश्वान् मुंचत्व ठं हसः ॥ ॐ भूर्भुवः स्वः रोग इह तिष्ठ रोगाय नमः॥२५॥

(२६). (अथ मंडलोत्तरभागे वायव्यकोणपदोर्ध्वपदे वामबाहौ अहिमेकपद मावाहयेत्)

अहिमावाहयिष्यामि त्रैलोक्यांतरचारिणम् ।
शेषवंशे समुद्भूतं चक्षुः कर्णमहीश्वरम् ।
आगच्छ त्वं हि नागेंद्र क्षेत्रेऽस्मिन्सन्निधो भव ॥

अहिरिवभोगैः पर्य्येति बाहुंज्याय हेतिम्परिबाधमानः॥ हस्तघ्नो विश्वाव्वयुनानि विद्वान्पुन्मापुमा ठं संपरिपातुविश्वतः ॥

भो अहे इहागच्छ॥

अहिराजोऽब्जवच्छुभ्रः फणामणि विराजितः ।
अक्षकुंडधरो वास्तोर्वामिबाहौ व संस्थितः ॥

ॐ नमोस्तु सर्पेभ्योयेके च पृथिवीमनु॥ ये अंतरिक्षे येदिवितेभ्यः सर्पेभ्यो नमः॥ ॐ भूर्भुवः स्वः अहे इह तिष्ठ ॐ अहये नमः॥२६॥

(२७). (तदूर्ध्व पदद्वयेवामकूर्परे मुख्यं द्विपदमावाहयेत्)

आवाहयामि तं शैवं गणानां मुख्य नायकं ।
जटाजूटधरं सौम्यं शूलपट्टिशधारिणम् ।
नमस्ते मुख्य देवेश क्षेत्रेऽस्मिन्संनिधो भव ॥

ॐ अवतत्यधनुष्ट्व ठं सहस्राक्षशतेषुधे॥ निशीर्यशल्यानांमुखा शिवोनः सुमनाभव॥ भो मुख्य इहागच्छ॥

मुख्योऽसौ विश्वकर्मा तु वास्तुकुंभाक्षसूत्रधृक् ।
निपुणस्तुलुलायस्थो वास्तुवामभुजाश्रितः ॥

ॐ मानस्तोकेतनयेमानऽआयुषिमानो गोषुमानो अश्वेषुरीरिषः॥ मानोव्वीरान् रुद्रभामिनो वधीर्हविष्मंतः सदमित्वा हवामहे॥ ॐ भूर्भुवः

स्वः मुख्य इह तिष्ठ ॐ मुख्याय नमः।।२७।।

(२८). (तदूर्ध्वपद द्वये वामबाहौ भल्लाटं द्विपदमावाहयेत्)

आवाहयामि देवेशं भल्लाटं शिवरूपिणम् ।
भिल्लवेषधरं कृष्णं धनुर्बाणसिधारिणम् ।।
भिल्लमोहनकर्तारं बर्हिपिच्छैस्त्वलंकृतम् ।
आगच्छ भगवन्देव क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ इमा रुद्रायतवसे कपर्दिन क्षयद्वीरायप्रभरामहेतीः।। यथाशम सद्विपदे शं चतुष्पदे विश्वंषुष्टंग्रामे अस्मिन्ननातुरम्।। भो भल्लाट इहागच्छ।।

भल्लाटश्चंद्रसंकाशो वरमुद्रागदाधरः ।
हयपुत्रो वास्तुपुंसो वामदोमूल देशगः ।।

ॐ आप्या यस्वसमेतुते विश्वतः सोमवृष्णयम् ।। भवावाज-स्यसंगथे।। ॐ भूर्भुवः स्वः भल्लाट इह तिष्ठ ॐ भल्लाटाय नमः।।२८।।

(२९). (तदूर्ध्वपद द्वये वामप्रबाहोवेव सोमं द्विपदमावाहयेत्)

आवाहयामि देवेशं शशांक रजनीपतिम् ।
क्षीरोदधिसमुद्भूतं हरमौलिविराजितम् ।।
सुधाकरं द्विजाधारं त्रैलोक्यप्रीतिकारकम् ।
औषधाप्यायनकरं सोमं कंदर्पवर्द्धनम् ।
आगच्छ भगवन्सोम क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ सोमराजा नमवसेग्निमन्वारभामहे।। आदित्यान्विष्णु ठं सूर्यब्रह्माण च बृहस्पति ठं स्वाहा।। भो सोम इहागच्छ।।

सोमो नरविमानस्थो वरहस्तो गदाधरः ।
गौरो महोदरः श्रीमानवास्तोर्वामांस संस्थितः ।।

ॐ वय ठं सोम व्रते तवमनस्तुनूषूबिभ्रतः।। प्रजावंत सचेमहि ।।
ॐ भूर्भुवः स्वः सोम इहतिष्ठ ॐ सोमाय नमः ।।२९।।

(३०). (तदूर्ध्वपदद्वये वामांसे सर्प द्विपदमावाहयेत्)

आवाहयेच्च तं नागं फणासप्तकसंयुतम् ।
आगच्छोरगराजंस्त्वं क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ विष्णुर्नुकंवीर्य्याणी प्रवोचंय: पार्थिवानिविममेरजा ठं सियोऽअस्माक भायदुत्तर ठं सुधस्थं विचक्रमाण स्त्रेधोरुगायो विष्णवेत्वा।। भो सर्प इहागच्छ।।

कुंभमालाधरो द्वाभ्यां चतुर्बाहु: फणामणि: ।
सर्पोरक्तभ्रमो वास्तोर्वामोरुस्थलमाश्रित: ।।

ॐ उरु ठं हिराजावरुणश्चकारसूर्य्याय पंथामन्वेतवाऽउ।। अपदेपादा प्रतिधातवेकरुतापवक्तात्द्धदयाव्विधश्चित्।। नमोवरुणायाभिष्टितो वरुणस्यपाश:।। ॐ भूर्भुव: स्व: सर्प इह तिष्ठ ॐ सर्पाय नम:।।३०।।

(३१). (तदूर्ध्वपदद्वये वामश्रोत्रे अदितिं द्विपदामावाहेत्)

आवाहयामि तां देवीमदितिं देवमातरम् ।
द्विभुजां पद्महस्तां च सर्वाभरणभूषिताम् ।।
कश्यपस्य प्रियां भार्यां सुरूपां वामलोचनाम् ।
समागच्छदिते त्वं हि क्षेत्रेऽस्मिन्संनिधा भव ।।

ॐ इडऽएह्यदितऽएहि काम्याऽएत।। मयिव: कामधरणंभूयात्।। भो अदिते इहागच्छ।।

सूत्रवज्रांकुशाभीती बिभ्राणाख्यानभूषिता ।
अदितिश्चारुगौरांगी वास्तोर्वामिश्रुति स्थिता ।।

ॐ उतनोऽहिर्बुध्न्य: शृणोत्वजऽएकपात्पृथिवी समुद्र: ।
विश्वेदेवाऋतावृधोहुवानास्तुता। मंत्रा: कवि शस्ता अवंतु ।।

ॐ भूर्भुव: स्व: अदिते इहागच्छ ॐ अदितये नम: ।।३१।।

(३२). (तदूर्ध्वपदे वामनेत्रे दितिमेकपदामावाहयेत्)

दितिमावाहयिष्यामि दैत्यानां चैव मातरम् ।
शुभ्रांगी द्विभुजां चैव शूलपट्टिशधारिणीम् ।

अत्रागच्छ दिते त्वं हि क्षेत्रेऽस्मिन्संनिधा भव ॥

ॐ अदिति द्यौरदितिरंतरिक्षमदितिर्माता सपिता सपुत्रः।। विश्वेदेवा अदितिः पंचजना अदितिर्जात मदितिर्जनित्वम्।। भो दिते इहागच्छ।।

दितिस्तु श्यामला खड्गधारिणी शूलधारिणि ।

वृषासन्ना वास्तुपुंसो वामलोचनसंस्थिता ॥

ॐ हिरण्यरूपा उषसोविरोकउभाविदाउदिथः सूर्यश्च।। आरोहतं वरुण मित्रगर्तंततश्चक्षाथामदितिंदितिं च मित्रासि दिव्वरुणोसि।। ॐ भूर्भुवः स्वः दिते इह तिष्ठ ॐ दितये नमः।।३२।।

नोट :— ३२ से ४५ तक आवाहन क्रम में रंगीन चित्र में क्रमांक में भिन्नता है इसलिये क्रम अवलोकन करके स्थापना करे।

(३३). (ततः शिखिपदाधः स्थित कोणपदे मुखे अप एकदा आवाहेत्)

आप आवाहयिष्यामि सर्वदा वरदाः शिवाः ।

आपस्त्वायांतु सततं पवित्रा मंगला वराः ।

समागच्छंतु आपो वैकुर्वत्वस्मिन् हि संनिधिम् ॥

ॐ आपोहिष्ठामयो भुवस्तान ऊर्ज्जेदधातन। महेरणायचक्षसे।। भो आप इहागच्छत।।

आपो नीलाः पीतवस्त्रघनगाः पद्मभूषणाः ।

अक्षाब्जपाशपात्राणि बिभ्रत्यो वास्तुवक्रगाः ॥

ॐ आपोअस्मान्मातरः शुंधयन्तुघृतेननोघृतप्वः पुनंतु।। विश्व ठं हिरिप्रंवहंतिदेवीरुदिदाभ्यः शुचिरापूतऽएमि।। भो आप इह तिष्ठ ॐ अद्भ्यो नमः।।३३।।

(३४). (आग्नेयपदाधः कोणे पदेदक्षिणहस्ते सावित्रमेक पदमावाहयेत्)

हे सावित्र त्वमागच्छ सर्वध्वांतनिवारक ।

पूजां गृहाण देवेश मया भक्त्या समर्पिताम् ॥

ॐ हस्त आधाय सविताबिभ्रदभ्रि ठं हिरणमयीम्।। अग्नेर्ज्योतिर्निचा

य्यपृथिव्याऽ अद्ध्या भरदानुष्टभेनछंदसांगिरस्वत्।। भो सावित्र इहागच्छ।।

सावित्रो द्विभुजः पद्मगौरः पद्मासनस्थितः ।
वेदपाठरतोनित्यं वास्तोर्दक्षकराश्रितः ।।

ॐ उपयाम गृहीतोसि सावित्रो सिचनोधाश्चनोधाऽअसिचनोमयिधेहि। जिंवयज्ञं जिन्वपतिं भगायदेवीयत्वासवित्रे।। ॐ भूर्भुवः स्वः भो सावित्रे इह तिष्ठ ॐ सावित्राय नमः।।३४।।

(३५). (नैर्ऋति पितृगणोर्ध्वपदे मेढ्रे जयमेक पदतमावाहयेत्)

आवाहयामि तं देवं जयं यष्टिविधारकम् ।
जय त्वं हि समागच्छ क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ आषाढंयुत्सु पृतनासुपप्रि ७ँ स्वषामप्सां वृजिनस्य गोपाम्।। भरेषुजा ठँ सुक्षिति ठँ सुश्रव संजयं तंत्वामनुमदेम सोम।। भो जय इहागच्छ।।

जयो वज्रधरो देवो महोग्रोऽतुलविक्रमः ।
पीतवर्णो गजारूढो वास्तोर्मेढ्रसमाश्रितः ।।

ॐ गोत्रभिदगोविदं वज्रंबाहुं जयंत मज्मप्रमृणं तमोजसा।। इम ठँ सजाता ऽअनुवीरयध्वमिंद्र ठँ सखायो ऽअनुसठँरभध्वम्।। ॐ भूर्भुवः स्वः भो जय इह तिष्ठ ॐ जयाय (जयंताय)नमः।।३५।।

(३६). (वायव्य कोण पदे वामहस्ते रुद्रमेकपदमावाहयेत्)

आवाहयामि तं रुद्रं सर्वदा शंकरं विभुम् ।
उमाधिष्ठितवामांगं वरदाभय हस्तकम् ।।
जटागंगाधरं सौम्यं कर्पूराद्रिसमप्रभम् ।
आगच्छ भगवन् रुद्र क्षेत्रेऽस्मिन्संनिधो भव ।।

ॐ अव रुद्र मदीमह्य वदेवं त्र्यंबकम्। यथा नो वस्य सस्करद्यथानः श्रेयसस्करद्यथानोव्यवसाययात्।। भो रुद्र इहागच्छ।।

रुद्रो गोस्थो जटी त्र्यक्षोऽरुग्वराभयसूत्रधृक् ।
शुभ्रः कृत्त्यंबरो वास्तोर्वाम पाणितलाश्रितः ।।

ॐ यातेरुद्र शिवातनूर घोराऽपापकाशिनी।। तयानस्तन्वा शंतमया गिरिशंताभिचाकशीहि।। ॐ भूर्भुवः स्वः रुद्र इह तिष्ठ ॐ रुद्राय नमः।।३६।।

(३७). (ततो मध्यसंलग्नो परिस्थित पूर्व पदत्रये दक्षिणस्तने अर्यमणं त्रिपदमावाहयेत्)

अर्यमन् कुरु मे भद्रं संज्ञया सह सर्वदा ।
गृहाणेमां मया दत्तां पूजां देव नमोऽस्तु ते ।।

ॐ यदद्य सूर उदितेर नागामित्रोऽअर्य्यमा।। सुवाति सविताभाग:।। भो अर्यमन्निहागच्छ।।

अर्यमाऽर्जुनवर्णस्तु दीप्तिमान् रथवाहनः ।
सुपद्ममाली खट्वांगी वास्तोर्दक्षस्तन स्थितः ।।

ॐ अर्यमणं बृहस्पति मिंद्रंदानायचोदय।। वाचंविष्णु ँ सरस्वती ँ सवितारंचवाजिन ठं स्वाहा।। ॐ भूर्भुवः स्वः अर्य्यमन्निह इह तिष्ठ ॐ अर्यम्णे नमः।।३७।।

(३८). (तद्दक्षिणाग्नेय कोण पदे दक्षिणहस्ते सवितारमेक पदमावाहयेत्)

आवाहये सवितृमंडल मध्यसंस्थं सप्ताश्ववाहनयुतं
धृतपंकजं त्वाम् । केयुर कुंडलविधारक देहि
सौख्यं गृह्णीष्वमेऽर्चनमिदं भगवन्नमस्ते ।।

ॐ विश्वानि देव सवितर्दुरितानि परासुव।। यद्भद्रंतन्नआसुव।। भो सवितः इहागच्छ।।

सविता जनिता विश्वं द्विबाहुररुणच्छविः ।
रथगामी पद्मपाणिर्वास्तूदककरांगगः ।।

ॐ सवित्रा प्रसवित्रा सरस्वत्या वाचात्वष्ट्रारूपै पूष्णा पशुभिरिंद्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निनातेजसा सोमेनराज्ञा विष्णुना दशम्या देवतया प्रसुतः प्रसर्पामि।। ॐ भूर्भुवः स्वः सवितरिह इह तिष्ठ ॐ

सवित्रे नमः।।३८।।

(३९). (तदधो नैऋत्यकोणे पदादुपरि पदत्रये जठरदक्षिणभागे विवस्वंतं त्रिपदमावाहयेत्)

एह्येहि देव त्रिगुणात्मक त्वं हैमं समारुह्य तमो नुदन्वै ।
हस्तद्वये वै धृतचक्रपद्म गृहाण पूजां भगवन्नमस्ते ।।

ॐ विवस्वन्नादित्यैषते सोमपीथस्तस्मिन्मत्स्व।। श्रदस्मैनरो वच से दधातन यदाशीर्दादंपती वाममश्नुतः।। पुमान्पुत्रो जायते व्विंदतेव्व स्वधा विश्वाहारप ऽएधतेगृहे।। भो विवस्वान्निहागच्छ।।

विवस्वान् द्विभुजः शोणद्युतिश्चंडश्च पंकजी ।
कर्मसाक्षी रथी वास्तोः क्रोडदक्षिणभागगः ।।

ॐ मित्रस्य चर्षणी धृतोवोदेवस्यसानसि।। द्युम्नंचित्रश्रवस्तमम्।।
ॐ भूर्भुवः स्वः विवस्वन्निह तिष्ठ ॐ विवस्वते नमः।।३९।।

(४०). (तदधो नैऋत्यकोणैक पदे मेढ्रे बुधाधिपमेकपदमावाहयेत्)

एह्येहि वास्तौ विबुधाधिप त्वं गजाधिरूढो ममरक्षणाय।
वराप्सरोभिश्च विवीज्यमानो गृहाण पूजां भगवन्नमस्ते।।
ॐ वसोवोधिसूरिर्म्मघवा वसुपते वसुधावन्यु योधास्म
द्वेषां ठ सि विश्वकर्मणे स्वाहा ।।

भो विबुधाधिप इहागच्छ।।

सहस्राक्षो गजारूढः पीतांगो विबुधाधिपः
वज्रोत्पलकरः श्रीमान्वास्तोर्दक्षस्तनाश्रितः ।।

ॐ इंद्र आसांनेता बृहस्पति र्दक्षिणायज्ञः पुरएतुसोमः।। देवसेना नामभि भंजतीनां जयंतिनां मरुतोयंत्वग्रम्।। ॐ भूर्भुवः स्वः विबुधाधिप इह तिष्ठ ॐ विबुधाधिपतये नमः।।४०।।

(४१). (तदुत्तरपदत्रये जठरवामभागे मित्रं त्रिपदमावाहयेत्)

मित्र त्वमेह्यहि तमोपशांत्यै रत्नांब्जवज्रध्वज युक्त हस्त।
श्यामोर्ध्वभागेऽर्धसितस्वरूपो यथामनःस्थो भगवन् नमस्ते।।

ॐ मित्रोनऽएहिसुमित्रध ऽइंद्रस्यो रुमाविश दक्षिणमुशन्नुशंत ठं स्योनः स्योनम्।। स्वानभ्राजाङ्घोर बम्भारेहस्त सुहस्त कृशानवेतेवः सोमक्रयणास्तान्रक्षध्वंमावोदभन्।। भो मित्र इहागच्छ।।

हलाब्जध्वज वज्राख्यहस्तो मित्रो हरिस्थितः ।
ऊर्ध्वाधः श्यामगौरो वा वामपाण्यंगुलि स्थितः ।।

ॐ मित्रस्य चर्षणी धृतोवोदेवस्य सानसि।। द्युम्नंचित्र श्रवस्तमम्।। ॐ भूर्भुवः स्वः मित्र इह तिष्ठ ॐ मित्राय नमः।।४१।।

(४२). (तदुत्तरैक पदे वामहस्ते राजयक्ष्माणमेक पदमावाहयेत्)

आवाहयामि तं देव यक्ष्माणं राजसंज्ञकम् ।
नानाव्याधि समाकीर्णं रोगैश्च परिशोभितम् ।।
वामेन वरदं चैव दक्षिणेनाभयप्रदम् ।
आगच्छ यक्ष्मभगवन् पूजेयं प्रतिगृह्यताम् ।।

ॐ नाशयित्री बलासस्यार्शसऽउपचितामसि ।। अथोशतस्य यक्ष्माणाम्याकरोरसिनाशनी।। भो राजयक्ष्मन्निहागच्छ।।

वरशक्तिधरो ब्रह्मचर्यवान्बर्हिवाहनः ।
राजयक्ष्मा च नीलांगो वास्तोर्मेंद्रंसमाश्रितः ।।

ॐ इमंदेवाऽअसपत्न ठं सुवद्धंमहतेक्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेंद्रस्येंद्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशएषवोमीराजा सोमोस्माकं ब्राह्मणाना ठं राजा।। ॐ भूर्भुवः स्वः राजयक्ष्मन्निह इह तिष्ठ ॐ राजयक्ष्मणे नमः।।४२।।

(४३). (तत्राक्पदत्रये वामहस्ततले पृथ्वीधरं त्रिपदमावाहयेत्)

पृथ्वीधर त्वं मम मंडलेऽस्मिन्नाधारभूतो जगतीतलस्थः।
गृहे सुखं देहि सुखप्रद त्वं गृहाण पूजां भगवन्नमस्ते ।।

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी।। यच्छानः शर्म्मसप्रथाः।। भो पृथ्वीधर इहागच्छ।।

सहस्त्रवदनः श्रीमाञ्छंखचक्राक्ष कुंभभृत् ।

नीलः पृथ्वीधरो वास्तोर्वाम हस्तांगुलिस्थितः ।।

ॐ यदग्रामे यदरण्येयत्सभायां यदिन्द्रिये।। यदेनश्चकृमावयमिदंत दवयजामहे स्वाहा।। ॐ भूर्भुवः स्वः पृथ्वीधर इह तिष्ठ ॐ पृथ्वीध राय नमः।।४३।।

(४४). (तदुपरि एकपदे वक्षः स्थले आपवत्समेकपदमावाहयेत्)

आपवत्स त्वमेह्येहि कूर्मस्कंध वरप्रद ।
पूजां गृहाण देवेश कुंभहस्त नमोऽस्तु ते ।।

ॐ आतेवत्सोमनो यमत्परमाच्चित्सुधस्थात्।। अग्नेत्वां कामयागिरा।। भो आपवत्स इहागच्छ।।

आपवत्सोमहातेजा द्विभुजः सिंहवाहनः ।
वर पाशधरो गौरो वास्तवोर्वक्षसि संस्थितः ।।

ॐ आपोहिष्ठा मयोभुवस्तान ऊर्जेदधातन।। महेरणायचक्षसे।। ॐ भूर्भुवः स्वः आपवत्स इह तिष्ठ ॐ आपवत्साय नमः।।४४।।

(४५). (मध्ये नवपदे वास्तोर्र्द्धये ब्रह्माणं नवपदमावाहयेत्)

आवाहयामि देवेशमूर्द्धभागे व्यवस्थितम् ।
हंसयानसमारूढं सूर्यकोटि समप्रभम् ।।
चतुर्मुखं चर्तुबाहुं चर्तुर्वेदसमन्वितम् ।
पुस्तकं चाक्षसूत्रादि दधानं च कमंडलुम् ।
विश्वकर्माख्यनामानं देवतागण पूजितम् ।।

आगच्छ भगवन्ब्रह्मन्क्षेत्रे ऽस्मिन्संनिधो भव।। ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णूरथेष्ठाः सभेयोयुवास्य यजमानस्य वीरोजायतां निकामेनिकामेनः पर्जन्यो वर्षतु फलवत्योनऽ ओषधयः पच्यंतां योगक्षेमोनः कल्पताम्।। भो ब्रह्मन्निहागच्छ।।

चतुर्मुखोऽरुणो ब्रह्माऽक्ष मालास्त्रुवतोयभृत् ।

लंबोदरोहंसरथः श्मश्रुलो वास्तुत्त्ह त्स्थितः ।।

ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेनआवः।। सबुध्न्या उपमा अस्यविष्ठाः सतश्चयोनिमसतश्चविवः।। ॐ भूर्भुवः स्वः ब्रह्मन्निह इह तिष्ठ ॐ ब्रह्मणे नमः।।४५।।

(४६). (ततो मंडलस्य बाह्ये ईशानादिकोणेषु क्रमेण चरकीं १ विदारीं २ पूतनां ३ राक्षसीं ४ पूजयेत्।। तद्यथा अहमावाहयिष्यामि चरकीं नाम राक्षसीम्)

अंकुशं डमरुं शंखे कुंडलं चापि बिभ्रतीम् ।
आगच्छ चरकि त्वं हि पूजेयं प्रतिगृह्यताम् ।।

ॐ यंतेदेवी निर्ऋतिराबबंध पाशंग्रीवास्व विचृत्यम्।। तन्ते व्विष्याम्यायुषोनमद्ध्यादथैतं पितुमद्धिप्रसूतः।। नमोभूत्यैयेदंचकार।। ॐ भू भुर्वः स्वः चरकी इहागच्छेह तिष्ठ ॐ चरक्यै नमः।।१।।

(४७). (आग्नेय्यां विदारीमावाहयेत्)

आवाहयामि तां दैत्यां बिडालीसद्दशाननाम् ।
विशालरोममांसाढ्यां चापबाणधरां वराम् ।
विदारि त्वमिहागच्छ पूजेयं प्रतिगृह्यताम् ।।

ॐ अक्षराजाय कितवंकृताया दिनवदंशत्रितायै कल्पिनंद्वापराया धिकल्पिन मास्कंदाय सभास्थाणु मृत्यवेग्गोव्यच्छमंतकाय गोघा तंक्षुधे योगां विकृंतंतं भिक्षमाण उपतिष्ठति दुष्कृतयाचरकाचार्यं पाप्मनेसैलगम्।। ॐ भूर्भुवः स्वः विदारि इहागच्छेह तिष्ठ ॐ विदार्य्यै नमः।।२।।

(४७). (ततोनैर्ऋत्यां पूतनामावाहयेत्)

पूतने त्वमिहागच्छ राक्षसीगण संयुते ।
मया निवेदितां पूजां गृहाण वरदा भव ।।

ॐ इंद्रस्य क्रोडोदित्यै पाजस्यन्दिशांजत्रवोदित्यै भसज्जी—मूतान्त्ध्दयौपशेनांतरिक्षम्पुरीतता नभऽउदर्येण चक्रवाकौमतस्नाभ्यां

दिवंवृक्षाभ्यांगिरीन्प्लाशिभि रुपलान्प्लीन्हावल्मीकान्क्लोमभि ग्लौं भिर्गुल्माह्निराभिः स्रवंतीर्ह्रदान्कुक्षिभ्या ७ समुद्रमुदरेणवैश्वानरंभस्मना।। ३ॐ भूर्भुवः स्वः पूतने इहागच्छेह तिष्ठ पूतनायै नमः।।३।।

(४९). (अथ वायव्ये पापराक्षसीमावाहयेत्)

अहमावाहयिष्यामि राक्षसीं पापपूर्विकाम् ।
रक्ताननां धूम्रवस्त्रां राक्षसीगण संयुताम् ।
राक्षसि त्वमिहागच्छ पूजेयं प्रतिगृह्यताम् ।।

३ॐ यस्यास्तेघोरआसं जुहोम्येषांबंधानाम व सर्जनाय।। यांत्वाज नोभूमिरिति प्रमंदते निर्ऋतिन्त्वाहम्परिवेदविश्वतः।। ३ॐ भूर्भुवः स्वः पापराक्षस्यै नमः।।४।।

(५०). (पूर्वदक्षिण पश्चिमोत्तरदिक्षु क्रमेण)

स्कंदम् १ अर्यमणं २ जृंभकं ३ पिलिपिच्छम् ४ आवाहयेत्।। तथाहि।। (स्कंद)

आवाहयामि देवेशं षण्मुखं कृत्तिकासुतम् ।।
रुद्रतेजस्समुत्पन्नं देवसेना समन्वितम् ।।
मयूरवाहनं शक्तिपाणिं वै ब्रह्मचारिणम् ।
आगच्छ भगवन्स्कंद क्षेत्रेऽस्मिन्संनिधो भव ।।

३ॐ यत्र बाणाः संपतंतिकुमारा विशिखाइव।। तन्नऽइंद्रो बृहस्पतिरदितिः शर्म्मयच्छतु विश्वाहाशर्मयच्छतु।। । ३ॐ भूर्भुवः स्वः स्कंद इहागच्छेह तिष्ठ ३ॐ स्कंदाय नमः।।१।।

(५१). (दक्षिणे अर्यमणमावाहयेत्)

आवाहयामि देवेशमर्यमणं पितृनायकम् ।
महिषंदिव्यमारूढं दंडपाणिं शुभेक्षणम् ।।१।।
कर्मणां फलदातारं लोकानां कर्मसाक्षिणम् ।
एहि त्वमर्यमन्देव क्षेत्रेऽस्मिसंनिधो भव ।।२।।

३ॐ यदद्यसूर उदितेरनागामित्रोऽअर्यमा सुवति सविताभगः।। ३ॐ

भूर्भुवः स्वः अर्यमन्निह तिष्ठ अर्यम्णे नमः।।२।।

(५१). (पश्चिमे जृंभकमावाहयेत्)

आवाहये तं प्रचुरं च मुख्यं जृंभायमाणं वरखङ्गहस्तम् ।
प्रत्यग्दिशायां च सुरक्षणीयमत्रैव वासं कुरु जृंभक त्वम् ।।

ॐ हिङ्कारायस्वाहा हिङ्कृतायस्वाहा क्रन्दतेस्वाहा वक्रंदाय स्वाहा प्रोथते स्वाहा प्रपोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गते स्वाहा। सीनायस्वाहा शयानायस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कूजतेस्वाहा प्रबुद्धायस्वाहा विजृंभमाणायस्वाहा विचृत्तायस्वाहा सठं हानायस्वाहो पस्थितायस्वाहा यनायस्वाहा प्रायणायस्वाहा । ॐ भूर्भुवः स्वः जृंभक इह तिष्ठ ॐ जृभकायः नमः।।३।।

(५३). (उत्तरे पिलिपिच्छमावाहयेत्)

आवाहये तं पिलिपिच्छकं च मयूरपिच्छानि विधारयंतम् ।
वामे तु हस्ते धनुरादधानं बाणं दधानं त्वितरे तु हस्ते ।।

ॐ कास्विदासीत्पूर्व चित्तिः कि ठं स्विदासीद्बृहद्वयः।। कास्विदासीत्पिलिप्पिलाका स्विदासीत्पिशंगिला।। । ॐ भूर्भुवः स्वः पिलिपिच्छ इह तिष्ठ ॐ पिलिपिच्छाय नमंः।।४।।

(एवं प्रागादिदिक्षु गणेशं १ दुर्गो २ वायुं २ बीभत्सं ४ यथानुक्रमेण स्थापयेत्।।)

कई पद्धतियों में यह आवाहन नहीं है अतः स्वविवेकानुसार करें।

पूर्वे गणेशाय नमः गणेशं स्थापयामि।।१।। दक्षिणे दुर्गायै नमः दुर्गे स्थापयामि।।२।। पश्चिमे वायवे नमः वायुं स्थापयामि।।३।। उत्तरे बीभत्साय नमः बीभत्सं स्थापयामि।।

(५४—५७). (एवं तथा लोकपालचतुष्टयं स्थापयेत्)

पूर्वे उग्रसेसनाय नमः उग्रसेनंस्थापयामि।।१।। दक्षिणे डामराय

नमः डामरं स्थापयामि।।२।। पश्चिमे महाकालाय नमः महाकालं स्थापयामि।।३।। उत्तरे अश्विभ्यां नमः अश्विनौ स्थापयामि।।४।।

(५८—६५). (पूर्वाद्यष्टदिक्षु)

इन्द्रस्त्वग्निर्यमश्चैव निर्ऋतिर्वरुणस्तथा वायुः सोमश्च रुद्रश्च इत्यष्टौ दिशी देवताः।१।। तद्यथा—

(पूर्वे इन्द्रमावाहयेत्)

चतुर्दंतगजारूढो वज्रपाणिः पुरंदरः ।
दंप्राचीपतिस्तु ध्यातव्यो नानाभरण भूषितः ।।
ॐ त्रातारमिंद्रमवितारमिंद्र ठं हवे हवे सुहवठं शूरमिन्द्रम्
ह्वयामि शक्रं पुरुहूतमिंद्र ठं स्वस्ति नो मघवा धात्विंद्रः।।

ॐ भूर्भुवः स्वः पूर्वे इन्द्रमावाहयामि।। भो इंद्र इहागच्छेह तिष्ठ ॐ इंद्राय नमः।१।।

(अग्निकोणेऽग्निमावाहयेत्)

पिंगलः श्मश्रुकेशाक्षः पिंगक्षो जटिलोऽरुणः ।
छागस्थः साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः ।।

ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवया सिसीष्ठाः।। यजिष्ठो वह्नितमः शोशुचानो विश्वेद्वेषां ठं सिप्रमुमुग्ध्यस्मत्।। ॐ भूर्भुवः स्वः अग्निमावाहयामि।। भो अग्ने इहागच्छेह तिष्ठ ॐ अग्नेय नमः।।२।।

(दक्षिणे यमावाहयेत्)

ईषत्पीतो यमो ध्येयो दंडहस्तो विजानता।१।। ॐ यमायत्वा मखायत्वा सूर्यस्यत्वातपसे।। देवस्त्वा सवितामध्वानक्तपृथिव्याः स ठं स्पृशस्पाहि।। अर्चिरसि शोचिरसितपोसि।। ॐ भूर्भुवः स्वः यममावाहयामि।। भो यम इहागच्छेह तिष्ठ ॐ यमाय नमः।।३।।

(अथ नैर्ऋतिमावाहयेत्)

रक्तदृक्पाशधृैक्क्रुद्धो निर्ऋति विंकृताननः ।

पुंस्थित: खड्गहस्तश्च भूतवान् राक्षसप्रिय: ।।

ॐ असुन्वंतम यजमान मिच्छस्तेन स्येत्यामन्विहितस्करस्य।। अन्यमस्मदिच्छसात इत्यानमोदेवि निर्ऋतेतुभ्यमस्तु।। ॐ भूर्भुव: स्व: निर्ऋतिमावाहयामि।। भो निर्ऋते इहागच्छेह तिष्ठ ॐ निर्ऋत्ये नम:।।४।।

(अथ पश्चिमे वरुणमावाहयेत्)

वरुण: पाशभृत्सौम्य: प्रतीच्यां मकराश्रित: ।
अवाहयामि वरुणं क्षेत्रेऽस्मिन्सन्निधो भव ।।

ॐ तत्त्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानोहविर्भि:।। अहेडमानो वरुणेहबोध्युरुश ठं समानऽआयु: प्रमोषी:।। ॐ भूर्भुव: स्व: वरुणमावाहयामि।। भो वरुण इहागच्छेह तिष्ठ ॐ वरुणाय नम:।।५।।

(अथ वायव्वे वायुमावाहयेत्)

धावन्हरिणपृष्ठस्थो ध्वजधारी समीरण: ।
वरदानकरो धूम्रवर्ण: कार्यो विजानता ।।

ॐ आनोनियुद्भि: शतिनीभिरध्वर ठं सहस्त्रिणी भिरुपयाहियज्ञम्।। वायोऽअस्मिन्सवनेमादय स्व यूय यातस्वस्तिभि: सदान:।। ॐ भू भुव: स्व: वायो मावाहयामि।। भो वायो इहागच्छेह तिष्ठ ॐ वायवे नम:।।६।।

(उत्तरे कुबेरमावाहयेत्)

दशाश्वरथग: सोमो गदाधारी नृरूपधृक् ।
उदीचीदिक्संप्रविष्ट: कुबेर: पातु सर्वदा ।।

ॐ वय ठं सोमव्रते तवमनस्तनूषुबिभ्रत:।। प्रजावंत: सचेमही।। ॐ भूर्भुव: स्व: कुबेरमावाहयामि स्थापयामि ॐ कुबेराय नम:।।७।।

(ईशाने ईशानमावहयेत्)

ईशान: पंचवक्त्रश्च खट्वांगी चंद्रशेखर: ।

भक्ताभयप्रदो देवः पूजां गृह्णातु मत्कृताम् ॥

ॐ तमीशानं जगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम्॥ पूषा नोयथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ॐ भूर्भुवः स्वः ईशानमावाहयामि स्थापयामि ॐ ईशानाय नमः॥८॥

ततो रुद्रं १ भूमिं २ चावाहयेत्॥

(६६). (तत्रेशानपूर्वेयोर्मध्ये रुद्रेमावाहयेत्)

पंचवक्रं दशभुजं त्रिनेत्रं स्मितसुन्दरम् ।
कर्पूरगौरं चंद्रार्धशेखरं सुविभूषितम् ॥
नीलग्रीवमनाहारं व्याघ्रचर्मां बरावृतम् ।
कमंडल्वक्षसूत्रादि पाश शूलधरं हरम् ।
उद्दंड दंड डमरुं खट्वांगाभयपात्रकम् ॥

ॐ अस्मेरुद्रामेहना पर्वतासोवृत्रहत्येभरहूतौ सजोषाः॥ यःश ठ व्रतेस्तुवते धायिपज्रऽइंद्रज्येष्ठाऽअस्माँअवंतुदेवाः॥ ॐ भूर्भुवः स्वः रुद्रमावाहयामि स्थापयामि ॐ रुद्राय नमः॥९॥

(६७). (निर्ऋतिपश्चिमयोर्मध्ये भूमिमावाहयेत्)

ससुवर्णा मही प्रोक्ता सर्वाभरण भूषिता ।
चतुर्भुजा सौम्य वपुश्चंद्रांश सद्दशाबरा ॥
रक्तपात्रं सस्यपात्रं पात्रमौषधि संयुतम् ।
पद्माकरां भूमिदेवीमिह चावाहयाम्यहम् ॥

ॐ स्योना पृथिवि नोभवानृक्षरा निवेशनी॥ यच्छानः शर्मसप्रथाः॥ ॐ भूर्भुवः स्वः भूमिमावाहयामि स्थापयामि ॐ भूम्यै नमः॥

मण्डलाद्वहि कृष्णपरिधौ पूर्वादि क्रमेण — (६८) हेतुकाय नमः (६९) त्रिपुरान्तकाय नमः (७०) अग्निवैतालाय नमः (७१) असिवैतालाय. (७२) कालाय. (७३) करालाय. (७४) एकपादाय. (७५) भीमरूपाय., (७६) पूर्वईशानमध्ये — खेचराय.। (७७) नैर्ऋत्य वरुणमध्ये — तलवासिने नमः।

अत्र: ब्रह्मादिपंचचत्वारिशत्सुरान्प्रत्येकत्र वा कांडानुसमयेन पदार्थानुसमयेन वा षोडशोपचारै: पंचोपचारैर्वा प्रणवादिनमोतेन स्वस्वनाममंत्रेण पूजयेत्।।

वास्तुमूर्ति अग्न्युतारणपूर्वकं प्राणप्रतिष्ठा कुर्यात्

इति पीठ देवता: संपूज्य आवाह्य अनंतरं वास्तुमंडल मध्येगृहस्योत्तरे वा यथाविधि घटं पीठं वा संस्थाप्य प्रधानवास्तुपुरुषं पूजयेत्।। इत्यादीन् देवान् सकलोपचारै: पृथक् पूजयेत्तंत्रेण वा।। इह स्थापितदेवताभ्य इमानि गंधाक्षत पुष्पधूप दीपाच्छादनानी प्रत्येकं पात्रस्थित नैवेद्यमेकत्र वा नैवेद्यमुदक फल तांबूलादीनुपचारान् सर्मपयामि नमः।। यथा यथाविभागं पूजनम्।। इत्यङ्गदेवता: संपूज्य तदनंतरं मंडलमध्ये एवं मंडूकादिदेवेभ्यो नममः।। तत्रादौ वास्तुमूर्ति ताम्रपात्रे संस्थाप्य अग्न्युत्तारणं कुर्यात्।। आचम्य प्राणानायम्य देशकालौ संकीर्त्य ३ॐ तत्सदिति अस्यां मूर्तौ अवघातादिदोषपरिहारार्थग्न्युत्तारणं देवतासांनिध्यार्थे प्राणप्रतिष्ठां च करिष्ये।। समुद्रस्यत्वेत्सष्टाभिर्ऋग्भि: प्रथमावृत्तौ दुग्धधारां द्वितीयावृत्तौ जलधारां च प्रतिमायां पात्रस्थितायां दद्यात्।।

तत्र मंत्रा:— ३ॐ समुद्रस्यत्वावकयाग्नेपरिव्ययामसि।। पावको अस्मभ्य ठं शिवोभव।१।। हिमस्यत्वा जरायुणाग्ने परिव्ययामसि।। पावको अस्मभ्य ठं शिवोभव।।२।। उपज्मन्नु पवेत सेवतरनदीष्वा।। अग्नेपित्तमपाम — सिमंडूकिताभिरागहिसेमन्नो यज्ञंपावक वर्णठं शिवंकृधि।।३।। अपामिदन्न्ययन ठं समुद्रस्य निवेशनम्। अन्यास्ते अस्मत्तपंतुहेतय: पावकोअस्मभ्य ठं शिवो भव।।४।। अग्नेपावक रोचिषामंद्रयादेव जिह्वया। आदेवान्वक्षियक्षि च।।५।। सन: पावक दीदिवोऽग्नेदेवाँ।। इहावह।। उपयज्ञ ठं हविश्चन:।।६।। पावक यायश्चित यंत्या कृपाक्षामन्नुरुच ऽउषसोनभानुना।। तूर्वन्नयामन्नेतशस्य

नूरणऽआयोघृणेन ततृषाणोऽ अजरः।।७।। नमस्ते हरसेशोचिषेनमस्ते अस्त्वर्चिषे।। अन्याँस्ते अस्मत्तपंतुहेतयः पावको अस्मभ्य ठ शिवोभव।।८।। इति पात्रस्थवास्तु प्रतिमोपरि अनेनाग्निसूक्तेन समग्रेण दुग्धधारां दद्यात्।। द्वितीयावृत्तिसूक्तं पठंजलधारां दद्यात्।। इति रीत्याऽग्न्युत्तरणं कुर्यात्।। ततः शुद्धजलेन प्रक्षाल्य प्राणप्रतिष्ठां कुर्यात्।।

पश्चात् षोडशोपचार से पूजा करे।

अथ चतुष्षष्टि योगिनी स्थापनम्

साधारण क्रम में अगर मंडल नहीं बनाये तो मातृका मंडल पर प्रत्येक कोष्ठक में चार चार का आवाहन करें।

अलग मंडल बनायें तो ६४ खानो का मंडप वस्त्र पर वायव्य कोण में मंडल बनावें। कई पद्धितियों में नैऋत्य से अग्निकोण यानेः पश्चिम से पूर्व के ओर क्रमशः कोष्ठक में स्थापित करने की लिखी है परन्तु तंत्र के अनुसार प्रत्येक योगिनी दिशा के द्दष्टिकोण से सही नहीं बैठता है अतः रक्त वस्त्र पर पहले नव कोष्ठक वनायें, मध्य कोष्ठक में योनि बनायें।

मध्य कोष्ठक के बाहर सब अष्ट कोष्ठो में अष्टदल बनायें एवं पूर्वादि क्रम से हर कोष्ठक में अष्टयोगिनियों की स्थापना करें।

वैसे तो वास्तु योगिनी क्षेत्रपाल आदि के प्रत्येक देवताओं के चारों वेदों के चार—चार मंत्र है पहले केवल नाम मात्र से आवाहन फिर वेदमंत्र से आवाहन पूजा क्रम दिया गया है। आवाहन चतुर्थी से व स्थापना प्रथमा से करें।

मध्यकोष्ठे कलश पूर्णपात्रोपरि योनिमध्ये -

ॐ भूर्भुवः स्वः महाकाल्यै नमः महाकाल्यै नमः महाकाली आवाहयामि स्थापयामि।

ॐ भूर्भुवः स्वः महालक्ष्म्यै नमः आ. स्था.। ॐ भूर्भुवः स्वः महासरस्वत्यै नमः आ. स्था.।।

पूर्वे अष्टदलेषु -

।।१।। गजाननायै. ।।२।। सिंहमुख्यै. ।।३।। गृध्रास्यायै. ।।४।।

काकतुण्डै. ।।५।। उष्ट्रग्रीवायै. ।।६।। हयग्रीवायै. ।।७।। वाराह्यै. ।।८।। शरभाननायै।

आग्नेयां अष्टदलेषु -

।।९।। उलूकिकायै. ।।१०।। शिवारावायै. ।।११।। मयूर्यै. ।।१२।। विकटाननायै. ।।१३।। अष्टवक्रायै. ।।१४।। कोटराक्ष्यै. ।।१५।। कुब्जायै. ।।१६।। विकटलोचनायै।। आ. स्था.।

दक्षिणस्याम् अष्टदलेषु -

।।१७।। शुष्कोदर्यै. ।।१८।। ललज्जिह्वायै. ।।१९।। अश्वदंष्ट्रायै. ।।२०।। वानराननायै. ।।२१। रुक्षाक्ष्यै. ।।२२।। केकराक्ष्यै. ।।२३।। बृहत्तुण्डायै. ।।२४।। सुराप्रियायै. ।। आ. स्था.।।

नैर्ऋत्यां अष्टदलेषु -

।।२५।। कपालहस्तायै. ।।२६।। रक्ताक्ष्यै. ।।२७।। शुक्यै. ।।२८।। श्वेन्यै. ।।२९। कपोतिकायै. ।।३०।। पाशहस्तायै. ।।३१।। दण्डहस्तायै. ।।३२।। प्रचण्डायै. ।। आ. स्था.।।

पश्चिम्यां अष्टदलेषु -

।।३३।। चण्डविक्रमायै. ।।३४।। शिशुघ्न्यै. ।।३५।। पापहन्त्र्यै. ।।३६। काल्यै. ।।३७।। रुधिरपायिन्यै. ।।३८।। वसाधयायै. ।।३९।। गर्भभक्षायै. ।।४०।। शवहस्तायै. ।। आ. स्था.।।

वायव्यां अष्टदलेषु -

।।४१।। आमन्त्रमालिन्यै. ।।४२।। स्थूलकेश्यै. ।।४३।। बृहत्कुक्ष्यै. ।।४४।। सर्पास्यायै. ।।४५।। प्रेतवाहनायै. ।।४६।। दन्दशूककरायै. ।।४७।। क्रोञ्च्यै. ।।४८। मृगशीर्षायै. ।। आ. स्था.।।

उत्तरे अष्टदलेषु -

।।४९।। वृषाननायै. ।।५०।। व्यात्तास्यायै. ।।५१।। धूमनि:श्वासायै. ।।५२। व्योमैकचरणोर्ध्वदृशे. ।।५३।। तापिन्यै. ।।५४।। शोषणीदृष्ट्यै. ।।५५।। कौटर्यै. ।।५६।। स्थूलनासिकायै. ।। आ. स्था.।।

ईशाने अष्टदलेषु -

।।५७ विद्युत्प्रभायै. ।।५८।। बलाकास्यायै. ।।५९।। मार्जायै. ।।६०।।

कटपूतनायै. ।।६१।। अट्टाट्टहासायै. ।६२।। कामाक्ष्यै. ।।६३। मृगाक्ष्यै. ।।६४।। मृगलोचनायै. ।। आ. स्था.।।

ॐ भूर्भुवः स्वः ह्रीं सर्वार्थ सिद्धिदात्रि योगिन्यै नमः गजनानादि चतुःषष्टि योगिनी सहिताय इहेगच्छेह तिष्ठ।

ततो सर्वेषां गंधादिना संपूजयेत्।। बलिं दद्यात्।।

अथ मंत्रसहितेन् योगिन्या ऽऽवाहनम्

योगिनी मंडल पर मंत्र सहित आवाहन करना हो तोमध्य में महाकाली, महालक्ष्मी का आवाहन करें। तत्पश्चात् पूर्वादिक्रम के आठ कोष्ठकों के अष्टदलों अष्ट–अष्ट योगिनीयों का आवाहन करे। चतुर्थी से आवाहन तथा प्रथमा से स्थापन करें।

मध्य कोष्ठे कलशोपरि योनि मध्ये -

ॐ खड्गं चक्र.....मंत्रेण। ॐ भूर्भुवः स्वः महाकाल्यै नमः महाकाली आवाहयामि स्थापयामि।। ॐ अक्षस्रक् परशु.....। ॐ भूर्भुवः स्वः महालक्ष्म्यै नमः महालक्ष्मी आ. स्था.। ॐ घंटाशूल हलानि.....। ॐ भूर्भुवः स्वः महासरस्वतै नमः महासरस्वती आ. स्था.।।३।।

पूर्वे अष्टदलेषुः-

तमीशानंजगतस्तस्थुषस्पति धियञ्जिन्वमवसे हूमहे वयम्। पूषानो यथा वेदसामसद् वृधे रक्षिता पायुरदब्ध स्वस्तये।। ॐ भूर्भुवः स्वः गजाननायै नमः आ. स्था.।।१।। आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइष व्योति व्याधि महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।। ॐ भूर्भुवः स्वः सिंहमुख्यै नमः आ. स्था.।।२।। ॐ महाँऽइंद्रो य ओजसा पर्जन्यो वृष्टिमाँ इव। स्तोमैर्वत्सस्य वावृधे। उपयाम गृहीतोऽसि महेन्द्रायत्वेषते यानिर्महेन्द्राय त्वा।। ॐ भूर्भुवः स्वः गृधास्यायै नमः आ. स्था.।।३।। सद्योजातो व्यमिमीत यज्ञमग्निर्देवानाम भवत्पुरोगाः। अस्य होतुः प्रदिश्यतस्य वाचिस्वाहा

कृत ँ हविरदन्तु देवा:।। ॐ भूर्भुव: स्व: काकतुण्डै नम: आ. स्था. ।।४।।

ॐ आदित्यं गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम्। परिवृङ्धि हरसा माभिम ठं स्था: शतायुषं कृणुहि चीयमान:।। ॐ भूर्भुव: स्व: उष्ट्रगीवायै नम: आ. स्था. ।। ॐ स्वर्ण घर्म: स्वाहा स्वर्णार्क: स्वाहा स्वर्ण शुक्र: स्वाहा स्वर्ण ज्योति: स्वाहा स्चर्ण सूर्य: स्वाहा।। ॐ भूर्भुव: स्व: हयग्रीवायै नम: आ. स्था.।।६।। ॐ सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च म महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम्।। ॐ भूर्भुव: स्व: वराह्यै नम: आ. स्था.।।७।। ॐ भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितार ठं सर्वेभ्यो लोकेभ्य: उपसेक्तारम व ऋत्यै वधायोपमन्थितारं मेधाय वास: पल्पूलीं प्रकामाय रजयित्रीम्।। ॐ भूर्भुव: स्व: शरभाननायै नम: आ. स्था.।।८।।

आग्नेयां अष्टदलेषु

ॐ जिह्वा मे भद्रं वाङ्महोमनोमन्यु: स्वराड् भाम:। मोदा: प्रमोदा अंगुलीरङ्गानि मित्रं मे सह:।। ॐ भूर्भुव: स्व: उलूकिकायै नम: आ. स्था.।।९।। ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा वक्रन्दाय स्वाहा प्रोथते स्वाहा प्रपोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा स ठं हानाय स्वाहो पस्थिताय स्वाहायनाय स्वाहा प्रायणायस्वाहा।। ॐ भूर्भुव: स्व: शिवारावायै नम: आ.स्था. ।।१०।। अग्निश्च मे घर्मश्च मे ऽर्कश्च मे सूर्यश्च मे प्राणश्च मे ऽश्वमेघश्च मे पृथिवी च मे ऽदितिश्च मे दितिश्च मे द्यौश्च मे ऽङ्गुलय: शक्यरयो दिशश्चमे यज्ञेन कल्पन्ताम्।। ॐ भूर्भुव: स्व: मयूर्यै नम:। आ. स्था.।।११।। ॐ पूषन तवव्रतेवयं न

रिष्येम कदाचन। स्तोतारस्त ऽइहस्मसि।। ॐ भूर्भुवः स्वः विकटाननायै नमः। आ. स्था.।१२।।

ॐ वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्। यूपेन यूप आप्यते प्रणीतो अग्निरग्निना।। ॐ भूर्भुवः स्वः अष्टवक्रायै नमः। आ. स्था ।१३।। ॐ अयमग्निः सहस्त्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम्।। ॐ भूर्भुवः स्वः कोटराक्ष्यै नमः। आ. स्था.।१४।। ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके।। ॐ भूर्भुवः स्वः कुब्जायै नमः। आ. स्था.।१५।। ॐ यमाय त्वा सूर्यस्य त्वा तपसे। देवस्त्वा सविता मध्वानक्तु पृथिव्याः स ठं स्पृशस्पाहि। अर्चिरसि शोचिरसि तपोऽसि।। ॐ भूर्भुवः स्वः विकटलोचनायै नमः। आ. स्था.।१६।।

दक्षिणकोष्ठे अष्टदलेषु -

ॐ यमेम दत्तं त्रित एनमायुनगिन्द्र एणं प्रथम अध्यतिष्ठत्। गंधर्वो अस्य रशनाम गृब्णात्सूरादश्वं वसवो निरतष्ट।। ॐ भू र्भुवः स्वः शष्कोदर्यै नमः। आ. स्था.।१७।। ॐ मित्रस्य चर्षणी घृतोऽवो देवस्य सानसि। द्युम्नं चित्र श्रवस्तमम्।। ॐ भू र्भुवः स्वः लल्लजिह्वायै नमः। आ. स्था.।१८।। ॐ अग्ने ब्रह्मगृब्भ्णीस्व धरुणमस्तरिक्षं दृ ठं ह ब्रह्मवनि त्वा क्षवनि सजात वन्युपदधामि भ्रातृव्यस्य वधाय। विश्वाभ्यस्त्वाशाभ्य ऽउपदधामि चित्तस्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यद्ध्वम्।। ॐ भूर्भुवः स्वः अश्वदंष्ट्रायै नमः आ. स्था.।१९।। ॐ भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः। भगप्रनोजनय गोभिरश्वैर्भग प्रन्नृभिर्नृवन्तः स्याम।। ॐ भूर्भुवः स्वः वानराननायै नमः। आ. स्था.।।२०।।

ॐ सुपर्णो ऽसि गरुत्मान् पृष्ठे पृथिव्याःसीद। भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तमान तेजसा दिश उद्दृ ठं ह ।। ॐ भूर्भुवः स्वः रुक्षाक्ष्यै (ऋक्षाक्ष्यै) नमः। आ. स्था.।। ॐ पितृभ्यः स्वधायिभ्य स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः

स्वधायिभ्य स्वधा नमः। अक्षन्पितरो ऽमीमदन्त पितरो ऽती तृपन्त पितरः पितरः शुन्धध्वम्।। ३ॐ भूर्भुवः स्वः केकराक्ष्यै नमः। आ. स्था. ।।२२।। ३ॐ या ते रुद्र शिवा तनूरघोरा ऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ता भिचाकशीहि।। ३ॐ भूर्भुवः स्वः बृहत्तुण्डायै नमः। आ. स्था.।।२३।। ३ॐ वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतान्न सुराषधसः।। ३ॐ भूर्भुवः स्वः सुरप्रियायै नमः। आ. स्था. ।।२४।।

नैर्ऋत्यां अष्टदलेषु -

३ॐ ह ठ स: शुचिषद्वसुरन्तरिक्ष सद्होता वेदिषदतिथिर्दुरोणसत्। नृषद्वरस दृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृह .: ३ॐ भूर्भुवः स्वः कपाल हस्तायै नमः। आ. स्था.।।२५।। ३ॐ सुसन्दृशं त्वा वयं मघवन्वन्दिषी महि। प्रनूनं पूर्णबन्धुरस्तुतो यासिवशां ऽअनु यो जान्विद्रते हरि।। ३ॐ भूर्भुवः स्वः रक्ताक्ष्यै नमः। आ. स्था।।२६।। ३ॐ देवीरापो अपान्नपाद्यो ऊमिर्हविष्य इन्द्रियावान्मदिन्तमः। तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भागस्थ स्वाहा।। ३ॐ भूर्भुवः स्वः शुक्यै नमः। आ. स्था. ।।२७।। ३ॐ प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वा संपदे त्वा तेजोऽसि तेजसे त्वा त्रिवृदसि।। ३ॐ भूर्भुवः स्वः श्वेन्यै नमः। आ. स्था.।।२८।।

३ॐ द्वारो देवी रन्वस्य विश्वेव्रता ददन्ते अग्नेः। तुरु व्यचसो धाम्ना पत्यमानाः।। ३ॐ भू. कपोतिकायै नमः। आ. स्था.।।२९।। ३ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददे नारिरसि।। ३ॐ भूर्भुवः स्वः पाशहस्तायै नमः। आ. स्था.।।३०।। ३ॐ भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवोभिः। दिवि मूर्द्धानं दधिषे स्वर्षां जिह्वामग्ने च कृषे हव्यवाहम्।। ३ॐ भूर्भुवः स्वः दण्डहस्तायै नमः। आ. स्था.।।३१।। ३ॐ कदाचन स्तरीरसि नेन्द सश्चसि दाशुषे। उपोपेन्नु मघवन्भूयः इन्नुते दानन्देवस्य पृच्यत आदित्येभ्यस्त्वा।। ३ॐ भूर्भुवः स्वः प्रचण्डायै नमः। आ. स्था।।३२।।

पश्चिम कोष्ठे अष्टदलेषु -

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ठं सस्तनूभिर्व्यशेमहि देवहितं यदायुः।। ॐ भूर्भुवः स्वः चण्डविक्रमायै नमः। आ. स्था.।।३३।। ॐ इषे त्वोर्जे त्वा वायवस्थं देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इंद्राय भागं प्रजवतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघ श ठं सो ध्रुवा अस्मिन् गोपतौस्यात् बह्वीर्यजमानस्यस्य पशून् पाहि।। ॐ भूर्भुवः स्वः शिशुघ्न्यै नमः। आ. स्था.।।३४।। ॐ देवी द्यावा पृथिवी मखस्य वामद्यशिरो राध्यासं देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।। ॐ भूर्भुवः स्वः पापहन्त्र्यै नमः।। आ. स्था।।३५।। ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव।। ॐ भूर्भुवः स्वः काल्यै नमः। आ. स्था.।।३६।।

ॐ असुन्वन्तम यजमानमिच्छस्ते नस्येत्यामन्विहि तस्करस्य। अन्यमस्मदिच्छ सात इत्या नमो देवि निर्ऋते तुभ्यमस्तु।। ॐ भूर्भुवः स्वः रुधिरपायिन्यै नमः। आ. स्था.।।३७।। ॐ अग्निश्चमे घर्मश्चमे अर्कश्च मे सूर्यश्च मे प्राणश्च मे ऽश्मेघश्च मे पृथिवी च मे ऽदितिश्चमे दितिश्चमे द्यौश्चमे ऽगुंलयः शक्करयो दिशश्च मे यज्ञेन कल्पन्ताम्।। ॐ भूर्भुवः स्वः वसाधयायै नमः।। आ. स्था.।।३८।। ॐ वह्वीनां पिता बहुरस्य पुत्रश्चिचश्चाकृणोति समनावगत्य। इषुधिः लंकाः पृतनाश्च सर्वाः पृष्ठे निनद्घो जयति प्रभूतः।। ॐ भूर्भुवः स्वः गर्भभक्षायै नमः। आ. स्था.।।३९।। ॐ नमस्ते रुद्रमन्यव ऽउतोत ऽइषवे नमः। बाहुभ्यामुत ते नमः। ॐ भूर्भुवः स्वः शवहस्तायै नमः। आ. स्था.।।४०।।

वायवां अष्टदलेषु -

ऋतंचमे ऽमृतंचमे ऽयक्ष्मंचमे ऽनामयच्चमे जीवातुश्चमे दीर्घायुत्वंचमे ऽमित्रंचमे ऽभयंचमे सुखंचमे शयनंचमे सूषाश्चमे सुदिनंचमे यज्ञेन कल्पन्ताम्।। ॐ भूर्भुवः स्वः आन्त्रमालिन्यै नमः। आ. स्था.।।४१।। ॐ ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे। अप शत्रून्विध्यता ठं संविदाने आर्त्नी इमे विस्फुरन्ती अमित्रान्।। ॐ भूर्भुवः स्वः स्थूलकेश्यै

नम:। आ. स्था.।।४२।। ॐ वेद्या वेदि: समाप्यते बर्हिषा बर्हिरिन्द्रयम्। यूपेन यूप आप्यते प्रणीतो अग्निरग्निना।। ॐ भूर्भुव: स्व: वृहत्कुक्ष्यै नम:। आ. स्था.।।४३।। ॐ पावका न: सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टुधिया वसु:।। ॐ भूर्भुव: स्व: सर्पास्यायै नम:। आ. स्था. ।।४४।।

ॐ अस्कन्नमद्य देवभ्य: ऽआज्य ठं संभ्रिया समङ्घ्रिणा विष्णो मा त्वावक्रमिष वसुमतीमग्ने तेच्छायामुपस्थेषं विष्णो: स्थानमसीत इन्द्रो वीर्यमकृणोदूर्ध्वो ऽध्वरआस्त्थात्।। ॐ भूर्भुव: स्व: प्रेतवाहनायै नम:। आ. स्था.।।४५।। ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे। अप शत्रून्विध्यता ठं संविदाने आर्त्नी इमे विस्फुरन्ती अमित्रान्।। ॐ भूर्भुव: स्व: दन्दशूककरायै नम:। आ. स्था.।।४६।। ॐ महीद्यौ: पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभि।। ॐ भू र्भुव: स्व: क्रोञ्च्यै नम:। आ. स्था.।।४७।। ॐ उपयाम गृहीतोऽसि सावित्रोऽसि च नो मयि धेहि। जिन्व यज्ञपति भगाय देवाय त्वा सवित्रे।। ॐ भूर्भुव: स्व: मृगशीर्षायै नम:। आ. स्था.।।४८।।

उत्तरे अष्टदलेषु -

ॐ आप्यायस्व समेतुते विश्वत: सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे।। ॐ भूर्भुव: स्व: वृषाननायै नम:। आ. स्था.।।४९।। ॐ कार्षिरसि समुद्रस्य त्वाक्षित्या उन्नयामि। समापो अद्भिरग्मत समोष- धीभिरोषधी:।। ॐ भूर्भुव: स्व: व्यात्तास्यायै नम:। आ. स्था.।।५०।। ॐ त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात्।। ॐ त्र्यंबकं यजामहे सुगन्धिं पतिवेदनम्। उर्वारुकमिव बंधनादितो मुक्षीय मामुत:।। ॐ भूर्भुव: स्व: धूमनिश्वासायै नम:। आ. स्था.।।५१।। श्रीश्चते लक्ष्मीश्च ते पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनो व्यात्तम्। इष्णन्निषाणा मुंम इषाण सर्वलोकम्म इषाण।। ॐ भूर्भुव: स्व: व्योमैक चरणोर्ध्वदृशे नम:। आ. स्था.।।५२।। ॐ विष्णो रराटमसि विष्णो: श्नप्त्रेस्थो विष्णो: स्यूरसि विष्णो

धुर्वोऽसि। वैष्णवमसि विष्णवे त्वा।। ॐ भूर्भुवः स्वः तागिन्यै नमः। आ. स्था.।।५३।। ॐ ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमृषि मार्षेय ठं सुधातु दक्षिणम्। अस्मद्राता देवत्रागच्छत प्रदातारमाविशत् । ॐ भूर्भुवः स्वः शोषणीदृष्ट्यै नमः। आ. स्था.।।५४।। ॐ आनो भद्राः क्रतवो यन्तु विश्वतो दब्धासो अपरीतासः उद्भिदः। देवानो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे।। ॐ भूर्भुवः स्वः कोटर्यै नमः। आ. स्था.।।५५।। ॐ एका च मे तिस्रश्चमे पञ्चमे पञ्चमे सप्तचमे सप्तचमे नवचमे नवचमे एकादशचमे एकादशचमे त्रयोदशचमे त्रयोदशचमे पञ्चदशचमे पञ्चदशचमे सप्तदशचमे नवदशचमे नवदशचमे एकविर्ठशतिश्चमे एकविर्ठशतिश्चमे त्रयोविर्ठशतिश्चमे त्रयोविर्ठशतिश्चमे पञ्चविर्ठशतिश्चमे पञ्चविर्ठशतिश्चमे सप्तविर्ठशतिश्चमे सप्तविर्ठशतिश्चमे नवदिर्ठशतिश्चमे नवविर्ठशतिश्चमे एकत्रिर्ठशच्चमे एकत्रिर्ठशच्चमे त्रयत्रिर्ठशच्चमे यज्ञेन कल्पन्ताम्।। ॐ भूर्भुवः स्वः स्थूलनासिकायै नमः। आ. स्था.।।५६।।

ईशानकोष्ठे अष्टदलेषुः –

ॐ ब्रह्माणि मे मतयः श ठं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः। आशासते प्रतिहर्यन्त्युक्थेमा हरोवहतस्ता नो अच्छ।। ॐ भूर्भुवः स्वः विद्युत्प्रभायै नमः। आ. स्था.।।५७।। ॐ असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम्। तेषार्ठ सहस्त्र योजनेऽव धन्वानि तन्मसि।। ॐ भूर्भुवः स्वः बालाकास्यायै नमः। आ. स्था.।।५८।। ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरोगायत्रं चक्षुबृहथन्तरे पक्षौ। स्तोम आत्मा छन्दा ठं स्यङ्गानि यजूर्ठषिनाम। सामते तनूर्वामदेव्यं यज्ञाः यज्ञियं पुच्छं धिष्ण्याः शफा सुपर्णो गरुत्मान्दिवं गच्छ स्वः पत।। ॐ भूर्भुवः स्वः मार्जायै नमः। आ. स्था.।।५९।। ॐ या ते रुद्र शिवा तनूरघोरा ऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि।। ॐ भूर्भुवः स्वः कटपूतानायै नमः। आ. स्था. ।।६०।। ॐ देवी द्यावा पृथिवी मखस्य वामद्य शिरो राध्या सं देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।। ॐ भूर्भुवः स्वः अट्टाटहासायै

नमः। आ. स्था.॥६१॥ ३ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधेपदम्। समूढमस्य पा ठं सुरे स्वाहा॥ ३ॐ भूर्भुवः स्वः कामाक्ष्यै नमः। आ. स्था.॥६२॥ ३ॐ वृष्ण ऊर्मिरसि राष्ट्रदाराष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदाराष्ट्रममुष्यै देहि वृषसेनोसि राष्ट्रदाराष्ट्रम्मे देहि स्वाहा। वृषसेनोऽसि राष्ट्रदाराष्ट्रममुष्यै देहि॥ ३ॐ भूर्भुवः स्वः मृगाक्ष्यै नमः। आ. स्था.॥६३॥ ३ॐ भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितार ठं सर्वेभ्यो लोकेभ्य उपसेक्तारमव ऋत्यै वधायोपमन्थितारं मेधाय वासः पल्पूली प्रकामाय रजयित्रीम्॥ ३ॐ भूर्भुवः स्वः मृगलोचनायै नमः। मृगलोचनीं आ. स्था.॥६४॥

३ॐ भूर्भुवः स्वः ह्रीं सर्वार्थ सिद्धिदात्रि योगिन्यै नमः। गजाननादि चतुःषष्टि योगिन्यै सहिताय इहेगच्छेहतिष्ठ। ततो गंधादिभि संपूजयेत्। बलिं दद्यात्॥

॥ इति चतुष्षष्टी योगिनी पूजनम्॥

अथ एकपंचाशत्क्षेत्रपाल स्थापनम्

वायव्य कोण में कृष्ण अथवा रक्त वा श्वेतवस्त्र पर नवकोष्ठक बनायें मध्य कोष्ठक में अष्टदल या उर्ध्वमुखी त्रिकोण बनाये, कलश स्थापन करें।

मध्ये स्थापित कलशोपरि पूर्णपात्रे -

॥१॥ ३ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं। ३ॐ भूर्भुवः स्वः बटुकाय, क्षेत्रपालाय नमः, आवाहयामि स्थापयामि। भो क्षेत्रपाल इहागच्छ इह तिष्ठ।

पूर्वे षड्दलेषु -

॥२॥ अजराय. ॥३॥ व्यापकाय. ॥४॥ इंद्रचौराय. ॥५॥ इंद्रमूर्तये. ॥६॥ उक्षाय. ॥७॥ कृष्माण्डाय.

आग्नेयदिकोष्ठे षड्दले -

॥८॥ वरुणाय. ॥९। बटुकाय. ॥१०॥ विमुक्ताय. ॥११॥ लिप्तकाय. ॥१२॥ लीलाकाय. ॥१३॥ एकद्रष्ट्राय. ।

दक्षिणदिक्कोष्ठे षड्दले -

।।१४।। ऐरावताय. ।।१५।। ओषधिघ्नाय. ।।१६।। बंधनाय. ।।१७। दिव्यकाय. ।।१८।। कंबलाय. ।।१९। भीषणाय. ।

नैर्ऋत्यदिषड्दले -

।।२०।। गवयाय. ।।२१।। घण्टाय. ।।२२।। व्यालाय. ।।२३।। अणवे ।।२४।। चन्द्रवारुणाय. ।।२५।। पटाटोपाय. ।।

पश्चिमदिषड्दले -

।।२६।। जटालाय. ।।२७।। क्रतवे ।।२८।। घंटेश्वराय. ।।२८।। विटङ्काय. ।।३०।। मणिमानाय. ।।३१।। गणबन्धवे.।

वायव्यदिषड्दले -

।।३२।। डामराय. ।।३३।। दुण्ढिकर्णाय. ।।३४।। स्थविराय. ।।३५।। दन्तुराय. ।।३६।। धनदाय. ।।३७।। नागकर्णाय. ।

उत्तरदिषड्दले -

।।३८।। महाबलाय. ।।३९।। फेत्काराय. ।।४०।। चीकराय. (चीत्काराय) ।।४१।। सिंहाय: ।।४२।। मृगाय. ।।४३।। अंतिमृदले अर्धभागे– यक्षाय. ।।४४।। अंतिमृदले उत्तरार्धभागे मेघवाहनायै.।

ईशानदिषड्दले -

- ।।४५।। तीक्ष्णोष्ठाय. ।।४६।। अनलाय. ।।४७।। शुक्ल तुण्डाय. ।।४८।। सुधापालाय. ।।४९।। बर्बरकाय. ।।५०।। अन्तिमददलार्धे – पवनाय. ।।५१।। अन्तिम दलार्धे पवनादुत्तरत: – पावनाय.। ॐ भूर्भूव: स्व: सर्वेभ्यो क्षेत्रपालेभ्यो नम:। गंधादिभि: संपूज्य बलिं दद्यात्।

अथ प्रति मंत्रेण क्षेत्रपाल देवताऽऽवाहन्

इस पुस्तक में जो नाम क्षेत्रपालों के पूर्व में नामावलि में दिये गये है उसी क्रम में मंत्र दिये गये है संख्या ३१ के बाद से क्रम अन्य प्रचलित मंत्रात्मक पद्धति से भिन्न है।

पूर्वे षड्दलेषु

१. ॐ इमौ ते पक्षा वजरौपतत्रिणौयाभ्या ठं रक्षा ठं स्यपह ठं

स्यग्ने। ताभ्यां पतेम सुकृतामुलोकं यत्र ऋषयो जग्मु:। प्रथमजा: पुराणा:।

ॐ भूर्भुव: स्व: अजराय नम:। आ. स्था.।

२. ॐ प्रथमावा ठं सरथिना सुवर्णौ देवौ पश्यन्तौ भुवनानिविश्वा । अपिप्रयञ्चोदना वामिमाना होतारा ज्योति: प्रदिशादिशन्ता।।

ॐ भूर्भुव: स्व: व्यापकाय नम:। आ. स्था.।

३. ॐ इन्द्रस्यवज्रोसि वाजसास्त्वयायं वाज ठं सेत् । वाजस्यनु प्रसवे मातरम्महीं—मदितिन्नाम वचसा करामहे। यस्यामिदं विश्वम्भुवनमाविवेशतस्यान्नो देव: सविता धर्म साविषत् ।।

ॐ भूर्भुव: स्व: इन्द्रचौराय नम:। आ. स्था.।

४. ॐ एवेदिन्द्रम् वृषणं वज्र बाहुं वसिष्ठासो ऽअभ्यर्चन्त्यर्कै: । सनस्तुतो वीर वद्धातु गोमद्यूयम्पात स्वस्तिभि: सदान: ।।

ॐ भूर्भुव: स्व: इन्द्रमूर्तये नम:। आ. स्था.।

५. ॐ उक्षा समुद्रो अरुण: सुपर्ण: पूर्वस्य योनिं पितुरा विवेश । मद्ध्ये दिवोनिहित: पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ।।

ॐ भूर्भुव: स्व: उक्षणे नम:। आ. स्था.।

६. ॐ यद्देवा: देवहेडनन्देवा सश्चकृमावयम् । अग्निर्मातस्मादेन सोविश्वान् मुञ्चत्व ठं हस: ।।

ॐ भूर्भुव: स्व: कूष्माण्डाय नम:। आ. स्था.।

(आग्नेय पटद्दलेषु)

७. ॐ स न इन्द्रायज्ज्यवे वरुणाय मरुद्भय:। वरिवोवित्परिस्त्रव ।।

ॐ भूर्भुव: स्व: वरुणाय नम:। आ. स्था.।

८. बाहु मे बलमिन्द्रिय ठं हस्तौ मेकर्म्मवीर्यम्। आत्क्माक्षत्रमुरोमम।।

ॐ भूर्भुव: स्व: बटुकाय नम:। आ. स्था.।

९. ॐ मुञ्चन्तु मा शपत्थ्यादथो वरुण्यादुत। अथोयमस्य पड्वी शात्सर्वस्माद्देव किल्बिषात् ॥

॥ ॐ भूर्भुवः स्वः विमुक्ताय नमः। आ. स्था.॥

१०. ॐ कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ठं समाः । एवन्त्वयिनान्यथेतोस्तिन कर्मलिप्यतेनरे ॥

॥ ॐ भूर्भुवः स्वः लिप्तकाय नमः। आ. स्था.॥

११. ॐ सन्नः सिन्धुरवभृथायोद्यतः समुद्रोभ्य वह्नियमाणः सलिलः प्रप्लुतोययोरोजसास्कभितारजा ठं सिवीर्ये भिर्वीरतमा शविष्ठा। या पत्येते अप्रतीता सहोभिर्विष्णू ऽ अगन्वरुणा पूर्वहूतौ ॥

॥ ॐ भूर्भुवः स्वः लीलाकाय नमः। आ. स्था.॥

१२. ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः ॥

॥ ॐ भूर्भुवः स्वः एकदंष्ट्राय नमः। आ. स्था.॥

(दक्षिणे षड्दलेषु)

१३. ॐ अर्मेभ्यो हस्ति पंजवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसे जपालमिरायै कीना शङ्कीलालायसुराकारं भद्राय गृहप ठं श्रेयसे वित्तधमाद्ध्यक्षा यानुक्षत्तारम् ॥

॥ ॐ भूर्भुवः स्वः ऐवरावताय नमः। आ. स्था.॥

१४. ॐ ओषधिःप्रति मोदद्धुं पुष्पवती प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥

॥ ॐ भूर्भुवः स्वः औषधीध्नाय नमः। आ. स्था.॥

१५. ॐ त्र्यबकं यजामहे सुगंधिम् पुष्टिवर्धनम् । उर्वारुकमिव बंधननान् मृत्योमुक्षीय मामृतात् ॥

॥ ॐ भूर्भुवः स्वः बन्धनाय नमः। आ. स्था.॥

१६. ॐ देवसवितरेषते सोमस्त ठं रक्षस्वमात्वादभन्। एतत्वन्देव सोमदेवो देवाँ २ उपागा इदमहं मनुष्यांत्सहरायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये ।।

।। ॐ भूर्भुव: स्व: दिव्यकराय नम:। आ. स्था.।।

१७. सीसेन तन्त्रम् मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञ ठं सविता सरस्वतीन्द्रस्य रूपंवरुणोभिषज्यन् ।।

।। ॐ भूर्भुव: स्व: कम्बलाय नम:। आ. स्था.।।

१८. ॐ आशु: शिशानो वृषभो न भीमो घनाघन: क्षोभणश्चर्षणीनाम्। संक्रन्दनो निमिष एकवीर शत ठं सेना अजय त्साकमिन्द्र: ।।

।। ॐ भूर्भुव: स्व: भीषणाय नम:। आ. स्था.।।

नैऋत्यां षड्दले

१९. ॐ इम ठं साहस्रम् ठं शतधार मुत्संव्यच्यमान ठं सरिरस्यमध्ये। घृतन्दुहानामदितिञ्जना याग्नेमाहि ठं सी: परमे व्योमन् ।।

।। ॐ भूर्भुव: स्व: गवयाय नम:। आ. स्था.।।

२०. ॐ कुंभो विनिष्ठुर्जनिता शचीभिर्यस्मिन् ऽग्नेयोन्याङ्गर्भोऽअंत:। ल्पाशिर्व्यक्त: शतधार उत्सोदुहेन कंभी स्वधां पितृभ्य: ।।

।। ॐ भूर्भुव: स्व: घण्टाय नम:। आ. स्था.।।

२१. ॐ आक्रन्दय बलमोजोन आधानिष्ठ निहि दुरिता बाधमान: । अपप्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ।।

।। ॐ भूर्भुव: स्व: कालाय नम:। आ. स्था.।।

२२. ॐ इन्द्रा याहि चित्रभानो सुता ऽइमेत्वायव: । अण्वीभिस्तना पूतास: ।।

।। ॐ भूर्भुव: स्व: अंशवे नम:। आ. स्था.।।

२३. ॐ चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि । रयिं पिशङ्गम्बहुलं पुरुस्पृह ठं हरिरेति कनिक्रदत् ।।

।। ॐ भूर्भुवः स्वः चन्द्रवारुणाय नमः। आ. स्था.।।

२४. ॐ गणानांत्वा गणपति ठं — इति मन्त्रेण।

।। ॐ भूर्भुवः स्वः घटाटोपाय नमः। आ. स्था.।।

पश्चिमे षट्दलेषु

२५. ॐ उग्रं लोहितेन मित्र ठं सौव्रत्येन रुद्रन्दौः व्रत्येनेन्द्रं प्रक्रीडेनमरुतो बलेन साद्धयान्प्रमुदा। भवस्य कण्ठ्य ठं रुद्रस्यान्तः पार्श्वर्य महादेवस्य यकृच्छर्वस्य वनिष्टुः पशुपतेः पुरीतत् ।।

।। ॐ भूर्भुवः स्वः जटिलाय नमः। आ. स्था.।।

२६. पवित्रेण पुनीहिमा शुक्रेण देव दीद्यत्। अग्ने कृत्वा क्रतूँरनू ।।

।। ॐ भूर्भुवः स्वः क्रतवे नमः। आ. स्था.।।

२७. ॐ अजिघ्र कलशं मह्या त्वा विशान्त्विन्दवः। पुनरूर्जा निवर्त्त स्वसानः। सहस्त्रं धुक्क्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः।।

।। ॐ भूर्भुवः स्वः घण्टेश्वराय नमः आ. स्था.।।

२८. ॐ वायोशुक्रो अयामिते मद्धो अग्रदिविष्टिषु । आयाहि सोमपीतये स्पार्हो देवनियुत्वता ।।

।। ॐ भूर्भुवः स्वः विकराय नमः। आ. स्था.।।

२९. ॐ देव्या होतारा भिषजेन्द्रेण सयुजायुजा । जगतीच्छन्द इन्द्रिय मनड्वां गौर्वयोदधुः ।।

।। ॐ भूर्भुवः स्व; मणिमानाय नमः। आ. स्था.।।

३०. ॐ त्रीणि त आहुः दिविबन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे । उतवमे वरुणच्छन्त्स्यर्वन्य त्रात आहुः परमं जनित्रम् ।।

।। ॐ भूर्भुवः स्वः गणबन्धनाय नमः । आ. स्था.।।

(वायव्यादि कोष्ठे षट्दलेषु)

३१. सि ठं ह्यसि स्वाहा सि ठं ह्यस्यादित्यवनिः स्वाहा सि ठं हयसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सि ठं हयसि सुप्रजावनी रायस्पोषवनिः

स्वाहा सि ठं ह्यस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ।।

।।ॐ भूर्भुवः स्वः डामराय नमः। आ. स्था.।।

(मतांतरयाय)

३१. ॐ प्रतिश्रुत्काया अर्तनङ् घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकठं शब्दायाडं बराघातं महसे वीणा वादङ्क्रोशाय तूणवध्म मवस्पराय शङ्खध्मं वनाय वनप मन्यतोरण्यायदावपम् ।।

।। ॐ भूर्भुवः स्वः मुण्डाय नमः आ. स्था.।।

३२. ॐ भद्रं कर्णेभि श्रृणुयाम् देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरै रङ्गैस्तुष्टुवा ठं सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।

।। ॐ भूर्भुवः स्वः ढुण्ढिकरणाय नमः। आ. स्था.।।

उत्तरे षड्दलेषु

३३. ॐ अपां फेनेन नमुचेः शिर इन्द्रोदवर्त्तयः विश्वायद जयस्पृधः।।

।। ॐ भूर्भुवः स्वः स्थविराय नमः। आ. स्था.।।

३४. ॐ वातंप्राणेना पानेन नासिके उपयाम मधरेणौष्ठेनसदुत्तरेण प्रकाशेनान्तर मनूकाशेन बाह्यन्निवेष्यं मूर्द्धान् स्तनयित्कु – निर्बाधेनाशनिं मस्तिष्केण विद्युतङ्कनीकाभ्याङ्कर्णाभ्या ठं श्रोत्र ठं श्रोणाभ्याङ्कर्णौते दनीमधर कण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिरदिति ठं शीर्ष्णा निर्ऋतिं निर्जः जल्येन शीर्ष्णा सङ्क्रोशैः प्राणां न्रेष्माण ठंस्तुपेन।

।। ॐ भूर्भुवः स्वः दन्तुराय नमः। आ. स्था.।।

(मतांतरयाय)

३४. ॐ सुपर्णे वस्ते मृगो अस्यादन्तोगोभिः सन्नद्धा पततिप्रसूता । यत्रानरः सञ्चविचद्र वन्तितत्रास्मभ्यमिषवः शर्मय ठं सन् ।।

।। ॐ भूर्भुवः स्वः वैनाय नमः आ.। स्था.।।

३५. ॐ इद ठं हविः प्रजननम्मे अस्तु दशवीर ठं सर्वगण ॳ स्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसन्न्य भय

सनि। अग्निः प्रजांबहुलां मे करोत्वन्नं पयोरेतो अस्मासुधत्त।।

।। ॐ भूर्भुवः स्वः धनदाय नमः। आ. स्था.।।

३६. ॐ खङ्गौ वैश्वदेवः। श्वाकृष्णः कर्णोगर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सि ठं होमारुतः कृकलासः पिपाका शकुनिस्तशरव्यायै विश्वेषान् देवानां पृषतः ।।

।।ॐ भूर्भुवः स्व नागकर्णकाय नमः। आ. स्था।।

उत्तरादि षड्दले

३७. ॐ मृगो न भीमः कुचरो गिरिष्ठाः परावतऽ आजगन्था परस्याः। सृक ठं स ठं शाय पविमिन्द्र तिग्मं शत्रून ताड्ढि विमृधो नूदस्व ।।

।। ॐ भूर्भुवः स्वः महाबलाय नमः। आ. स्था.।।

३८. ॐ इन्दुर्दक्षः श्यनऽऋता वाहिरण्य पक्षः शकुनो भुरण्यः । महांत्सधस्थेद्धुव आनिषतो नमस्ते अस्तु मा माहि ठं सीः ।।

।। ॐ भूर्भुवः स्वः फेत्कराय नमः। आ. स्था.।।

३९. ॐ चित्रन् देवाना मुदगादनीकञ्चक्षुः मित्रस्य वरुणस्याग्नेः । आप्राद्यावा पृथिवी अंतरिक्ष ठं सूर्य आत्मा जगतस्तस्त्थुषश्चः स्वाहा।।

।। ॐ भूर्भुवः स्वः चित्काराय नमः। आ. स्था.।।

ईशानादि षड्दलेषु

४०. ॐ तीव्रान्घोषान् कृण्वते वृषपाणयोश्वारथेभिः सहवाजयन्तः। अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ।।

।। ॐ भूर्भुवः स्वः सिंहाय नमः। आ. स्था.।।

४१. ॐ अग्निदूतम् पुरोदधे हव्यवाह मुपब्रवे। देवाँ आसादयादिह।।

।। ॐ भूर्भुवः स्वः मृगाय नमः। आ. स्था.।।

४२. आदित्यास्त्वा मूर्द्धन्नाजिघर्भि देवयजने पृथिव्या इडायास्पदमसि घृतवत् स्वाहा। अस्मेरमस्वास्मेते बन्धु स्त्व

रायोमेरायो मावायः रायस्पोषेण वियौष्मतो तोरायः ।।

।। ३ॐ भूर्भुवः स्वः यक्षाय (विक्षाय) नमः। (अंतिम दलार्द्ध भागे) आ. स्था.।।

४३. ३ॐ द्यौस्तेपृथिवीं अंतरिक्षं वायुः छिद्रं पृणातुते । सूर्यस्ते नक्षत्रैः सहलोकंकृणोतु साधुया ।।

।। ३ॐ भूर्भुवः स्वः मेघवाहनाय नमः (अंतिम दले उत्तर भागे)। आ. स्था.।।

४४. ३ॐ सबर्हिरग्निः पूषण्वान्त्स्तीर्ण बर्हिरमर्त्यः । बृहतीच्छन्दद इन्द्रियन्त्रिवत्सो गौर्वयोदधुः ।।

।। ३ॐ भूर्भुवः स्वः तिक्षणाय नमः। आ. स्था.।।

४५. ३ॐ अग्नि मूर्द्धा दिवः ककुत्पतिः पृथिवा ऽअयम । अपां ठ रेता ठ सिजिन्वति ।।

३ॐ भूर्भुवः स्वः अनलाय नमः। आ. स्था.।।

४६. ३ॐ अभ्यर्षत सुष्टुतिङ्ग व्यमाजिमस्मा सुभद्रां द्रविणानिधत्त। इमं यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ।।

।। ३ॐ भूर्भुवः स्वः (शुक्राय) शुक्लतुण्डाय नमः। आ. स्था.।।

४७. ३ॐ वनस्पते वीड्वङ्गोहिभूया अस्मत्सखा प्रतरणः सुवीरः । गोभिः सनद्धो असिवीडयस्वास्त्थाता तेजयत जेत्वानि ।।

।। ३ॐ भूर्भुवः स्वः सुधापालाय नमः। आ. स्था.।।

४८. ३ॐ शुद्धबालः सर्वशुद्ध बालो मणिबालस्त आश्विनाः श्येतः श्येताक्षो रुणस्ते रुद्राय पशुपतये कर्णायामा अवलिप्ता रौद्रान नभोरूपाः पार्जन्याः ।।

।। ३ॐ भूर्भुवः स्वः बर्बूकराय नमः आ. स्था.।।

४९. ३ॐ अग्ने अच्छा वदेहनः प्रतिनः सुमनाभव । प्रनोयच्छ सहस्त्र जित्व ठ हि धनदा असि स्वाहा ।।

।। ३ॐ भूर्भुवः स्वः पवनाय नमः। अंतिमदले पूर्वार्धभागे आ. स्था।।

५०. ॐ पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः ।
य: पोता स पुनातु मा ।।

।। ॐ भूर्भुवः स्वः पावनाय (माला) नमः। (अंतिम दले उत्तरार्द्धभागे) आ. स्था.।।

मध्यकोष्ठे

५१. ॐ क्षां क्षीं क्षौं क्षं क्षः क्षेत्रपालाय नमः ॐ क्षेत्रस्य योनिरसि क्षत्रस्यनाभिरसि मा त्वाहि ठ सीन्मा हि ठ सीः ।।

।। ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः। आ. स्था.।।

अथ सर्वतोभद्रमंडल देवता स्थापनम्

सर्वतो भद्रमंडल में मध्य में चार श्वेत पद में ब्रह्मा का स्थान है उसके चारों ओर १२ रक्त पद है, उनके चारों ओर पीतवर्ण के २० पद है जिसको कर्णिका कहते है। परिधि समीप चारों कोणों में श्वेत पुंज त्रिपद खण्ड है। कर्णिका व परिधि के बीच चारों दिशा में श्वेत पुंज की २४ पद की वापी है। हर वापी के दोनों ओर रक्त पुंज के ९ पद के भद्र है, कुल आठ भद्र है बनते है। ब्रह्मा से ईशानादि चतुष्कोणों में कृष्ण वर्ण की ५ पद की बल्लियाँ है, प्रत्येक बल्लि के दोनो ओर हरित श्रृंखला है।

हस्ते पुष्पाक्षत मादाय - मध्ये कलशोपरि

१. ॐ ब्रह्मणे नमः ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छ इहतिष्ठ।

दिक्पाल स्थापनम्—परिधि समीप श्वेत खण्डो में उत्तर से वायव्यतक।

२. ॐ भूर्भुवः स्वः सोमाय नमः सोम इहागच्छ इहतिष्ठ (उत्तरे)।
३. ॐ भूर्भुवः स्वः ईशानाय नमः ईशान इहागच्छ इहतिष्ठ (खण्डेंदौ)।
४. ॐ भूर्भुवः स्वः इंद्राय नमः इंद्र इहागच्छ इहतिष्ठ (पूर्वे)।
५. ॐ भूर्भुवः स्वः अग्नये नमः अग्निम् इहागच्छ इहतिष्ठ (खण्डेंदौ)।
६. ॐ भूर्भुवः स्वः यमाय नमः यमेहागच्छ इहतिष्ठ (दक्षिणे)।
७. ॐ भूर्भुवः स्वः नैर्ऋतये नमः नैर्ऋत्येहागच्छ इहतिष्ठ (नैऋत्ये, खण्डेंदौ)।
८. ॐ भूर्भुवः स्वः वरुणाय नमः वरुण इहागच्छ इहतिष्ठ (पश्चिमे)।
९. ॐ भूर्भुवः स्वः वायवे नमः वायो इहागच्छ इहतिष्ठ (वायव्ये,

खण्डेंदौ)।

भद्रमंडले स्थापनम् - (रक्त पुंजेषु)

10 वायु सोमयोर्मध्ये -

ॐ भूर्भुव: स्व: अष्टवसुभ्यो नम: अष्टवसु आ. स्था.।

11. सोमईशानयोर्मध्ये-

ॐ भूर्भुव: स्व: एकादशरुद्रेभ्यो नम: एकादशरुद्रान् आ. स्था.।

12. ईशानपूर्वयोर्मध्ये-

ॐ भूर्भुव: स्व: द्वादशादित्येभ्यो नम: द्वादिशादित्यान् आ. स्था.।

13. इन्द्र0ग्नयोर्मध्ये-

ॐ भूर्भुव: स्व: अश्विनाभ्यां नम: अश्विनौ आ. स्था.।

14. अग्नियमयोर्मध्ये-

ॐ भूर्भुव: स्व: विश्वेभ्यो देवेभ्यो पितृभ्यो नम: विश्वेदेवा स पितरान् आ. स्था।

15. यमनिर्ऋतिर्मध्ये-

ॐ भूर्भुव: स्व: सप्तयक्षेभ्यो नम: सप्तयक्षान् आ. स्था.।

16. निर्ऋति वरुणयोर्मध्ये-

ॐ भूर्भुव: स्व: भूतनागेभ्यो सर्पेभ्यों नम: भूतनागान्, सर्पान् आ. स्था.।

17. वरुणवाय्वोर्मध्ये-

ॐ भूर्भुव: स्व: गंधर्वाप्सरोभ्यो नम: गंधर्वाप्सरस: आ. स्था.।

18 उत्तरे – (ब्रह्म सोमयोर्मध्ये श्वेत २४ पुंजेषु वाप्याम् कर्णिका के समीप में)

ॐ भूर्भुव: स्व: स्कंदाय नम: स्कन्द इहागच्छेह तिष्ठ।

19. स्कंद के उत्तर में -

ॐ भूर्भुत: स्व: नन्दिने नम: नंदीश्वर इहागच्छेह तिष्ठ(वाप्याम्)।

20. नंदी के उत्तर में (वाप्याम्)

ॐ भूर्भुव: स्व: शूलमहाकालाभ्यां नम: शूलमहाकालौ आ. स्था.।

21. ब्रह्मेशानयोर्मध्ये (कृष्ण पुंजेषु वल्लायाम्)

ॐ भू दक्षादिसप्तगणेभ्यो नमः — दक्षादिसप्तगणान् आ. स्था.।

22 ब्रह्मेन्द्रयोर्मध्ये वाप्याम् -

ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गा आ. स्था.।

23. तत्रैव दुर्गापूर्वे -

ॐ भूर्भुवः स्वः विष्णवे नमः विष्णो इहागच्छेह तिष्ठ।

24. ब्रह्माग्न्योर्मध्ये वल्लायाम् -

ॐ भूर्भुवः स्वः स्वधायै नमः स्वधा आ. स्था.। (कही कहीं पर पितरो का आवाहन का भी उल्लेख है)

25. ब्रह्मयमयोर्मध्ये वाप्याम् -

ॐ भूर्भुवः स्वः मृत्युरोगाभ्यां नमः मृत्युरोगौ आ. स्था.।

26. ब्रह्मनिर्ऋत्योर्मध्ये वल्लयाम् -

ॐ भूर्भुवः स्वः गणपतये नमः गणपतिम् इहागच्छेह तिष्ठ।

27. ब्रह्मवरुणयोर्मध्ये वाप्याम् -

ॐ भूर्भुवः स्वः अद्भ्यो नमः आपः आ. स्था.।

28. ब्रह्मवाय्वोर्मध्ये वल्लाम् -

ॐ भूर्भुवः स्वः मरुद्भ्यो नमः मरुतः आ. स्था.।

29. ब्रह्मणः पादमूले कर्णिकायाम् -

ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीम् आ. स्था.।

30. तत्रैव पृथिव्या उत्तरतः -

ॐ भूर्भुवः स्वः गंगादिभिसरितेभ्यो नमः गंगादिव सप्तसरितः आ. स्था.।

31. तत्रैव गंगात्त्युतरे -

ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः सप्तसागरान् आ. स्था.।

32. ब्रह्मणः मस्तके कर्णिकोपरि -

ॐ भूर्भुवः स्वः मेरवे नमः मेरुम् आ. स्था.।

३३. उत्तरेसोमसमीपे—ॐ भूर्भुवः स्वः गदायै नमः गदाम् आ. स्था.।।

३४. ईशानसमीपे – ॐ भूर्भुव: स्व: त्रिशूलाय नम: त्रिशूलं आ. स्था।।
३५. इन्द्रसमीपे – ॐ भूर्भुव: स्व: वज्राय नम: वज्रं इहागच्छेह तिष्ठ।
३६. अग्निसमीपे – ॐ भूर्भुव: स्व: शक्तये नम: शक्तिम् आ. स्था।।
३७. यमसमीपे–ॐ भूर्भुव: स्व: दण्डाय नम: दण्डं इहागच्छेह तिष्ठ।
३८. नैर्ऋतिसमीपे– ॐ भूर्भुव: स्व: खड्गाय नम: खड्गम् आ. स्था।

39. पश्चिमेवरुण समीपे -

ॐ भूर्भुव: स्व: पाशाय नम: पाशम् आ. स्था.।

40. वायव्यां वायुसमीपे -

ॐ भूर्भुव: स्व: अंकुशाय नम: अंकुशम् आ. स्था.।

(मंडल के बाहरी ओर रक्तपरिधि में उत्तर से वायव्य पर्यन्त)

४१. उत्तरे – ॐ भूर्भुव: स्व: गौतमाय नम: गौतमम् इहागच्छेह तिष्ठ।
४२. ऐशान्याम्–ॐ भूभुर्व. भारद्वाजाय नम: भारद्वाजं इहागच्छ इहतिष्ठ।
४३. पूर्वे–ॐ भूर्भुव: स्व: विश्वामित्राय नम: विश्वामित्रं इहागच्छेहतिष्ठ।
४४. आग्नेयाम् – ॐ भूर्भुव: स्व: कश्यपाय नम: कश्यपं इहागच्छेहष्ठि।
४५. दक्षिणे–ॐ भूर्भुव: स्व: जमदग्ने नम: जमदग्निं इहागच्छेह तिष्ठ।
४६. निर्ऋते–ॐ भूर्भुव: स्व: वसिष्ठाय नम: वसिष्ठं इहागच्छेह तिष्ठ।
४७. पश्चिमे – ॐ भूर्भुव: स्व: अत्रये नम: अत्रिं इहागच्छेह तिष्ठ।
४८. वायव्यां–ॐ भूर्भुव: स्व: अरुन्धत्यै नम: अरुन्धतिं इहागच्छेहतिष्ठ।

ततो (मण्डल के बाहर कृष्ण परिधि में पूर्वादि क्रमेण)

४९. पूर्वे – ॐ भूर्भुव: स्व: ऐन्ध्रै नम: ऐन्द्रीम् आ. स्था.।
५०. आग्नेयाम्–ॐ भू र्भुव: स्व: कौमार्यै नम: कौमारीम् आ. स्था.।
५१. दक्षिणे – ॐ भूर्भुव: स्व: ब्राह्यै नम: ब्राह्मीम् आ. स्था.।
५२. निर्ऋत्ये – ॐ भूर्भुव: स्व: वाराह्यै नम: वाराहीम् आ. स्था.।
५३. पश्चिमे – ॐ भूर्भुव: स्व: चामुण्डायै नम: चामुण्डाम् आ. स्था।
५४. वायव्याम्–ॐ भूर्भुव: स्व: वैष्णव्यै नम: वैष्णवीम् आ. स्था.।
५५. उत्तरे– ॐ भूर्भुव: स्व: माहेश्वर्यै नम: माहेश्वरीम् आ. स्था।
५६. ईशाने– ॐ भूर्भुव: स्व: वैनायक्यै नम: वैनायकीम् आ. स्था।

अथ मंत्रसहितम् सर्वतोभद्रमण्डलदेवता स्थापनम्

वैदिक मंत्रो की आवाहन की दो परंपरायें प्रचलित है अतः दोनों मंत्रों के मुद्रण आकार में अन्तर कर दिया है। अतः यहां लोकाचार में जो मंत्र विधि प्रचलित हो उसी मुद्रण के क्रम से आवाहन करें। दोनो वैदिक मंत्र पढने जरुरी नहीं है।

(1) सर्वतोभद्रमंडल मध्ये (कलशे) -

ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ।
सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिम सतश्चविवः ॥

त्वं वै चतुर्मुखो ब्रह्मास्वर्गे लोके पितामहः ।
आगच्छ मण्डले चास्मिन् मम सर्वार्थ सिद्धये ॥

भो ब्रह्मन् अस्मिन् मण्डले इहागच्छ इहतिष्ठ पूजां गृहाण सुप्रसन्नो वरदो भव १॥

उत्तर से परिधि समीप मे पूर्वादि क्रम से लोकपालों श्वेतवापी में आवाहन करें।

(2) उत्तरे परिधि समीपे -

ॐ वय ठं सोमव्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि॥

ॐ आप्यायस्व समेतुते विश्वतः सोमवृष्ण्यम् ।
भवावाजस्यसंगथे ॥

क्षीरोदार्णव संभूतं लक्ष्मीं बंधुं निशाकरम् ।
मण्डले स्थापयाम्यम सोमं सर्वार्थ सिद्धये ॥

भो सोमेहागच्छहेतिष्ठ ॥२॥

(3) ईशान्यां खण्डेदौ -

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसा—मसद्वृधे रक्षिता पायुरदब्ध स्वस्तये ॥

ॐ अभित्वादेव सवितरीशानं वार्याणाम् । सदावन्भागमीमहे॥

ईशानींपालकं श्रेष्ठ सर्वलोक भयंकरं ।
मण्डले स्थापयामीह ईशान्यां सर्वसिद्धये ॥

भो ईशान इहागच्छेहतिष्ठ ।।४।।

(4) पूर्वे -

ॐ त्रातारमिद्र मवितारमिंद्र ठं हवे हवे सुहव ठं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिंद्र ठं स्वस्ति नो मघवा धात्विन्द्रः ।।

ॐ इन्द्रं वो विश्वत स्परिहवामहे जनेभ्यः ।
अस्माकमस्तु केवलः ।।

सर्वलोकाधिपं श्रेष्ठं देवर्षिणां स पालकं ।
पूर्वदिक् पालकं देवराजं वै स्थापयाम्यहम् ।।

भो इंद्र इहागच्छेहतिष्ठ ।।४।।

(5) आग्नेयखण्डेदौ -

ॐ त्वन्नो अग्ने तव देव पायुभिर्मघोनो रक्षतन्वश्च वंद्य ।
त्राता तोकस्य तनये गवामस्य निमेष ठं रक्षमाणस्तव व्रते ।।

ॐ अग्नीदूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ।।

त्रिपादं मेष वाहनं च त्रिशिखं च त्रिलोचनम् ।
आग्नेयां स्थापयाम्यत्र अग्निं पुरुष--मुत्तमम् ।।

भो अग्ने इहागच्छेतिष्ठ ।।५।।

(6) दक्षिणे वाप्याम् - परिधि समीपे

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्माय स्वाहा घर्मः पित्रे ।।

ॐ यमाय सामे \ सुनुतयमाय जुहुता हविः ।
यमंहयज्ञो गच्छत्यग्नि दूतो अरंकृतः ।।

नन्तकः अन्तकः सर्वलोकानां धर्म राज इतिश्रुतः ।
अतस्त्वां स्थापयाम्यत्र दक्षिणस्यां स्थिरोभव ।।

भो यम इहागच्छइहतिष्ठ ।।६।।

(7) *नैऋत्यांखण्डेदौ – (परिधि समीपे)*

ॐ असुन्वन्तम यजमान–मिच्छस्तेनस्योत्या मन्विहि तस्करस्य ।
अन्यमस्मदिच्छसात इत्या नमो देव निर्ऋते तुभ्यमस्तु ॥

ॐ मोषुण: परापरा निर्ऋतिर्दुर्हणा वधीत ।
यदीष्ट तृष्णयासह ॥

नैऋत्यां वसतिर्यस्य घोररूपी सदाहि य: ।
नैर्ऋतिं स्थापयाम्यत्र नैर्ऋत्यां मण्डले शुभे ॥

भो निर्ऋति इहागच्छतिष्ठ ॥७॥

(8) *पश्चिमेवाप्याम् – परिधि समीपे*

ॐ तत्वायासि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भि: ।
अहेडमानो वरुणे हबोध्युरुश: ঁ समान आयु: प्रमोषी: ॥

अपांपतिं पाशधरं यादसां च पतिं शुभं ।
वरुणं स्थापयाम्यत्र वारुणयां मंडले शुभे ॥

भो वरुण इहागच्छइहतिष्ठ ॥८॥

(9) *वायव्यांखण्डेदौ –*

ॐ आनो नियुद्भि: शतनीभिरद्धर ठं सहस्त्रिणीभि रुपयाहि यज्ञम् ।
वायो अस्मिन् त्सवने मादयस्व यूयं पातस्वस्तिभि: सदान: ॥

ॐ वायो शतं हरिणां युवस्व पोष्याणाम् ।
उतवाते सहस्त्रिणो रथ आयातु पाजसा ॥

भो वायो इहागच्छइहतिष्ठ ॥९॥

अष्ट रक्तभद्रमंडलो पर क्रमश: –

(10) *वायुसोमयोर्मध्ये –*

ॐ सुगावो देवा: सदना अकर्मय आजग्मेद ठं सवनञ्जुषाणा: ।
भरमाणावहमाना हवी ঁ ष्यस्मेधत्त वसवो वसूनि स्वाहा ॥

ॐ ज्मया अत्रवसवो रंतिदेवा उरावंतरिक्षे मर्जयंत: शुभ्रा: ।
अर्वाक्पथ उरुज्रय: कृणुध्वं श्रोतो दूतस्य जग्मुषोनो अस्य ॥

इत्यष्टवसूनावाहयामि स्था. ॥१०॥

(11) सोम ईशानमध्ये -

ॐ रुद्रा स ठं सृज्य पृथिवीं बृहज्ज्योतिः समीधरे ।
तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥

ॐ आ रुद्रासः इन्द्रवंतः सजोषसो हिरण्य रथाः सुविनाय गंतनः इयं वो अस्मन् प्रतिहर्यते मति स्तृणजेन दिव उत्सा उदन्यवे ॥

त्रिनेत्र रुद्ररूपाय त्रिजटाय महात्मने ।
नमस्कृत्य स्थापयामि मण्डलोपरिमध्यतः ॥

एकदश रुद्रानावाहयामि स्थापयामि ॥११॥

12. इन्द्रेशानयोर्मध्ये -

ॐ यज्ञो देवानोम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आवोर्वाची सुमतिर्ववृत्याद ठं हो शिचद्द्या वरिवो वित्तरासदादित्येभ्यस्त्वाः॥

*ॐ त्यांनु क्षत्रियां अव आदित्यान्या चिषामहे ।
सुमृडीकां अभिष्टये ॥*

आदित्यं भास्करं चैव प्रभाकर दिवाकरौ ।
सूर्य ग्रहपतिं बुध्नं तेजोरूप धारम् हरिम् ॥
सप्ताश्वं देवमूर्तिं च त्रिदैवत्यं क्रमेण च ।
इत्यादि द्वादशदित्यान् मण्डले स्थापयाम्यहम् ॥

द्वादशादित्यामावाहयामि स्था. ॥१२॥

13. इन्द्राग्न्योर्मध्ये -

ॐ यवाङ्कशा मधुमत्यश्विना सूनृतावती तया यज्ञम् मिमिक्षतम्।
उपयाम गृहीतोऽस्यश्विभ्यां त्वैषते योनिर्मादध्वीभ्यान्त्वा ॥

*ॐ अश्विनावर्ति — रस्मदागोमद्दस्रा हिरण्यवत् ।
अर्वाग्रथं समनसा नियच्छतम् ॥*

अश्विनावाहयामि स्था. ॥१३॥

14. अग्नियमोर्मध्ये -

ॐ ओमासश्चर्षणी धृतो विश्वेदेवास आगत ।
दाश्वां सो दाशुषः सुतम् । उपयामगृहीतोसि
विश्वेभ्यस्त्वा देवेभ्यः एषते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ।।

देवेकर्मणि पित्रो च यौ मुख्यो सर्वदा शुभौ ।
मण्डले स्थापयामि सुखानुष्ठान सिद्धये ।।

विश्वादेवानावाहयामि स्था. ।।१४।।

15. यमनिर्ऋतियोर्मध्ये -

ॐ अभीत्यं देव सवितारमोण्योः कविक्रतुमर्चामि सत्य
सवरत्नधामभि प्रियं मतिं कवि मूर्ध्वा यस्या मतिर्भा अदिद्युतत्स
वीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः ।।

यकृच्छया पर्यटं तो यक्ष राजा महितले ।
कौतुकं प्रेक्षितं घोरा मण्डले सन्तु सस्थिरा ।।

सप्तयक्षनावाहयामि स्था. ।।१५।।

16. निर्ऋति वरुणयोर्मध्ये -

ॐ भूताय त्वा नारातये स्वरभिविक्ख्येषन्दृ ठँ
हन्तान्दुर्याः पृथिव्या मुर्वन्तरिक्षमन्वेमि पृथिव्यास्त्वा नाभौ
सादयाम्यदित्या उपस्थेऽअग्ने हव्य ठँ रक्ष ।

ॐ आयंगौः पृश्निर क्रमीद सदनमातरं पुरः ।
पितरं च प्रयन्त्स्वः ।।

आवन्तो वासुकिश्चैव कालियो मणिभद्रकः ।
शंखश्च शंखपालश्च कालकोटि धनञ्जयौ ।।
धृतराष्ट्रश्च नागेशाः स्वीकुर्वन्तु ममार्चनं ।
मण्डले पूजयामत्र सर्वारिष्ट प्रशान्तये ।।

ॐ सर्पानावाहयामि स्था. ।।१६।।

17. वरुणावय्वोर्मध्ये -

ॐ ऋताषाड् ऋतधामाग्निः गंधर्वस्तस्यौषधयो ऽप्सरसो मुदो

नाम । स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्ताभ्य: स्वाहा।

ॐ अप्सरसां गंधर्वाणां मृगाणां चरणे चरन् ।
केशीके तस्य विद्वान् सखास्वावुर्मदिन्तम: ।।

उर्वशीप्रमुखा: सर्वा: स्ववेश्या: शक्र पूजिता ।
गंधर्वैश्च सदायान्तु मण्डलेस्मिन् सुशोभना: ।।

ॐ गंधर्वाप्सरा आवाहयामि स्था. ।।१७।।

18. उत्तरे – (ब्रह्म सोमयोर्मध्ये २४ पुंजेषु वाप्याम् कर्णिका के समीप में)

ॐ आशु: शिशानो वृषभो न भीमो घनाघन: क्षोभणीश्चर्षणीनाम्।
सक्रन्दनो निमिष एकवीर: शत ठं अजयत्साकमिन्द्र: ।।

ॐ यदक्रंद: प्रथमं जायमानऽ उद्यन् त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं ते अर्वन् ।।

षडाननं चतुर्हस्तं स्कंद शैल सुतात्मजं ।
इहैव पूजायिष्यामि सर्व कामार्थ सिद्धये ।।

ॐ स्कंदमावाहयामि स्था. ।।१८।।

19. स्कंदस्योत्तरे -

ॐ ऋषभं मा समानानां सपत्नानां विषासहि
हंतारं शत्रूणांम् ऋधि विराजं गोपतिं गवां ।।

शिवद्वार गतस्त्वं च शिववाहनमुत्तमम् ।
पार्वत्या: प्रीतिकृन्मित्य – मिहागच्छ स्थिरोभव ।।

भो नंदीश्वर इहागच्छ इहतिष्ठ ।।१९।।

20. नंदीस्योत्तरे -

ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेमशंतमं हृदे ।।

त्र्यंबकं च त्रिपुरुषं नीलकण्ठं सदाशिवं ।
मण्डले स्थापयामिह सुखानुष्ठान सिद्धये ।।

ॐ शूलायरुद्ररूपिणे आ. स्था. ।।२०।।

21. शूलस्योत्तरे -

ॐ कुमारं माता युवतिः समुब्धं गुहा विभर्ति न ददाति पित्रे ।
अनीकमस्य नमिनज्जनासः पुरः पश्यन्ति निहितमरतौ ॥
अदितिर्देवमाता त्वं दक्षपुत्रि सुशोभने ।
मण्डलेस्मिन् समागच्छ यावत्पूजां स्थिरोभव ॥
ॐ महाकालीसहिताय महाकालाय नमः। आ. स्था. ॥२१॥

22. ब्रह्मेशानयोर्मध्ये कृष्णपुंजेषुवल्लयाम् -

ॐ अदिति र्ह्यजनिष्ट दक्ष या दुहिता तव ।
तान्देवा अन्वजायन्त भद्रा अमृतबंधवः ॥
दक्षोऽसि सर्वकार्येषु महान यज्ञकरः प्रियः ।
ऋषीणां सर्व दक्ष मण्डले ऽस्मिन् स्थिरोभव ॥
ॐ दक्षादिसप्त गणेभ्यो आवाहयामि स्था. ॥२२॥

23. ब्रह्मन्द्रयोर्मध्ये वाप्याम् -

ॐ तामग्निवर्णा तपसा ज्वलन्तीम् वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गा देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ।
तामाग्निवर्णा ज्वलन्तीं तपसा सर्वदा शुभाम् ।
भक्तानां वरदां नित्यं दुर्गां आवाहाम्यहम् ॥
ॐ दुर्गामावाहयामि स्था. ॥२३॥

24. तत्रैव दुर्गापूर्वे -

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ठं सुरे।
कृष्णाय गोपीनाथाय चक्रिणे मुरवैरिणे ।
नमस्तुभ्यं जगद्धात्रे मण्डलेस्मिन् स्थिरोभव ॥
ॐ विष्णुं आ. स्था. ॥२४॥

25. ब्रह्माग्न्योर्मध्ये वल्लयाम् -

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः
स्वधा नमः प्रपितामहेभ्य स्वधायिभ्यः स्वधा नमः ॥
ॐ उदीरतामवर उत्परास उन्मध्यमाः । पितरः सोम्यासः

अंसुयईयुरवृका ऋतज्ञास्तेनो ऽवंतु पितरो हवेषु ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
अतस्त्वां पूजयिष्यामि मण्डले ऽस्मिन् स्थिराभव ॥

ॐ स्वधामावाहयामि स्था. ॥२५॥

26. ब्रह्मयमयोर्मध्ये वाप्याम्

ॐ परं मृत्यो अनुपरेहि पन्थां यस्ते अन्य इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा ँ रीरिषो मोत वीरान् ॥

मृत्युरोगानंतकस्य प्रेष्यान् प्राणहरान क्षणात् ।
मण्डले स्थापयामीह पूजार्थ लोक – नाशकान् ॥

ॐ मृत्युरोगेगभ्यो नमः। आ. स्था. ॥२६॥

27. ब्रह्म निर्ऋतिर्मध्ये वल्ल्याम् -

ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणान्त्वा प्रियपति ठँ हवामहे निधिनांत्वा निधिपति ठँ हवामहे वसो मम आहमजासी गर्भधमा त्वमजासि गर्भधम् ।

ॐ गणानांत्वा गणपति ठँ हवामहे कवि कविना मुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः श्रृण्वन्नूतिभिः सीद सादनम् ॥

भो गणपति इहागच्छ इहतिष्ठ ॥२७॥

28. ब्रह्मवरुणयोर्मध्ये वाप्याम् -

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभि स्त्रवंतुनः॥

पावनाः सर्वलोकानां निमग्नाः शुद्धिकारकाः ।
सर्वपापहराः श्रेष्ठा मण्डले स्थापयाम्यहम् ॥

भो आपः इहागच्छ इहतिष्ठ ॥२८॥

29. ब्रह्मवायवोर्मध्ये वल्ल्याम् -

ॐ मरुतोयस्यहिक्षये पाथदिवोविमहसः । स सु गोपात मोजनः ॥

सुगंधिनश्च शैत्याढ्या मन्द मन्द वहाः सदा ।
तानहं स्थापयामीह मरुतो मण्डले शुभे ॥

ॐ मरुतमावाहयामि स्था. ।।२९।।

30. ब्रह्मपादमूले कर्णिकाधः -

ॐ स्योना पृथिवी नो भवा नृक्षरा निवेशनी ।
यच्छानः शर्म्म सप्रथाः ।।

पृथिव्याधार्यते विश्वं दुर्वाहं सागरैर्नगै ।
अतस्त्वां स्थापयामिह मण्डले ब्रह्मणः पदे ।।

भो भूमे इहागच्छ इहतिष्ठ ।।३०।।

31. तत्रैव गंगादि नदीभ्यः -

ॐ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं स च तां परुष्णाया
असिकन्या मरुद्वृधः वितस्तयार्जीकीये श्रृणुह्या सुषोमया ।।

गंगा सिन्धु सरस्वति च यमुना गोदावरी नर्मदा ।
कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका ।।
क्षिप्रा वेदवती महासुरनदी ख्याता गया गण्डकी ।
पूर्णाः पूर्ण जलैः समुद्र सहितां आयान्तु मे मण्डले ।।

भो गंगादि नद्य इहागच्छ इहतिष्ठ ।।३१।।

32. तत्रैव -

ॐ इमम्मे वरुण श्रुधि हवद्या च मृडय । त्वामवस्युराचके ।।
ॐ धाम्नो धाम्नोराजन् नितो वरुण नो मुंच ।
यदायो अध्न्या वरुणेति शपामेह ततो वरुण नो मुंच ।।

समुद्रः सर्वतोयेषु श्रेष्ठो वै हरिवल्लभः ।
मण्डले स्थापयामिह तं नदीशं सुखाप्तये ।।

भो सागरः इहागच्छ इहतिष्ठ ।।३२।।

33. ब्राह्मणः मस्तके कर्णिकोपरि -

ॐ भुर्भुवः स्वः मेरवे नमः आ. स्था. ।।३३।।

३४. परिधिसमीपे—सोमस्योत्तरतः— ॐ गदायै नमः। आ. स्था।।३४।।

३५. ईशान्यां — ॐ त्रिशूलाय नमः। त्रिशूलं आ. स्था. ।।३४।।

३६. इन्द्रस्यपूर्वे — ॐ वज्राय नमः। वज्रं आ. स्था. ।।३६।।

३७. आग्नेयां — ॐ शक्तये नमः। शक्तिं आ. स्था. ।।३७।।
३८. दक्षिण — ॐ दण्डाय नमः। दण्डं आ. स्था. ।।३८।।
३९. नैर्ऋत्यां — ॐ खड्गाय नमः। खड्ग आ. स्था. ।।३९।।
४०. पश्चिमे — ॐ पाशाय नमः। पाशं आ. स्था. ।।४०।।
४१. वायव्यां — ॐ अंकुशाय नमः। अंकुशं आ. स्था. ।।४१।।

42. उत्तरे -

ॐ अभित्वा गोत्तमागिरा जातवेदो विचर्षणे । द्युम्नैरभि प्रणोनुमः।।

।। ॐ गौतमं आ. स्था. ।।४२।।

43. ईशान्यां -

ॐ एवानः स्पृधः समजा समत्विन्द्ररा रंध्रिमिथतीरदेवीः ।
विद्यामवस्तोर वसा गृणंतो भारद्वाजा उतत इन्द्र नूनम् ।।

।। ॐ भारद्वाजं आ. स्था. ।।४३।।

44. पूर्वे -

ॐ प्रसूतोभक्षमकरं च रावपिस्तोयं चेमं प्रथमः सूरिरून्मृजे ।
सुते सातेन यद्यागमं वां प्रति विश्वामित्र जमदग्नीदये ।।

।। ॐ विश्वामित्रं आ. स्था. ।।४४।।

45. आग्नेयां -

ॐ ऋये मंत्र कृतां स्तोयै कश्यपोद् वर्धयन् गिर सोमंनमस्य
राजानं यो जज्ञे वारूधांपतिरिन्द्रायेन्दो परिस्त्रव ।

।। ॐ कश्यपं आ. स्था. ।।४५।।

46. दक्षिणे -

ॐ गणाना जमदग्निनायोना वृतस्य सीदतं । पातं सोममृतावृधा।।

।। ॐ जमदग्निं आ. स्था. ।।४६।।

47. नैर्ऋत्यां -

ॐ उतासि मैत्रा वरणो वसिष्ठोर्वश्या ब्रह्मन् मनसोधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वा ददन्ता ।।

।। ॐ वसिष्ठं आ. स्था. ।।४७।।

48. पश्चिमे -

अत्रिर्यद्वाभवरोहंन्वीत सम जोहवीन्नाध मानेवयोषा ।
श्येमस्य चिज्जन सा नूतने नागच्छत मश्विना शंतमेन ।

।। ॐ अत्रिं आ. स्था. ।।४८।।

49. वायव्यां -

ॐ अत्रेर्यथानु सूर्यास्याद्वसिष्ठ स्याप्यरुंधती
कोशिकस्य यथा सती तथा त्वमपिभर्तरि ।।

ॐ अरुंधतीं आ. स्था. ।।४९।।

५०. पूर्वे – ॐ भूर्भुवः स्वः ऐन्द्र्यै नमः। ऐन्द्रीं आ. स्था. ।।
५१. आग्नेयाम्–ॐ भूर्भुवः स्वः कौमार्यै नमः। कौमारीं आ. स्था. ।।
५२. दक्षिणे – ॐ भ र्भुवः स्वः ब्राह्म्यै नमः। ब्राह्मीं आ. स्था. ।।
५३. निऋत्ये – ॐ भूर्भुवः स्वः वाराह्यै नमः। वाराहीं आ. स्था. ।।
५४. पश्चिमे–ॐ भूर्भुवः स्वः चामुण्डायै नमः। चामुण्डां आ. स्था।।
५५. वायव्यां – ॐ भूर्भुवः स्वः वैष्णव्यै नमः। वैष्णवीं आ. स्था. ।।
५६. उत्तरे –ॐ भूर्भुवः स्वः माहेश्वर्यै नमः। माहेश्वरीं आ. स्था. ।।
५७. ईशाने–ॐ भूर्भुवः स्वः वैनायक्यै नमः। वैनायकीं आ. स्था. ।।

सर्वताभद्र मण्डले विशेषदेवता आवाहनम्

अन्य विशेष देवताओं में अष्ट भैरव, अष्टरुद्र एवं अष्ट नाग देवताओं के "चतुर्थी "से आवाहन एवं प्रथमा से स्थापन पूर्वादि क्रम से करें।

अष्ट भैरव :– ॐ असितांग भैरवाय नमः पूर्वे। ॐ रूरू भैरवाय नमः। ॐ चण्ड भैरवाय नमः। ॐ क्रोध भैरवाय नमः। ॐ उन्मत्त भैरवाय नमः। ॐ कपाल भैरवाय नमः। ॐ भीषण भैरवाय नमः। ॐ संहार भैरवाय नमः।

रुद्रावाहनम् :– ॐ भवाय नमः। ॐ शर्वाय नमः। ॐ ईशानाय नमः। ॐ पशुपतये नमः। ॐ रुद्राय नमः। ॐ उग्राय नमः। ॐ भीमाय नमः। ॐ महते नमः।

अष्ट नाग आवाहनम् – ३ॐ अनंताय नमः। ३ॐ वासुकये नमः। ३ॐ तक्षकाय नमः। ३ॐ कुलिशाय नमः। ३ॐ कर्कोटकाय नमः। ३ॐ शंखपालाय नमः। ३ॐ कंबलाय नमः। ३ॐ अश्वराय नमः।

इस प्रकार आवाहन करके प्रतिष्ठा करें।

३ॐ मनोजुतिर्जुषतामाजस्य......। ३ॐ तदस्तु मित्रा वरुणतदग्ने शंयोर स्मभ्यमिदमस्तु शस्तं। अशीमपि गाधे मुतप्रतिष्ठां नमो दिवे वृहते सादनाय।।

एता ब्रह्मादि देवताः सर्वतोभद्र मण्डले सुप्रतिष्ठाः मम संमुखा सुप्रसन्ना वरदाभवत। सुप्रतिष्ठिता सन्तु।।

स्वर्ण मूर्ति बनायी हो तो "प्राण प्रतिष्ठा" विधि व मंत्रो से पृष्ठ संख्या ५२५ के अनुसार करके मंडल पर स्थापित करें।

तत् पश्चात् आवाहितदेवताओं का षोडशोपचार से पूजन करें।

नोट :– सर्वतोभद्र मंडल पर सभी देवताओं का आवाहन किया जा सकता है। जिस देवता की प्रधान पूजा हो उसकी प्रतिमा या स्वर्ण मूर्ति मंडल के मध्य स्थापित करें।

विष्णु पूजन में कहीं–कहीं अपवाद हो जाता है कि सर्वतोभद्र व विष्णु पूजन में अक्षत (चावल) नहीं **"यवाक्षत"** चढाये जाते है परन्तु **"शालिग्राम प्रतिमा"** पर ही **चावल का निषेध** है एवं विशेषतः एकादशी के दिन विष्णु के चावल नहीं चढाये जाते है। यथा लोकाचारानुसार भी किया जा सकताहै।

विष्णु विशेषांग पूजा एवं अभिषेक

विष्णु कि विशेष पूजा में भगवान के पृथक–पृथक अंगो में उनके पृथक नाम से अंग देवता की पूजा तथा भिन्न–भिन्न स्वरूप पत्र व पुष्प भी चढाये जाते है। पुरुष सूक्त एवं विष्णु सूक्त से अभिषेक करें।

अथ विष्णु सूक्तम्

३ॐ विष्णोर्नुकंवीर्याणि प्रवोचं यः पार्थिवानिविमये रजांसि । यो ऽ अस्कभायदुत्तरं सधस्थं विचक्रयायस्त्रे धोरुगायः ।१।। विष्णोरराट्मसि

विष्णोः श्नप्त्रेस्थो । विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ।।२।। तदस्य प्रियमभिपाथो अस्यां नरोयत्र देव यवो मदंति । उरूक्रमस्य सहिबन्धुरित्था विष्णोः पदे परमेमध्व उत्सः ।।३।। प्रतद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरोगिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणे स्वधिक्षियंति भुवनानि विश्वा।।४।। परो मात्रया तन्वावावृधान नते महित्व मन्वश्नुवन्ति । उभेतेविद्म रजसी पृथिव्या विष्णोर्देव परमस्य वित्से ।।५।। विचक्रमे पृथिवी मेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्यकीर योजना स उरूक्षितिं सुजनिमाचकार ।।६।। त्रिर्देव पृथिवी मेष एतां विचक्रमे शतचंस महित्वा । प्रविष्णु रस्तु तव सस्तवीयान् त्वेषं ठं ह्यस्यध्थविरंत्रनाम् ।।७।। अतो देवा अवंतुनो यत्तो विष्णुः विचक्रमे। पृथिव्याः सप्तधामभिः ।।८।। इदं विष्णुर्विचक्रमे त्रेधा निदधेपदम्। समूढमस्य पा ठं सुरे ।।९।। त्रीणिपदा विचक्रमेविष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन् ।।१०।। विष्णोः कर्माणि पश्यत यतो व्रतानिपश्यशे । इन्द्रस्य युज्यः सखा ।।११।। तद्विष्णोः परमं पदं सदापश्यंतिसूरयः। दिवी व चक्षुराततम् ।।१२।। तद्विप्रासो वियन्यवो जागृवां ठं सः समिंधते । विष्णोर्यत्परमं पदम् ।।१३।।

।।इति विष्णु सूक्तम्।।

पुरुष सूक्त, विष्णु सूक्त से महाभिषेक के बाद शुद्धोदक स्नान करायें। वस्त्र, यज्ञोपवित, अलंकार धारण करायें। कुंकुम, गंध, अक्षत, सुगन्धित द्रव्य अर्पण करें। **तुलसी अर्पण करें –**

तुलसी हेमरूपां च रत्नरूपां च मंजरी ।
भवमोक्ष प्रदां तुभ्यमर्पयामि हरिप्रियाम् ।।

अथ अंगपूजा

भगवान के सभी अंगो में गंध पुष्पाक्षत से अर्चन करें।

ॐ अनंताय नमः पादौ। पूजयामि नमः।।१।। ॐ संकर्षणाय नमः गुल्फौ। पूजयामि नमः।।२।। ॐ पद्मनाभाय नमः। जंघे पूजयामि नमः।।३।। ॐ विश्वरूपाय नमः जानुनी। पूजयामि नमः।।४।। ॐ

केशवाय नमः उरू। पूजयामि नमः।।५।। ३ॐ विश्वस्यै नमः कटिं। पूजयामि नमः।।६।। ३ॐ प्रद्युम्नाय नमः नाभिं। पूजयामि नमः।।७।। ३ॐ परमात्मने नमः हृदये। पूजयामि नमः।।८।। ३ॐ वैकुण्ठाय नमः कण्ठं। पूजयामि नमः।।९।। ३ॐ शस्त्रधारिणे नमः बाहुं। पूजयामि नमः।।१०।। ३ॐ वाचस्पतये नमः मुखं। पूजयामि नमः।।११।। ३ॐ सहस्राक्षाय नमः नेत्रं। पूजयामि नमः।।१२।। ३ॐ मधुसूदनाय नमः ललाटं। पूजयामि नमः।।१३। ३ॐ सर्वात्मने नमः शिरः। पूजयामि नमः।।१४।। ३ॐ सर्वेश्वराय नमः सर्वाङ्गे। पूजयामि नमः।।१५।।

अथ पत्र पूजा

भगवान के विभिन्न स्वरूपों को भिन्न–भिन्न पत्र व पुष्प प्रिय है। अत: उनके उन नामों का स्मरण करते हुये पत्र व पुष्प चढावें।

३ॐ अनंताय नमः। तुलसी पत्रं समर्पयामि नम।।१।। ३ॐ संकर्षणाय नमः। भृंगराज पत्रं समर्पयामि नमः।।२।। ३ॐ परमात्मने नमः। जातीपत्रं समर्पयामि नमः।।३।। ३ॐ विश्वरूपिणे नमः। अपामार्ग समर्पयामि नमः।।४।। ३ॐ विश्वनाथाय नमः। बिल्वपत्रं समर्पयामि नमः।।५।। ३ॐ पद्मनाभाय नमः। करवीरपत्रं समर्पयामि नमः।।६।। ३ॐ महात्मने नमः। शमीपत्रं समर्पयामि नमः।।७।। ३ॐ श्रीकण्ठाय नमः। अर्जुनपत्रं समर्पयामि नमः।।८।। ३ॐ सर्वास्त्रधारिणे नमः। धत्तूरपत्रं समर्पयामि नमः।।९।। ३ॐ वाक्पतये नमः। विष्णुक्रांतपत्रं समर्पयामि नमः।।१०।। ३ॐ केशवाय नमः। दाडिमीपत्रं समर्पयामि नमः।।११।। ३ॐ सर्वात्मने नमः। मातुलिंगपत्रं समर्पयामि नमः।।१२।। ३ॐ महीधराय नमः। देवदारुपत्रं समर्पयामि नमः।।१३।। ३ॐ अच्युताय नमः। मरुपत्रं समर्पयामि नमः।।१४।।

अथ पुष्प पूजा

३ॐ अनंताय नमः। पद्मपुष्पं सम.।।१।। ३ॐ विष्णवे नमः। जातीपुष्पं सम.।।२।। ३ॐ शिष्टेष्ठाय नमः। कर्मवीरपुष्पं सम.।।३।। ३ॐ केशवाय नमः। चंपकपुष्पं सम.।।४।। ३ॐ अच्युताय नमः। कल्हारपुष्पं सम.

।।५।। ॐ सहस्रजिते नमः। केतकीपुष्पं सम.।।६।। ॐ अनंतरूपाय नमः। पारिजात पुष्पं सम.।।७।। ॐ इष्टाय नमः। शतदलपुष्पं सम. ।।८।। ॐ विशिष्टाय नमः। पन्नागपुष्पं सम.।।९।।

अंग पूजा आवाहन पश्चात् चर्तुगंध, सौभाग्यद्रव्य, सुगंधित द्रव्य, धूप दीप नैवेद्य अर्पण करें।

आचमन्, अपोशन, हस्तप्रक्षालन, मुखप्रक्षालन करावें। करोद्वर्तनार्थे चंदन अर्पण करें। पूगीफल, ताम्बूल, दक्षिणा, फल भेंट करके (ऋतुफल, श्रीफल सहित) विशेषार्घ प्रदान करें।

छत्र अर्पण करें। चामर अर्पण करें। —

ॐ नक्षत्र राजेन्द्र मरीचि शुभ्रैर्नक्षत्रयैलागरूवासितैश्च ।
नक्षत्रिणं विष्णुमहं भवंतं श्रीतालवृन्तैः परिवीजयामि ।।

दर्पण –

ॐ कर्पूर कुन्देदु करावदातं गोरत्न वैडूर्यखचिन्मनोज्ञं ।
प्रकल्पितं ते वदनाम्बुजाग्रै लक्ष्मीपते स्वीकुरु दर्पणं च ।।

पादुका अर्पण करें एवं नीराजन करें। पुष्पांजली अर्पण करें।

पार्षदपूजा :– ॐ विश्वक्सेनाय नमः। ॐ उद्धवाय नमः। ॐ अक्रूरादि पार्षदाय नमः।

अथ गणपतिभद्रमण्डलदेवता स्थापनम्

गणपतिभद्रमण्डल देवता आवाहन २ तरह से है।

(१) **सर्वतोभद्रमण्डल** देवताओं की तरह आवाहन।

(२) **तांत्रिक क्रमेण** भद्रमण्डल देवता आवाहन। इसमें गणपति के ही विशेष अंग देवताओं को आवाहन है जो मुख्य है।

अतः दोनों ही विधियों से देवता स्थापन क्रम दिया जा रहा है। यथा रुचि आवाहन करें।

(1) गणपति भद्रमण्डले सर्वतोभद्र विधिनाऽवाहनम्

1. मध्ये –

उद्यद्दिनेश्वर रुचिं निजहस्त पद्मैः

पाशांकुशाभय वरादन्दधतं गजास्यम् ।
रक्तांबरं सकलदुःखहर गणेशं
ध्यायेत्प्रसन्नामखिलाभरणाभिरामम् ।।

ततो "गणानानां त्वां" मंत्रेण गणपतिं आवाह्य । भो गणपति इहागच्छ इहतिष्ठ प्रसन्नो भव।।

दिक्पालस्थापनम् – परिधि समीप वापी व श्वेत खण्डेंदुओं में।

२. ॐ भूर्भुवः स्वः सोमाय नमः। सोम इहागच्छ इहतिष्ठ।। (उत्तरे)
३. ॐ भूर्भुवः स्वः ईशानाय नमः। ईशान इहागच्छ इहतिष्ठ।। (ईशांन)
४. ॐ भूर्भुवः स्वः इन्द्राय नमः। इन्द्र इहागच्छ इहतिष्ठ।। (पूर्वे)
५. ॐ भूर्भुवः स्वः अग्नेय नमः। अग्नि इहागच्छ इहतिष्ठ।। (आग्नेय)
६. ॐ भूर्भुवः स्वः यमाय नमः। यम इहागच्छ इहतिष्ठ।। (दक्षिणे)
७. ॐ भूर्भुवः स्वः नैर्ऋत्यये नमः। निर्ऋते इहागच्छ इहतिष्ठ।। (नैऋत्ये)
८. ॐ भूर्भुवः स्वः वरुणाय नमः। वरुण इहागच्छ इहतिष्ठ।। (पश्चिमे)
९. ॐ भूर्भुवः स्वः वायवे नमः। वायो इहागच्छ इहतिष्ठ।। (वायवे)

भद्रमण्डले स्थापनम् (रक्तपुंजेषु)

१०. वायुसोमयोर्मध्ये – ॐ भू. अष्ट वसुभ्यो नमः अष्टवसुं आ. स्था।।
११. सोमईशानयोर्मध्ये – ॐ भू. एकादशरुद्रेभ्यो नमः एकदश रुद्र आ. स्था. ।।
१२. ईशानपूर्वयोर्मध्ये – ॐ भू. द्वादश आदित्येभ्यो नमः द्वादश आदित्य इहागच्छ इहतिष्ठ।।
१३. इन्द्राग्न्योर्मध्ये – ॐ भू. द्वादश अश्विनाभ्यां नमः अश्विनौ इहागच्छ इहतिष्ठ।।
१४. अग्नियमयोर्मध्ये – ॐ भू. विश्वेभ्यो देवेभ्यो पितृभ्यो नमः। आ. स्था.।।
१५. यमनिर्ऋतिमध्ये – ॐ भू. सप्तयक्षेभ्यो नमः। सप्तयक्षान् आ. स्था।।
१६. निर्ऋतिवरुणयोर्मध्ये – ॐ भू. भूतनागेभ्यो नमः। भूतनाग आ.

स्था ।।

१७. वरुणवायव्योर्मध्ये – ॐ भू. गंधर्वप्सरेभ्यो नमः। गंधर्वप्सरसः आ. स्था.

वाप्याम् (श्वेत भद्रे) उत्तर पूर्वादि क्रमेण

१८. उत्तरे।। ॐ भू. प्रमोदाय नमः प्रमोदं आ. स्था.।।

१९. पूर्वे।। ॐ भू. सुमुखाय नमः सुमुखं आ. स्था.।।

२०. दक्षिणे।। ॐ भू. दुर्मुखाय नमः दुर्मुखं आ. स्था.।।

२१. पश्चिमे।। ॐ भू. विघ्ननाशाय नमः विघ्ननाश आ. स्था.।।

वल्ल्याम् ईशान आग्नेयादि क्रमेण -

२२. ब्रह्म ईशानमध्ये।। – ॐ भू. दक्षादि सप्तगणेभ्यो नमः दक्षादिगणान् आ. स्था.।।

२३. ब्रह्माग्नियोर्मध्ये।। – ॐ भू. स्वधायै नमः स्वधां आ. स्था.।।

२४. ब्रह्मनिऋत्योर्मध्ये।। – ॐ भू. सूर्याय नमः सूर्य आ. स्था.।।

२५. ब्रह्मवायव्योर्मध्ये।। – ॐ भू. मरुद्भयो नमः मरुतः आ. स्था.।।

२६. कर्णिका वापीयोर्मध्ये उत्तरे।। – ॐ भू. स्कंदाय नमः स्कंद आ. स्था।।

२७. स्कंदस्योत्तरे।। – ॐ भू. नंदिने नमः नंदीं आ. स्था.।।

२८. नंदीस्योत्तरे।। – ॐ भू. शूलमहाकालाभ्यां नमः शूलमहाकाल आ. स्था।।

२९. ब्रह्मइंद्रयोर्मध्ये वाप्याम्।।–ॐ भू. दुर्गायै नमः दुर्गा आ. स्था।।

३०. दुर्गा पूर्वे।। – ॐ भू. विष्णवे नमः विष्णुं आ. स्था.।।

३१. ब्रह्मयमयोर्मध्ये।। – ॐ भू. मृत्युरोगाभ्यां नमः मृत्युरोगान् आ. स्था.।।

३२. ब्रह्मणपादमूले।। ॐ भू. पृथिव्यै नमः पृथ्वीं आ. स्था.।।

३३. तत्रैव पृथिव्योत्तरतः।। – ॐ भू.गंगादिसरितभ्यो नमः गंगादिसप्तसरितः आ. स्था.।।

३४. ।तत्रैव गङ्गाद्युतरे।। – ॐ भू. सप्तसागरेभ्यो नमः सप्तसागरान्

आ. स्था.।।

३५. ब्रह्मणः मस्तके कर्णिकोपरि।। – ॐ भू. मेरवे नमः मेरुं आ. स्था।।

सत्वपरिधौ उत्तर, ईशान, क्रमेण वायव्यपर्यन्त आयुधानि स्थापयेत्।

।।३६।। ॐ भू. गदायै नमः। ।।३७।। ॐ भू. त्रिशूलाय नमः । ।।३८।। ॐ भू. वज्राय नमः । ।।३९।। ॐ भू. शक्त्यै नमः । ।।४०।। ॐ भू. दण्डाय नमः । ।।४१।। ॐ भू. खड्गाय नमः । ।।४२।। ॐ भू. पाशाय नमः । ।।४३।। ॐ भू. अंकुशाय नमः अंकुशं आ. स्था.।

रजपरिधौ उत्तर ईशान क्रमेण वायव्य पर्यन्त ऋषीन् आवाह्य।

।।४४।। ॐ भू. गौतमाय नमः । ।।४५।। ॐ भू. भारद्वाजाय नमः । ।।४६।। ॐ भू. विश्वामित्राय नमः । ।।४७।। ॐ भू. कश्यपाय नमः । ।।४८।। ॐ भू. जमदग्नये नमः । ।।४९।। ॐ भू. वसिष्ठाय नमः । ।।५०।। ॐ भू. अत्र्यै नमः । ।।५१।। ॐ भू. अरुन्धत्यै नमः ।

तमः परिधौ पूर्वादिक्रमेण ईशान पर्यन्त मातृका आवाह्य।

।।५२।। ॐ भू. ऐन्द्र्यै नमः । ।।५३।। ॐ भू. कौमार्यै नमः । ।।५४।। ॐ भू. ब्राह्म्यै नमः । ।।५५।। ॐ भू. वाराह्यै नमः । ।।५६।। ॐ भू. चामुण्डायै नमः । ।।५७।। ॐ भू. वैष्णव्यै नमः । ।।५८।। ॐ भू. माहेश्वर्यै नमः । ।।५९।। ॐ भू. वैनाक्यै नमः वैनाकीं आ. स्था.।

ततो मनोजूति मंत्रेण सुप्रतिष्ठा कुर्यात् एवं षोडशोपचारै संपूज्य पुष्पांजलिं मादाय। प्रार्थयेत् –

गलद्दान गण्डं महाहस्ति तुण्डं
सुपर्व प्रचण्डं धृतार्द्धेन्दु खण्डम् ।
करास्फोटि ताण्डं महाहस्त दण्डं
हताढ्यारि मुण्डं भजे वक्रतुण्डम् ।।१।।

स्मरणास्तव शंभु विध्यजेन्द्विन शक्रादि सुराः कृतार्थताम् ।
गणपाऽऽपुरद्याघभंजन–द्विपराजास्य सदैव पाहिमाम् ।।२।।
शरणं भगवान्विनायकः शरणं मे सततं च सिद्धि का ।

शरणं पुनरेवतावुभा शरणं नान्यदुपैमि दैवतम् ।।३।।

अथ गणपतिभद्रमण्डले तंत्रोक्तविधिना देवता स्थापनम्

इस विधि में गणपति के प्रधान स्वरूपों का विशेष आवाहन है अतः इसका विशेष महत्व है।

१. *गणपति भद्रमण्डले मध्ये* – *गणानां त्वां* इति मंत्रेण गणपतिं आवाह्य भो वरद गणपतिं इहागच्छ इहतिष्ठ प्रसन्नो वरदो भव।

सत्व परिधौ समीपे उत्तरारंभ वायव्य पर्यन्त तत् पश्चात् मंडल मध्ये गणपति पीठ शक्तिं आवाह्य।

२. *पूर्वे परिधि समीपे* – ॐ भू. तीव्रायै नमः तीव्रां आ. स्था.।।

३. *आग्नेय खण्डेंदौ समीपे* – ॐ भू. चालिन्यै नमः चालिनीं .स्था।।

४. *दक्षिणे* – ॐ भू. नंदायै नमः नंदां आ. स्था.।।

५. *नैऋत्यां खण्डेंदों*– ॐ भू. भोगदायै नमः भोगदा आ. स्था.।।

६. *पश्चिमे परिधि समीपे* – ॐ भू. कामरूपिण्यै नमः कामरूपिणीं आ. स्था.।।

७. *वायवे खण्डेंदौ समीपे* – ॐ भू. उग्रायै नमः उग्रां आ. स्था.।।

८. *उत्तरे परिधि समिपे* – ॐ भू. तेजोवत्यै नमः तेजवतीं आ. स्था।।

९. *ईशान खण्डेंदौ समीपे* – ॐ भू. सत्यायै नमः सत्यां आ. स्था।।

१०. *मण्डल मध्ये* – ॐ भू. विघ्ननाशिन्यै नमः विघ्ननाशिनीं आ. स्था।।

अष्टभद्रे (रक्त पुंजेषु) गणपति शक्ति आवाह्य।

११. *ईशान पूर्व मध्ये* – ॐ भू. विद्यायै नमः विद्यां आ. स्था.।।

१२. *पूर्वआग्नेय मध्ये* – ॐ भू. विधात्रै नमः विधात्रीं आ. स्था.।।

१३. *आग्नेय दक्षिणमध्ये* – ॐ भू. भोगदायै नमः भोगदां आ. स्था।।

१४. *दक्षिण निऋति मध्ये* – ॐ भू. विघ्नघातिन्यै नमः विघ्नघातिनीं आ. स्था.।।

१५. ***निर्ऋति पश्चिममध्ये*** – ॐ भू. निधिप्रदायै नम: निधिप्रदां आ. स्था.।।

१६. ***पश्चिम वायोर्वोर्मध्ये*** –ॐ भू. पापघ्नै नम: पापघ्नीं आ. स्था।।

१७. ***वायुसोमयोर्मध्ये*** – ॐ भू. पुण्याय नम: पुण्यां आ. स्था.।।

१८. ***सोमईशानयोर्मध्ये***–ॐ भू. शशिप्रायै नम: शशिप्रभां आ.स्था।

सत्त्वपरिधौ समीपे - दशगणपति स्वरूपं आवाह्यं।

१९. *पूर्वे वाप्याम्*–ॐ भू. एक वक्रतुण्डाय नम: वक्रतुंडं आ. स्था।।

२०. *आग्नेयां खंडेंदौ*–ॐ भू. एक दंष्ट्राय नम: एकदंष्ट्रं आ.स्था।।

२१. *दक्षिणे वाप्याम्*–ॐ भू. लंबादराय नम: लंबोदरं आ. स्था.।।

२२. *निर्ऋत्यां खण्डेंदौ*–ॐ भू. विकटाय नम: विकटं आ. स्था.।।

२३. *पश्चिमे वाप्याम्*–ॐ भू. धूम्रवर्णाय नम: धूम्रवर्ण आ. स्था.।।

२४. *वायव्यां खण्डेंदौ*–ॐ भू. विघ्नराजाय नम: विघ्नराजं आ. स्था।

२५. *उत्तरे वापी समीपे* –ॐ भू. गजाननाय नम: गजाननं आ. स्था।

२६. *ईशान खण्डेंदौ*–ॐभू. विनायकाय नम: विनायकं आ. स्था।।

२७. *प्राची ईशानमध्ये*–ॐ भू. गणपतये नम: गणपतिं आ. स्था.।।

२८. *पश्चिम निर्ऋति मध्ये* – ॐ भू. हस्तिदंताय नम: हस्तिदंत आ. स्था.।।

ईशानकोणसमारभ्यवायव्य पर्यन्त कृष्णश्रृंखलायेषु -

२९. *ईशाने कृष्ण श्रृंखलां*–ॐ भू. विष्णवे नम: विष्णुं आ. स्था।।

३०. *आग्नेय कृष्ण श्रृंखलां*–ॐ भू. शिवाय नम: शिवं आ. स्था।।

३१. *नैर्ऋत्ये कृष्ण श्रृंखलां*–ॐ भू. सूर्याय नम: सूर्यं आ. स्था.।।

३२. *वायव्ये कृष्ण श्रृंखलां*–ॐ भू. देव्यै नम: देवीं आ. स्था.।।

ईशान , आग्नेय, निर्ऋति, वायव्य कोणे नील वल्ल्याम् प्रतिकोणेषु द्वौ द्वौ मातृकां स्थापयेत्।

ईशानकोणे -

३३. ॐ भूर्भुव: स्व: ब्राह्मयै नम: ब्राह्मीं आ. स्था.।।

३४. ॐ भूर्भुवः स्वः माहेश्वर्यै नमः माहेश्वरीं आ. स्था.॥

आग्नेयकोणे -

३५. ॐ भूर्भुवः स्वः कौमार्यै नमः कौमारीं आ. स्था.॥

३६. ॐ भूर्भुवः स्वः वैष्णव्यै नमः वैष्णवीं आ. स्था.॥

नैऋतिकोणे -

३७. ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीं आ. स्था.॥

३८. ॐ भूर्भुवः स्वः इन्द्राण्यै नमः इंद्राणीं आ. स्था.॥

वायव्यकोणे -

३९. ॐ भूर्भुवः स्वः चामुण्डायै नमः चामुण्डां आ. स्था.॥

४०. ॐ भूर्भुवः स्वः महालक्ष्म्यै नमः महालक्ष्मीं आ. स्था.॥

श्वेतभद्रे वाप्यां पूर्वादि क्रमेण -

४१. *पूर्ववाप्याम्*—ॐ भूर्भुवः स्वः सुमुखाय नमः सुमुखं आ. स्था.॥

४२. *दक्षिण वाप्याम्*—ॐ भूर्भुवः स्वः दुर्मुखाय नमः दुर्मुख आ. स्था॥

४३. *पश्चिम वाप्याम्*—ॐ भूर्भुवः स्वः विघ्ननाशाय नमः विघ्ननाश आ. स्था.॥

४४. *उत्तर वाप्याम्*—ॐ भूर्भुवः स्वः प्रमोदाय नमः प्रमोद आ. स्था॥

ततौ सत्त्व परिधौ दिक्पाल तथा रजः परिधौ आयुध एवं तमः परिधौ अष्टभैरवं आवाहयेत्।

सत्त्वपरिधौ -

४५. *पूर्वे*— इंद्राय नमः। ४६. आग्नेयां — अग्नये नमः। ४७. दक्षिणे — यमाय नमः। ४८. नैर्ऋत्ये — नैर्ऋत्ये नमः। ४९. पश्चिमे — वरुणाय नमः। ५०. वायव्यां — वायवे नमः। ५१. उत्तरे — कुबेराय नमः।

रजपरिधौः — ५२. पूर्वे— वज्राय नमः। ५३. आग्नेयां — शक्त्यै नमः। ५४. दक्षिणे — दण्डाय नमः। ५५. नैर्ऋत्यां — खड्गाय नमः। ५६. पश्चिमे — पाशाय नमः। ५७. वायव्यां — अंकुशाय नमः। ५८. उत्तरे — गदाय नमः। ५९. ईशाने — त्रिशूलाय नमः।

तमः परिधौ पूर्वादि क्रमेण अष्टभैरवं आवाहयेत् ।

६०. **पूर्वे** — ॐ भू. असितांग भैरवाय नमः। आ. स्था.। ६१. आग्नेये — ॐ भू. रुरुवभैरवाय नमः। ६२. दक्षिणे — ॐ भू. चण्डभैरवाय नमः। ६३. नैर्ऋत्यां — ॐ भू. क्रोधभैरवाय नमः। ६४. पश्चिमे — ॐ भू. उन्मत्तभैरवाय नमः। ६५. वायव्यां — ॐ भू. कापालि भैरवाय नमः। ६६. उत्तरे — ॐ भू. भीषणभैरवाय नमः। ६७. ईशाने — ॐ भू. संहार भैरवाय नमः।

"ॐ मनोजूति" मंत्रेण गणपतिभद्रमण्डल देवता संस्थाप्य। षोडशोपचारेन् संपूज्य।

अथ त्रिचत्वारिंशदं (43) रेखात्मक हरिहरमण्डलस्थ द्वादशलिंगतोभद्र अग्निपुराणोक्त मण्डल देवता स्थापनम्

हरिहरात्मक द्वादशलिङ्गतोभद्र ३६ रेखा एवं ४३ रेखा के दोनों तरह के प्रयोग में आते है।

दोनों ही मे मध्य में सर्वतोभद्र मण्डल देवताओं को आवाहन होता है। तथा सर्वतोभद्र मण्डल के बाहर द्वादश लिंगों के देवताओं का आवाहन, पूजन होता है। संकल्प करके पूजन प्रारंभ करें।

"आदौ सर्वतोभद्रमण्डल देवता आवाहन "

(मण्डल मध्य भागे) विधान पूर्व में दिया गया है।

ततो द्वादशलिंगोक्तदेवता आवाह्य -

"ईशानादि क्रम" से पूर्व दशा के तीनों लिंगों पर आवाहन करें।

चतुर्थी नाम मंत्र से आवाहन तथा प्रथमा से स्थापन करें। —

।१।। ॐ भूर्भुवः स्वः शिवाय नमः। शिवमावाहयामि स्थापयामि।। भो शिव इहागच्छ इहतिष्ठ।। (एवं विधि सर्वत्र)

।।२।। ॐ भू. तत्पुरुषाय नमः आ. स्था.।।३।। ॐ भू. पशुपतये

नमः आ. स्था.।

दक्षिण दिशा के तीनों लिंगो पर अग्निकोण से नैऋति की ओर क्रमशः

।।४।। ॐ भू. उग्राय नमः आ. स्था.।।५।। ॐ भू. अघोराय नमः आ. स्था.। ।।६।। ॐ भू. रुद्राय नमः आ. स्था.।

पश्चिम दिशा के तीनों लिंगो पर नैर्ऋत्य से वायव्य क्रमशः -

।।७।। ॐ भू. भवाय नमः आ. स्था.। ।।८।। ॐ भू. सद्योजाताय नमः आ. स्था.।।९।। ॐ भू. सर्वजाताय नमः आ. स्था.।

उत्तर दिशा के तीनों लिंगों पर क्रमशः -

।।१०।। ॐ भू. महालिंगाय नमः आ. स्था.।।११।। ॐ भू. वामदेवाय नमः आ. स्था.। ।।१२।। ॐ भू. भीमाय नमः आ. स्था.।

पूर्व दिशा में ईशानादि क्रम से वायव्य पर्यन्त प्रत्येक दिशा की चारों वापी कुल १६ वापियों में प्रत्येक देवता का आवाहन करें। —

।।१३।। ॐ भू. असितांग भैरवाय नमः आ. स्था.। ।।१४।। ॐ भू. रुरुभैरवाय नमः आ. स्था.।।१५।। ॐ भू. चण्ड भैरवाय नमः आ. स्था.। ।।१६।। ॐ भू. क्रोधभैरवाय नमः आ. स्था.।।१७।। ॐ भू. उन्मत्त भैरवाय नमः आ. स्था.। ।।१८।। ॐ भू. कपालि भैरवाय नमः आ. स्था.।।१९।। ॐ भू. भीषण भैरवाय नमः आ. स्था.।।२०।। ॐ भू. संहार भैरवाय नमः आ. स्था.। ।।२१।। ॐ भू. भवाय नमः आ. स्था.।।२२।। ॐ भू. शर्वाय नमः आ. स्था.। ।।२३।। ॐ भू. ईशानाय नमः आ. स्था.।।२४।। ॐ भू. पशुपतये नमः आ. स्था.। ।।२५।। ॐ भू. रुद्राय नमः आ. स्था.।।२६।। ॐ भू. उग्राय नमः आ. स्था.। ।।२७।। ॐ भू. भीमाय नमः आ. स्था.।।२८।। ॐ भू. महते नमः आ. स्था.।

ईशानेन्द्रयोर्मध्ये भद्रे — ।।२९।। ॐ भू. शूलिने नमः आ. स्था।।

इन्द्राग्न्योर्मध्ये — ।।३०।। ॐ भू. चन्द्रमौलिने नमः आ. स्था।।

अग्नियमयोर्मध्येभद्रे —।।३१।। ॐ भू. चन्द्रमसे नमः आ. स्था.।।

यमनिर्ऋत्योर्मध्ये — ।।३२।। ॐ भू. वृषभध्वजाय नमः आ. स्था.।।

निर्ऋति वरुणयोर्मध्येभद्रे – ।।३३।। ॐ भू. विलोचनाय नमः आ. स्था.।। *वरुणवायव्योर्मध्ये भद्रे* – ।।३४।। ॐ भू. शक्तिधराय नमः आ. स्था.।। *वायुसोमयोर्मध्ये भद्रे* –।।३५।। ॐ भू. महेश्वराय नमः आ. स्था.।। *सोमईशानयोर्मध्ये भद्रे* ।।३६।। ॐ भू. शूलधारिण्ये नमः आ. स्था.।।

ईशान कोण से वायव्य कोण पर्यन्त प्रतिकोणे दो दो बल्लियों में क्रमशः अष्ट देवताओं का स्थापन करें।

।।३७।। ॐ भू. अनंताय नमः आ. स्था. ।।३८।। ॐ भू. तक्षकाय नमः आ. स्था. ।।३९।। ॐ भू. कुलिशाय नमः आ. स्था. ।।४०।। ॐ भू. कर्कोटकाय नमः आ. स्था. ।।४१।। ॐ भू. शंखपालाय नमः आ. स्था.।।४२।। ॐ भू. कंबलाय नमः आ. स्था. ।।४३।। ॐ भू. अश्वतराय नमः आ. स्था. ।।४४।। ॐ भू. पृथिव्यै नमः आ. स्था.।।

अग्निकोणे सप्तशृंखला देवता स्थापयेत् -

।।४५।। ॐ भूम्यै. ।।४६।। ॐ हैहयाय. ।।४७।। ॐ माल्यवते. ।।४८।। ॐ पारिजाताय. ।।४९।। ॐ दिक्पतये. ।।५०।। ॐ महादेवाय. ।।५१।। ॐ विष्णवे नमः आ. स्था.।।

नैर्ऋत्यकोणे सप्तशृखला देवताः स्थापयेत् -

।।५२।। ॐ माल्यवते. ।।५३।। ॐ महारुद्राय. ।।५४।। ॐ कालाग्निरुद्राय. ।।५५।। ॐ द्वादशादित्येभ्यो. ।।५६।। ॐ महेश्वराय. ।।५७।। ॐ मृत्युरोगाभ्यां. ।।५८।। ॐ वैनायक्यै.।।

वायव्यकोणे सप्तशृखला देवताः स्थापयेत् -

शाकुन्तले।।५९।। ॐ हेमकूटाय. ।।६०।। ॐ भरताय. ।।६१।। ॐ नलाय. ।।६२।। ॐ रामाय. ।।६३।। ॐ सर्वभौमाय. ।।६४।। ॐ नैषधाय. ।।६५।। ॐ विन्ध्याचलाय.।।

ईशानकोणे सप्तशृखला देवताः स्थापयेत् -

।।६६।। ॐ हेमकूटाय. ।।६७।। ॐ गंधमादनाय. ।।६८।। ॐ कुलाचलाय. ।।६९।। ॐ हिमाचलाय. ।।७०।। ॐ पृथिव्यै. ।।७१।।

ॐ अनंताय. ।।७२।। ॐ कमलासनाय.।।

ईशानादि चारों कोणों में खण्डेन्दुओं में देवताओं का स्थापन करें।

ऐशान्ये – ।।७३।। ॐ अश्विनिकुमाराभ्यां.। आग्नेये – ।।७४।। ॐ विश्वेभ्यो देवेभ्यो.। नैर्ऋत्ये – ।।७५।। ॐ पितृभ्यो.। वायव्यां – ।।७६।। ॐ नागेभ्यो नमः आ. स्था.।

तद्बहिः सत्त्व परिधौ पूर्वे – ।।७७।। ॐ इन्द्राय.। । आग्नेय – ।।७८।। ॐ आग्नेय.। दक्षिणे – ।।७९।। ॐ यमाय.। नैर्ऋत्ये – ।।८०।। ॐ निर्ऋतये.। पश्चिमे – ।।८१।। ॐ वरुणाय.। वायव्ये – ।।८२।। ॐ वायवे.। उत्तरे – ।।८३।। ॐ कुबेराय.। ऐशाने – ।।८४।। ॐ ईशानाय.

तद्बहि रजः परिधौ – पूर्वे –।।८५।। ॐ वज्राय.। आग्नेये–।।८६।। ॐ शक्त्ये.। दक्षिणे – ।।८७।। ॐ दण्डाय.। नैर्ऋत्ये – ।।८८।। ॐ खड्गाय.। पश्चिमे – ।।८९।। ॐ पाशाय.। वायव्ये – ।।९०।। ॐ अंकुशाय.। उत्तरे – ।।९१।। ॐ गदायै.। ऐशाने – ।।९२।। ॐ त्रिशूलाय नमः आ. स्था.।

(तद्बिहि तमः परिधौ ऋषीन् स्थापयेत्) पूर्वे – ।।९३।। ॐ कश्यपाय। आग्नेये – ।।९४।। ॐ अत्रये.। दक्षिणे – ।।९५।। ॐ भारद्वाजाय.। निर्ऋत्ये – ।।९६।। ॐ विश्वामित्राय.। पश्चिमे – ।।९७।। ॐ गोतमाय.। वायव्ये – ।।९८।। ॐ जमदग्ने.। उत्तरे – ।।९९।। ॐ वसिष्ठाय.। ऐशाने ।।१००।। – ॐ भूर्भुवः स्वः भृगवे नमः भृगुमावाहयामि स्थापयामि ।। भो भृगु इहागच्छ इहतिष्ठ।।

ततो प्रतिष्ठापनम् – ॐ मनोजुति. ।। ॐ षट्पञ्चाशदुत्तर शत संख्यका हरिहरमण्डलदेवताः सुप्रतिष्ठाः वरदाः भवतः।।

षोडशोपचारैः वा अन्योपचारैः संपूज्य तेभ्यो पायस बलिं दद्यात्।।

पूजनान्ते सर्मपणम्—अनया पूजया हरिहर मण्डल देवताः प्रीयन्ताम्।।

।। इति हरिहरात्मक मण्डल देवता स्थापनम् ।।

अथ चतुर्विंशत्रद्रेखात्मकं द्वादशलिंगतोभद्र मंडल देवता स्थापनम्

इस मंडल में – मध्य में अष्टदल या रुद्र यंत्र बनाये उसके बाहर ३२ पद की पीत कर्णिका, कर्णिका के बाहर चारों दिशा में षटपद कृष्ण भद्र आठ संख्या में होंगें उनके बीच मे एकं नवपद श्वेतभद्र चारों ओर चार संख्याओं में होंगे। कृष्ण भद्र के नीचे नव भद्र पद रक्त होंगे। भद्र चारों दिशा में आठ भद्र द्वादश लिंगो पर प्रत्येक दिशा में मध्य के लिंग पर श्वेत लिंग पर श्वेत भद्र व अन्य दो पर दो पीत भद्र होने से कुल चार श्वेत भद्र आठ पीत बनेंगें। द्वादश लिंगो के साथ १३ पद की श्वेत षोडशवापी होगी। वापी के पास में षटपद अष्ट रक्त भद्र बनाये। चारों कोणों में श्वेत भद्र त्रिपद बनाये। त्रिखण्ड के ऊपर १० पद कृष्ण शृङ्खला बनाये। कृष्ण शृङ्खला के पास अष्ट २१ कुल पद की हरीत या नील बल्ली बनाये। बल्ली के समीप सप्तपद पीत वल्ली दोनों और बनाये। बाहर श्वेत रक्त कृष्ण परिधि बनाये।

अथ आवाहनम् :– हाथ में कुंकुंम गंध चर्चित अक्षत् व पुष्प लेंवें, देवता के आवाहित स्थान पर सुपारी रखें व अक्षत छोडें। मण्डुकादि पीठ पूजन में कहीं–कहीं भेद है। प्रत्येक देवता के नाम के पहिले ॐ या ॐ भू भुर्व: स्व: का उच्चारण करें। **(कर्णिका मध्ये)**

१. ***खण्डेन्दो*** - ईशान्याम् – **ॐ गुरवेनम: गुरुम् आ. स्था.,** आग्नेय्याम्–**गणपतये नम: गणपति आ. स्था.**। नैर्ऋत्याम्–**दुर्गायै नम: दुर्गा आ. स्था.**। वायव्याम् **क्षेत्रपालाय नम: क्षेत्रपाल आ. स्था.**। मध्ये **सदाशिवाय नम: आ. स्था.**।

२. ***अष्टदलमध्ये*** – **मंडूकाय नम:, कूर्माय., कालाग्निरुद्राय., वराहाय, पृथिव्यै., अनंताय.। स्कंदाय.। सुधासिंधवे.। नलाय.। पद्माय.। सर्वेषु –पत्रेभ्यो. केसरेभ्यो, पत्राग्रे(दलाग्रे)–कर्णिकायै.। मध्ये–सिंहासनाय: पद्मासनाय. नम:।**

३. ***अष्टदलवाह्ये*** – **पीतकर्णिका मध्ये** – अग्निकोणे – **धर्मायनम:,** नैर्ऋत्यै–**ज्ञानाय., वायवे–वैराग्यायै.**। ऐशान्यां–**ऐश्वार्याय.**। पूर्वे–

अर्धमाय.। दक्षिणे– अज्ञानय.। पश्चिमे–अवैराग्यायै। उत्तरे – अनैश्वर्याय.। अष्टदल मध्ये–चिदाकाशाय., योग पीठाय., साम्ब सदाशिवाय नमः।

४. *पीतकर्णिकोपरि पूर्वतश्चतुर्दिक्षु* – पृथिव्यै नमः पृथ्वी आ. स्था.। कपालाय नमः कपालं आ. स्था.। सप्तसरद्भ्यो नमः सप्त सरित आ. स्था.। सप्त सागरेभ्यो नमः सप्तसागरान् आ. स्था.।

५. *कर्णिका समीपे चत्वारि श्वेतभद्राणि सन्ति तेषु पूर्वादिचतुर्दिक्षु* – तत्पुरुषाय नमः तत्पुरुषा आ. स्था.। सद्योजाताय नमः सद्योजात आ. स्था.। अघोराय नमः अघोर आ. स्था.। सद्योजाताय नमः सद्योजात आ. स्था.। वामदेवाय नमः वामदेव आ. स्था.।

६. *श्वेतभद्रसमीपे कृष्णान्यष्ट भद्राणि सन्ति तेषु ईशानद्यष्ट दिक्षु* – भगवत्यैनमः भगवतिं आ. स्था.। उमायै नमः उमा आ. स्था.। शंकर प्रियायै नमः शंकर प्रियां आ. स्था.। पार्वत्यै नमः पार्वतीं आ. स्था.। गौर्यै नमः गौरीं आ. स्था.। काल्यै नमः कालीं आ. स्था.। कौमार्यै नमः कौमारिं आ. स्था.। विश्वंभर्यै नमः विश्वंभरी आ. स्था.।

७. *कृष्ण भद्राण्यद्यः अष्टौ नवपद रक्तभद्राणि सन्ति तेषु ईशान्याष्ट दिक्षु* – नंदिने नमः नंदी आ. स्था.। महाकालाय नमः महाकाल आ. स्था.। महावृषभाय नमः महावृषभ आ. स्था.। भृंगकिरीटने नमः भृंगकिरीट आ. स्था.। स्कंदाय नमः स्कंदाय आ. स्था.। उमापतये नमः उमापतिं आ. स्था.। चण्डेश्वराय नमः चण्डेश्वर आ. स्था.। योगसूत्राय नमः योगसूत्र आ. स्था.।

८. *चतुर्लिंगतोपरि श्वेत भद्राणी सन्ति तेषु* – पूर्वादि चतुर्दिक्षु –धात्रे नमः धात्रिं आ. स्था.। मित्राय नमः मित्र आ. स्था.। यमाय नमः यम आ. स्था.। रुद्राय नमः रुद्र आ. स्था।

९. *तत्समीपेलिंगोपरि अष्टौ पीतभद्राणिसन्ति तेषु ईशानाद्यष्ट दिक्षु* – वरुणाय नमः वरुण आ. स्था.। सूर्याय नमः

सूर्य आ. स्था.। भगाय नमः भगं आ. स्था.। विवस्वते नमः विवस्वत आ. स्था.। पुरुषोत्तमाय नमः पुरुषोत्तम आ. स्था.। सावित्रे नमः सावित्रीं आ. स्था.। त्वष्ट्रे नमः त्वष्टा आ. स्था.। विष्णवे नमः विष्णु आ. स्था.।

१०. *द्वादशलिंगतो देवतानां स्थापनम्* – पूर्वे – शिवाय नमः शिव आ. स्था.। तद्दक्षिणे–एकनेत्राय नमः एकनेत्र आ. स्था.। तद्दक्षिणे एकरुद्राय नमः एकरुद्र आ. स्था.।

दक्षिणस्याम् – त्रिमूतर्य नमः त्रिमूर्ति आ. स्था.। तत्पश्चिमे – श्रीकंठाय नमः श्रीकंठ आ. स्था.। तत्पश्चिमे वामदेवाय नमः वामदेव आ. स्था.।

पश्चिमायाम् – ज्येष्ठाय नमः ज्येष्ठं आ. स्था.। तदुत्तरे – श्रेष्ठाय नमः श्रेष्ठं आ. स्था.। तदुत्तरे – रुद्राय नमः रुद्रं आ. स्था.।

उत्तरे – कालाय नमः काल आ. स्था.। तत्पूर्वे – कलविकरणाय नमः कलविकरण आ. स्था.। तत्पूर्वे – बलविकरणाय नमः बलविकरण आ. स्था.।

११. *षोड्श श्वेत वापीषु* – (पूर्व मध्य की २ में) अणिमायै नमः अणिमा आ. स्था.। महिमायै नमः महिमा आ. स्था.। (दक्षिण मध्य की २ में) लघिमायै नमः लघिमा आ. स्था.। गरिमायै नमः गरिमा आ. स्था.। (पश्चिममध्य की २ में) प्रात्यै नमः प्राप्तीं आ. स्था.। प्राकाम्यै नमः प्राकाम्य आ. स्था.। (उत्तर मध्य की २ में) ईशितायै नमः ईशित्व आ. स्था.। वशितायै नमः वशितां आ. स्था.। (पूर्वी ईशाने) ब्रह्माणै नमः ब्रह्मीं आ. स्था.। (पूर्वी आग्नेय) माहेश्वर्यै नमः माहेश्वरीं आ. स्था.। (दक्षिणी आग्नेय) कौमार्यै नमः कौमारीं आ. स्था.। (दक्षिणी नैऋत्य) वैष्णव्यै नमः वैष्णवीं आ. स्था.। (पश्चिमी नैऋत्य) वाराह्यै नमः वाराहीं आ. स्था.। (पश्चिमी वायव्य) इंद्राण्यै नमः इंद्राणी आ. स्था.। (उत्तरी वायव्य) चामुण्डायै नमः चामुण्डां आ. स्था.। (उत्तरी ईशाने) चण्डिकायै नमः चण्डिकां आ. स्था.।

१२. *वापी समीपे अष्ट रक्तभद्राणि (षटपद) सन्नितेषु*

ईशान्याद्य अष्टदिक्षु — (पूर्वी ईशाने) असितांग भैरवाय नमः असितांग भैरव आ. स्था.। (पूर्वी आग्नेये) रुरुभैरवाय नमः रुरुभैरव आ. स्था.। (दक्षिणी आग्नेये) चण्डभैरवाय नमः चण्डभैरव आ. स्था.। (दक्षिणी नैऋत्ये) क्रोध भैरवाय नमः क्रोध भैरव आ. स्था.। (पश्चिमी नैऋत्ये) उन्मत्त भैरवाय नमः उन्मत्त भैरव आ. स्था.। (पश्चिमी वायव्ये) काल भैरवाय नमः काल भैरव आ. स्था.। (उत्तरी वायव्ये) भीषण भैरवाय नमः भीषण भैरव आ. स्था.। (उत्तरी ईशाने) संहार भैरवाय नमः संहार भैरव आ. स्था.।

१३. *ईशानाद्य दिक्षु नील वर्ण वल्ली देवता* — घृताच्यै नमः — घृताचि आ. स्था.। मेनकायै नमः मेनका आ. स्था.। रम्भायै नमः रम्भा आ. स्था.। उर्वश्यै नमः उर्वशीं आ. स्था.। तिलोत्तमायै नमः तिलोत्तमा आ. स्था.। सुकेशायै नमः सुकेशं आ. स्था.। मंजुघोषयै नमः मंजुघोषं आ. स्था.। अप्सरोभ्यो नमः अप्सरां आ. स्था.।

१४. *मण्डलमध्ये परिधि समीपे कृष्ण वर्ण दशपदा शृंखला देवता स्थापनम्* — (आग्नेयम्) ॐ भवाय नमः भवं आ. स्था.। शिवाय नमः शिव आ. स्था.। रुद्राय नमः रुद्रं आ. स्था। पशुपतये नमः पशुपतिं आ. स्था.। उग्राय नमः उग्रं आ. स्था। भीमाय नमः भीमं आ. स्था.। महादेवाय नमः महादेवं आ. स्था.। ईशानाय नमः ईशानं आ. स्था.। अनंताय नमः अनंत आ. स्था.। वासुकीये नमः वासुकिं आ. स्था।

नैऋत्याम् — तक्षकाय नमः तक्षकं आ. स्था.। कुलीरकाय नमः कुलीरकं आ. स्था.। कर्कोटकाय नमः कर्कोटकं आ. स्था.। शंखपालाय नमः शंखपालं आ. स्था.। कंबलाय नमः कंबलं आ. स्था.। अश्वतराय नमः अश्वतर आ. स्था.। वैन्याय नमः वैन्यं आ. स्था.। अंगाय नमः अंगं आ. स्था.। हैहयाय नमः हैयय आ. स्था.। आ. स्था.। अर्जुनाय नमः अर्जुनं आ. स्था.।

वायव्यां – शाकुन्तलोयाय नमः शकुन्तले आ. स्था.। भरताय नमः भरतं आ. स्था.। नलाय नमः नलं आ. स्था.। रामाय नमः रामं आ. स्था.। सर्वभोमाय नमः सर्वभोमं आ. स्था.। निषधाय नमः निषधं आ. स्था.। विंध्याचलाय नमः विंध्याचलं आ. स्था.। माल्यवते नमः माल्यवतिं आ. स्था.। परियात्राय नमः परियात्रं आ. स्था.। सहयाय नमः सहयं आ. स्था.।

ऐशान्याम् – हेमकूटाय नमः हेमकूटं आ. स्था.। गंधमादनाय नमः गंधमादनं आ. स्था.। कुलाचलाय नमः कुलाचलं आ. स्था.। हिमवते नमः हिमवतं आ. स्था.। रैवताय नमः रैवतं आ. स्था.। देवगिरये नमः ददेवगिरि आ. स्था.। मलयाचलाय नमः मलयाचलं आ. स्था.। कनकाचलाय नमः कनकाचलं आ. स्था.। पृथिव्यै नमः पृथिवीं आ. स्था.। अनंताय नमः अनंतं आ. स्था.।

१५. *आग्नेयादि चतुर्दिक्षु खण्डेन्देषु* – अग्निकुमाराभ्यां नमः अग्निकुमार आ. स्था.। विश्वभ्यो देवेभ्यो नमः विश्वदेव आ. स्था.। पितृभ्यो नमः पितरः आ. स्था.। नागेभ्यो नमः नागं आ. स्था.।

१६. *मण्डलाद्बहि श्वेतपरिधौ पूर्वादि क्रमेण* – इंद्राय नमः इंद्रं आ. स्था.। अग्नये नमः अग्निं आ. स्था.। यमाय नमः यमं आ. स्था.। निर्ऋत्ये नमः निर्ऋतिं आ. स्था.। वरुणाय नमः वरुणं आ. स्था.। वायवे नमः वायुं आ. स्था.। कुबेराय नमः कुबेरं आ. स्था.। ईशानाय नमः ईशानं आ. स्था.। उर्ध्वयाम् ब्राह्मणे नमः ब्रह्मं आ. स्था.। अधः अनन्ताय नमः अनन्तं आ. स्था.।

१७. *रक्तपरिधौ पूर्वादि क्रमेण* – वज्राय नमः वज्रं आ. स्था.। शक्त्यै नमः शक्तिं आ. स्था.। दण्डाय नमः दण्ड आ. स्था.। खड्गाय नमः खड्गं आ. स्था.। पाशाय नमः पाशं आ. स्था.। अंकुशाय नमः अंकुशं आ. स्था.। गदायै नमः गदां आ. स्था.। त्रिशूलाय नमः त्रिशूलं आ. स्था.। पद्माय नमः पद्मं आ. स्था.। चक्राय नमः चक्रं आ. स्था.।

१८. *कृष्णपरिधौ पूर्वादि क्रमेण* – कश्यपाय नमः कश्यपं

आ. स्था.। अत्रये नमः अत्रिं आ. स्था.। भारद्वाजाय नमः भारतद्वाजं आ. स्था.। विश्वामित्राय नमः विश्वामित्रं आ. स्था.। गौतमाय नमः गौतमं आ. स्था.। जमदग्नये नमः जमदग्निं आ. स्था.। वसिष्ठाय नमः वसिष्ठं आ. स्था.। अरुंधत्यै नमः अरुंधतिं आ. स्था.।

१९. **पूर्वे** — ऋग्वेदाय नमः ऋग्वेदं आ. स्था.। दक्षिणे — यजुर्वेदाय नमः यजुर्वेदं आ. स्था.। पश्चिमे — सामवेदाय नमः सामवेदं आ. स्था.। उत्तरे — अथर्वेदाय नमः अथर्वेदं आ. स्था.।

।। इति द्वादश लिंगतोभद्र स्थापन पूजनम् ।।

अथ अष्टादशरेखात्मक चतुर्लिंगतोभद्र मण्डल

(व्रतोद्यापान चन्द्रिकानुसारेण)

(१). ***पूर्वलिंगेषु*** — (अधः, मध्य, अग्रभागे) वीरभद्राय नमः वीरभद्र आ. स्था.। (१) शंभवे नमः शंभु आ. स्था.। (२) अजैकपदे नमः अजैकपाद आ. स्था.। (३) *दक्षिणलिंगेषु* — अहिर्बुध्न्याय नमः हिर्बुध्न्य आ. स्था.। (४) पिनाकनये पिनाकिन आ. स्था.। (५) शूलपाणये नमः शूलपाणि आ. स्था.। (६)

पश्चिम लिंगेषु — भुवनाधीश्वराय नमः भुवनाधीश्वर आ. स्था.। (७) कपालिने नमः कपालिन आ. स्था.। (८) दिकपतये नमः दिकपतिं आ. स्था.। (९)

उत्तर लिंगेषु — रुद्राय नमः रुद्र आ. स्था.। (१०) शिवाय नमः शिव आ. स्था.। (११) महेश्वराय महेश्वर आ. स्था.। (१२)

चतुष्पद वल्यकाम् हरितखंडे ईशानाद्याष्ट दिक्षु — असितांग भैरवाय नमः असितांग भैरव आ. स्था.। (१३) रुरुभैरवाय रुरुभैरव आ. स्था.। (१४) चण्डभैरवाय नमः चण्डभैरव आ. स्था.। (१५) क्रोध भैरवाय नमः क्रोध भैरव आ. स्था.। (१६) उन्मत्त भैरवाय नमः उन्मत्त भैरव आ. स्था.। (१७) काल भैरवाय नमः काल भैरव आ. स्था.। (१८) भीषण भैरवाय

नमः भीषण भैरव आ. स्था.। (१९) संहार भैरवाय नमः संहार भैरव आ. स्था.। (२०)

३. ***शृंखला समीपे त्रिपद पीतवल्ल्याम् ईशानाद्यष्ट दिक्षु चतुर्विंशति देवता*** – भवाय नमः भवाय आ. स्था.। (२१) शर्वाय नमः शर्वं आ. स्था.(२२)। रुद्राय नमः रुद्रं आ. स्था.(२३)। पशुपतये नमः पशुपतिं आ. स्था.(२४)। महते नमः महन्तं आ. स्था.। (२५) भीमाय नमः भीमं आ. स्था.(२६)। ईशानाय नमः ईशानं आ. स्था.(२७)। अनंताय नमः अनंतं आ. स्था.(२८)। तक्षकाय नमः तक्षकं आ. स्था.(२९)। वासुकये वासुकिं आ. स्था.(३०)। कुलीशकाय नमः कुलीशं आ. स्था.(३१)। कर्कोटकाय नमः कर्कोटकं आ. स्था.(३२)। शंखपालाय नमः शंखपालं आ. स्था.(३३)। कंबलाय नमः कंबलं आ. स्था.(३४)। अश्वतराय नमः अश्वतर आ. स्था.(३५)। शूलिने नमः शूलिनं आ. स्था.(३६)। चन्द्रमौलये नमः चन्द्रमौलिं आ. स्था.(३७)। चन्द्रमसे नमः चन्द्रमसं आ. स्था.(३८)। वृषभध्वजाय नमः वृषभध्वजं आ. स्था.(३९)। त्रिलोचनाय नमः त्रिलोचनं आ. स्था.(४०)। शक्तिधराय नमः शक्तिधरं आ. स्था.(४१)। महेश्वराय नमः महेश्वरं आ. स्था.(४२)। शूलधारिणे नमः शूलधारिणं आ. स्था. (४३)। स्थाणवे नमः स्थाणुं आ. स्था.(४४)।

४. ***मध्येकार्णिकायाम्*** – ब्रह्मणे नमः ब्राह्मण आ. स्था.(४५)। (उत्तर शिवलिंगस्याध:) सोमाय नमः सोमं आ. स्था.(४६)। ईशान्यां खण्डेदो – ईशानाय नमः ईशानं आ. स्था.(४७)। (पूर्वालिंगस्याध:) इंद्राय नमः इंद्रं आ. स्था.(४८)। आग्नये खंडेदौ – अग्नेये नमः अग्निं आ. स्था.(४९)। (दक्षिण लिंग स्याध:) यमाय नमः यमं आ. स्था.(५०)। नैर्ऋत्यां खंडेदौ – निर्ऋत्यये नमः निर्ऋत्यं आ. स्था.(५१)। पश्चिम लिंगास्याध – वरुणाय नमः वरुणं आ. स्था.(५२)। वायव्यां खण्डेदौ – वायवे नमः वायुं आ. स्था.(५३)।

५. ***अष्ट रक्तभद्रे*** – वायुसोमयोर्मध्ये – अष्टवसुभ्यो नमः अष्टवसुं आ. स्था.(५४)। सोमेशानयोर्मध्ये – एकादशरुद्रेभ्यो एकादशरुद्रान् आ. स्था.(५५)। ईशानेन्द्रयोर्मध्ये – द्वादशादित्येभ्यो नमः द्वाशादित्यान् आ.

स्था.(५६)। इन्द्राग्नेयोर्मध्ये – अश्विभ्यां नमः अश्विनौ आ. स्था.(५७)। अग्नियमयोर्मध्ये – विश्वेभ्यो देवेभ्यो नमः विश्वदेवान् आ. स्था.(५८)। यमनिर्ऋत्योर्मध्ये – सप्तयक्षेभ्यो नमः सप्तयक्षान् आ. स्था.(५९)। निर्ऋत्यवरुणयोर्मध्ये – भूतनागेभ्यो नमः भूतनागान् आ. स्था.(६०)। वरुणवायव्योर्मध्ये – गंधर्वाप्सरोभ्यो नमःगंधर्वाप्सरसः आ. स्था.(६१)।

६. ***उत्तरलिंगस्याधः*** – स्कंदाय नमः स्कंद आ. स्था.(६२)। तत्रैव – नन्दीश्वराय नमः नन्दीश्वर आ. स्था.(६३)। *तत्रैव* – शूलमहाकालाभ्यां नमः शूलमहाकाल आ. स्था.(६४)।

ब्रह्मेशानयोर्मध्ये शृंखलायाम् – दक्षादि सप्तकाय नमः दक्षादि सप्तकान् आ. स्था.(६५)। *पूर्वलिंगस्याधः* – दुर्गायै नमः दुर्गा आ. स्था.(६६)। *तत्रैव* – विष्णवे नमः विष्णुं आ. स्था.(६७)।

ब्रह्माग्नयोर्मध्यो शृंखलायाम् – स्वधायै नमः स्वधा आ. स्था.(६८)। *दक्षिणलिंगस्यधः* – मृत्युरोगाभ्यां नमः मृत्युरोगौ आ. स्था.(६९)। *ब्रह्म निर्ऋत्योर्मध्ये शृखलायाम्* – गणपतये नमः गणपतिं आ. स्था.(७०)। *पश्चिमलिंगास्याधः* – अद्भ्यो नमोऽपः आ. स्था.(७१)। *ब्रह्मवायोर्मध्ये शृखलायाम्* – मरुद्भ्यो नमः मरुतः आ. स्था.(७२)।

७. ***ब्रह्मणः पादमूले कर्णिकायाम्*** – पृथिव्यै नमः पृथिवीं आ. स्था.(७३)। तत्रैव – गंगादिनदीभ्यो नमः गंगादिनदीः आ. स्था.(७४)। सप्तसागरेभ्यो नमः सप्तसागरान् आ. स्था.(७५)। ब्रह्मणो मस्तके कर्णिकोपरि – मेरवे नमः मेरुम् आ. स्था.(७६)।

८. ***उदकलिंगे*** – सद्योजाताय नमः सद्योजात आ. स्था.(७७)। प्राच्यालिंगे वामदेवाय नमः वामदेव आ. स्था.(७८)। *दक्षिणलिंगे* – अघोराय नमः अघोर आ. स्था.(७९)। *प्रतीची लिंगे* – तत्पुरुषाय नमः तत्पुरुषाय आ. स्था.(८०)। कर्णिकायां मेरुपरि ईशानाय नमः ईशान आ. स्था.(८१)।

९. ***मध्य परिधौ (पीतवर्णे षोडश पदे)*** – परिधवे नमः परिधि आ. स्था.(८२)। मेरोः परिधि – समंतात् लिंगानां स्कन्धे विशांति रक्त कोष्ठेषु (पंचपदा प्रीतकोणेषु) –चतुः पुरीभ्यो नमः चतुश्पुरीः आ. स्था.

(८३)। आग्नेयादिषु त्रिपद कोणेषु शृखला शिरसि – ऋग्वेदाय नमः ऋग्वेद आ. स्था.(८४)। यजुर्वेदाय नमः यजुर्वेद आ. स्था.(८५)। सामवेदाय नमः सामवेद आ. स्था.(८६)। अथर्वेदाय नमः अथर्ववेद आ. स्था.(८७)।

१०. ***उत्तरलिंगास्य दक्षिणवापीमारभ्य वामवापी पर्यन्तासु पंचदा वाप्यां*** – भवाय नमः भवाय आ. स्था.(८८)। शर्वाय नमः शर्व आ. स्था.(८९)। पशुपतये नमः पशुपतिं आ. स्था.(९०)। ईशानाय नमः ईशान आ. स्था.(९१)। उग्राय नमः उग्रम् आ. स्था.(९२)। रुद्राय नमः रुद्रं आ. स्था.(९३)। भीमाय नमः भीम आ. स्था.(९४)। महते नम महान्तम् आ. स्था.(९५)।

११. ***वापीसमीपस्थैकैकपदेषु पीतवर्णेषु क्रमशः*** – भवान्यै नमः भवानीं आ. स्था.(९६)। शर्वाण्यै नमः शर्वाणीं आ. स्था.(९७)। पशुपत्यै नमः पशुपतिं आ. स्था.(९८)। ईशान्यै नमः ईशानीं आ. स्था.(९९)। उग्रायै नमः उग्राम् आ. स्था.(१००)। रुद्राण्यै नमः रुद्राणीं आ. स्था.(१)। भीमायै नमः भीमां आ. स्था.(२)। महत्यै नम महातीं आ. स्था.(३)।

१२. ***पूर्वादिक्रमेण परिधि समीपे*** – (पूर्वे) ॐ पृथ्वी तत्वाय नमः आ. स्था.(४)। (दक्षिणे) जलतत्वाय नमः आ. स्था.(५)। (पश्चिमे) तेजस्तत्वाय नमः आ. स्था.(६)। (उत्तरे) वायुतत्वाय नमः आ. स्था.(७)। मध्ये – आकाश तत्वाय आ. स्था.(८)।

१३. ***बाह्यश्वेत परिधौ उत्तरतः सोमारभ्य वायुपर्यन्तमायुधानि*** – गदायै नमः गदा आ. स्था.(९)। त्रिशूलाय नमः त्रिशूलम.(१०)। वज्राय नमः वज्रम.(११)। शक्तये नमः शक्तिं.(१२)। दण्डाय नमः दण्डम्.(१३)। खड्गाय नमः खड्गं.(१४)। पाशाय नमः पाशम्.(१५)। अंकुशाय नमः अंकुशं.(१६)।

१४. ***तद्बाह्ये रक्तपरिधौ उत्तरतः क्रमेण*** – गौतमाय नमो गोतमं आ. स्था.(१७)। भारद्वाजाय नमो भारद्वाजं.(१८)। विश्वामित्राय नमा विश्वमित्रं.(१९)। कश्यपाय नमः कश्यपं आ. स्था.(२०)। जमदग्नये नमः जमदग्निं आ.(२१)। वशिष्ठाय नमो वशिष्ठ.(२२)। अत्रये नमो ऽत्रयिम्.

(२३)। अरुंधत्यै नमो ऽ रुन्धतीम्. आ. स्था.(२४)।

१५. *तद्बाह्ये कृष्ण परिधौ उत्तरतः क्रमेण* – ऐन्द्र्यै नमः ऐन्द्रीं आ.(२५)। कौमार्यै नमः कौमारीं.(२६)। ब्राह्म्यै नमो ब्राह्मीं.(२७)। वाराह्यै नमः वाराहीं आ.(२८)। चामुण्डायै नमः चमुण्डां आ.(२९)। वैष्णव्यै नमः वैष्णवीं आ.(३०)। माहेश्वर्यै नमो माहेश्वरीं आ.(३१)। विनायिक्यै नमो वैनायिकीं आ. स्था.(३२)।

।। एताः चतुर्लिंगतो भद्र मंडल देवता सुप्रतिष्ठताः वरदा भवन्तु ।।

ततः चतुर्लिंगतो भद्र मंडल देवतानां पूजनम्

ध्यानम्

ॐ नवशक्तिवने रम्ये ध्यायेद्देव उमापतिम् ।
चन्द्रकोटीप्रतीकाशं त्रिनेत्रं चन्द्रभूषणं ।।
आपिंगल जटाजूट रत्नमौलिविराजितम् ।
नीलग्रीव मुदारांगं नानाहारोपशोभित् ।।
वरदाभयहस्तं च हरिणं परश्वधं ।
दधानंगनागवलयं केयूरांगद भूषणम् ।।
व्याघ्रचर्मपरीधानं रत्नसिंहासनस्थितं ।
ध्यात्वा तद्वामभागे च गिरिजां भक्तवत्सलाम् ।।

आवाहनम् -

ॐ आगच्छ देवदेवेश महादेव महेश्वरः ।
गृहाण सहपार्वत्या सपरिवार देवता तव पूजांमया कृतां ।।

आसन -

दर्भाणां विष्टेरेणैव मयादत्तेन वै प्रभो ।
आसनं कुरु देवेश प्रसन्नोभव सर्वदा ।। आ.स. ।।

पाद्यम् -

ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानो हन्तेभ्यो करन्नमः ।। पा.स. ।।

अर्घ्यं -

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टप् पंक्त्या सह बृहत्युष्णिहा ।
ककुप्प सूचीभिः शमम्यंतु त्वा ।। अर्घ्यं. स. ।।

आचमनम् -

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ।
उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ।। आ.स. ।।

स्नानं -

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनीस्थो
वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि
वरुणस्य ऋतसदनमासीद ।।

पयस्नानम् -

गोक्षीरधामन्देवेश गोक्षोरेण गवाकृतम् ।
स्नपनं देवेश गृहाण शिवशंकर ।।

दुग्ध. स्ना. पुनर्जल स्नानं समर्पयामि।।

दधि -

दध्नाचैव मयादेव स्नपनं क्रियते तव ।
गृहाण भक्त्या दत्तं मे सुप्रसन्नो भवाव्यय ।।

दधि स्नानं, पुनः जल स्नानं।

घृत -

सर्पिषा देवदेवेश स्नपन क्रियतेमया ।
उमाकान्त गृहाणेदं श्रद्धया सुरसत्तम ।।

घृत स्नानं पुनः जल स्नानं।

मधु -

इदं मधु मयादत्तं तव तुष्ट्यर्थमेव च ।
गृहाणशंभो मे भक्त्या सुप्रसन्नो भव प्रभो ।

मधु स्नानं, पुनः जल स्नानं।

शर्करा -

शितया देवदेवेश स्नपन क्रियतेमया ।

गृहाणशंभो मे भक्त्या सुप्रसन्नो भव प्रभो ।

शर्करा स्नानं, पुनः जल स्नानं।

पंचामृत स्नानं -

पञ्चामृतं मयानीतं पयोदधि समन्वितम् ।
घृत मधु शर्करा स्नानार्थ प्रतिगृह्यताम् ।।

पञ्चामृत स्नानं, पुनः जल स्नानं।

शुद्धोदक स्नान -

ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त ऽआश्विनाः
श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्णायामा
अवप्लिता रौद्रा नभौरूपाः पार्जन्याः ।।

शुद्ध स्नानं समर्पयामि।

गंधोदक स्नानं -

कृष्णागरु प्रचुर कर्दम गन्धसार कस्तूरिकामलय चर्चित
रोचनादयै। सत्केशरैश्च रुचिरैश्च सुशीतलैश्च भक्त्या
निरंतरमहं स्नपयामि शंभो ।। गं. स्ना. स. ।।

कुशोदक स्नानं -

गोधूमगुंद्र कुश मुंज उशीर दूर्वा काशोयवास्तुलसी मंजरी
बिल्वखंडाः। मंदार बल्वजशरांकुर धान्यकेन भक्त्यो
निरन्तरमहं स्नपयामि शंभो ।। कु. स्ना.।।

पुष्पोदक स्नानं -

कोदण्ड खण्डित पुरत्रियारोषच्चूर्णी कृता समशराप ललाट
वक्त्रेत्स्तुत्या। सुरादिभि रजस्त्र मतिस्तुताप स्नानाप तेस्तु
सुरभीकृत पुष्पतोयं ।। पुष्प. स्नान. ।।

फलोदक स्नानं -

खर्जूर जम्बू कदली पनसाम्रपक्व पूगी कपित्थ बदरी
जमुदुबराणी। धात्रीफलानी रुचिराणि मनोहराणि भक्त्या
निरन्तरमहं स्नपयामि शम्भो ।। फल. स्नान.।।

रत्नोदक स्नानं -

रत्नोदकैर्मणिगणै रुदितार्क बिंब तुल्यै समान विमलैर्गुण मौक्तिकानि। वज्र प्रवाल मणिरंजित नीलकाद्यै भक्त्या निरंतरमहं स्नपयामि शंभो ।। रत्नो. स्नान. ।।

उद्वर्तन स्नान -

ॐ अ ठं शुनाते अ ठं शु: पृच्यताम्परुषा परु: । गंधस्ते सोम मवतुमदाय रसो अच्युत: ।। उद्व. स्नान. ।।

गंदोदक स्नान -

ॐ इमंमे गंगे यमुने सरस्वति शुतुद्रिस्तोमं सचतापरुष्ण्या। असिकन्या मरुद्वृथे वितस्तयार्जीकये श्रृणुह्या सुषोमया:।।

अभिषेक स्नानम् -

रुद्रसूक्तेन अभिषेकं कुर्यात्। पुन: शुद्ध स्नानं।

वस्त्र -

ॐ प्रमुञ्च धन्वनस्त्व मुभयो रात्क्न्योर्ज्याम् । याश्च ते हस्तऽइषव: पराता भगवोवप: ।।

व.स. आच. स. ।।

कोपीनवस्त्रम् -

ॐ नम: कपर्दिने च व्युप्तकेशाय च नम: सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो।।

कोपी. स.।।

यज्ञोपवीतं

ॐ ब्रह्मजज्ञानम्प्रथमं पुरस्ताद्विसीमत: सुरुचो वेन आव:। स बुध्न्या उपमाअस्य विष्ठा: सतश्चयोनिम मसतश्च विव:।।

यज्ञो. स. पुन: आच. ।।

गन्धं -

ॐ नम: श्वभ्य: श्वपतिभ्यश्च वोनमो नमो भवाय च रुद्राय च नम:। शर्वाय च पशुपतये च नमो नीलग्रीवाय च

शितिकंठाय च ॥ गं. स्ना. ॥

अक्षता -

नमः शम्भवाय च मयोभवाय च नमः शंकराय च
मयस्कराय च नमः शिवाय च शिवतराय च ॥

अक्षतानि सम. ॥

पुष्प -

नमः पार्य्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च
नमस्तीर्थ्याय च कूल्ल्याय च नमः शष्प्याय च फेन्यायच॥

पुष्पं सर्मपयामि ॥

बिल्व पत्र -

ॐ नमो बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चा हनन्याय च नमो घृष्णवे॥१॥ बि. स.॥ दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम्। अघोर पाप संहारं बिल्व पत्रं शिवार्पणम्॥२॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम्। त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्॥३॥ अखण्डै बिल्वपत्रैश्च पूजये शिव शंकरम्। कोटिकन्या महादानं बिल्व पत्रं शिवार्पणम्॥४॥ गृहाण बिल्वपत्राणि सपुष्पाणि महेश्वर। सुगन्धीनि भवानीश शिव त्वं कुसुम प्रिय ॥

बिल्व स.॥

तुलसी मंजरी -

ॐ शिवो भव प्रजाभयो मानुषीभ्यस्त्वमंगिरः ।
माद्यावा पृथिवी अभिशोचीर्मान्तरिक्षम्मा वनस्पतीम् ॥

तु. स. ॥

दूर्वा -

दूर्वेह्यमृत सम्पन्ने शतमूलेशतांकुरे ।
शत पातक संहन्त्री शतमायुष्यवर्धिनी ॥

दुर्वा समर्पयामि॥

शमीपत्र -

अमंगलाना शमनी शमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनी धन्यां प्रपद्येऽहं शमीं शुभाम् ।।श. स. ।।

आभूषणं -

वज्र माणिक्य वैडूर्यैमुक्ता विद्रूम माण्डतम् ।
पुष्पराग समायुक्तं भूषणं प्रति गृहताम् ।। आ. स. ।।

सुगंधित द्रव्य -

ॐ त्र्यंबकं यजामहे ।। सु. द्र. समर्पयामि ।।

धूपं -

ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शताध न्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो ।। धूपं. स।।

दीपं -

ॐ नमऽ आशवे चाजिराय च नमः शीग्घ्र्याय शीभ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च दीप्याय च ।।
दीपं दर्शयामि ।। हस्त प्रक्षालनम्

विजया आभरणं -

ॐ विज्यं धनुः कपर्दिने विशल्यो वाणवाँ २ ऽउत
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ।। वि. स. ।।

नैवेद्य -

ॐ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय नमो जघन्याय च बुध्न्याय च ।। नै. निवेदामि ।।

मध्ये जलं -

ॐ नमः सोभ्याय च प्रति सर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चा वसान्याय च नमः उर्वर्याय च खल्याय च।। म. स. ।।

ऋतु फलं -

फलानीमानि रम्याणि स्थापितानि तवाग्रतः । तेन मे
सफला वाप्तिर्भवेञ्जन्मनि जन्मनि ।। ऋतु. स. ।।

आचमनं -

त्रिपुरान्तकं दीनार्तिनाश श्रीकण्ठ शाश्वत गृहाणाचमनीय
च पवित्रोदक कल्पितम् ।। आ. स. ।।

अखण्ड ऋतुफलम् -

कुष्माण्ड मातुलिङ्गञ्च नारिकेल फलानि च रम्याणि
पार्वतीकान्त सोमेश प्रतिगृह्यताम् ।। अ. ऋ. सम. ।।

ताम्बूल पूगीफल -

ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहेमतीः
यथा शमसद्द्विपदेशं चतुष्पदे विश्वं पुष्टं ग्रामे ऽअस्मन्न
नातुरम् ।। ता. सम. ।।

दक्षिणा -

न्यूनातिरिक्त पूजायां संपूर्ण फल हेतवे ।
दक्षिणां काञ्चनी देव स्थापयामि तवाग्रत ।। द. स. ।।

प्रार्थना -

ऋण परतक दौर्भाग्यं दारिद्र्य विनित्र द्वापो ।
अशेषाघ विनाशाय प्रसीद मम शंकर ।।
दुःख शोकाग्नि संतप्त संसार भयपीडितं ।
महारोगा कुलं दीन त्राहिमां वृषवाहन ।।१।।
वन्दे देवमुमापति सुरगुरु वन्दे जगत कारणम् ।
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनाम्पतिम् ।।
वन्दे सूर्यशशाङ्क वह्नि नयनं वन्दे मुकुन्दप्रियं ।
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम् ।।२।।
अनेन पूजने श्रीलिंगतो भद्र मंडल देवता प्रियतां न मम् ।।

नन्दीश्वर मंत्र -

आयङ्गौः पृश्निर क्रमीद सदन्मातरम्पुरः पितरञ्च प्रतंत्स्वः ।।

वीरभद्र -

भद्रङ्कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैः
स्तुष्टुवा ठं सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।१।।
भद्रोनो अग्नि राहुतो भद्रा राति सुभगभद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ।।२।।

स्वामी कार्तिक -

यदक्रन्दः प्रथमञ्जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहु उपस्तुत्यम्महि जातन्ते अर्वन ।।१।।
यत्रबाणा सम्पतन्ति कुमारा विशिखा इव ।
तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु
विश्वाहाशर्म यच्छतु विश्वाहाशर्म यच्छतु ।।२।।

कुबेर -

कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्व वियूय ।।१।।
इहे हैषां कृणुहि भोजनानि ये वर्हिषो नम उक्तिंयजंति ।
वय सोमव्रते तव मनस्तनूषू विभ्रितः । प्रजावन्तः सुचेमहि ।।२।।

।इति चतुर्लिंगतोभद्र पूजनम्।

अथ दुर्गा यंत्र देवता स्थापनम्

अपने हृदय में इष्ट देवता का ध्यान करें, हाथ में पुष्पाक्षत लेंवें फिर बांयी नासिका से उन पुष्पों पर श्वांस छोड़ें भावना करें कि इष्ट देवता, हृदय कमल से बाहर आकर साकार सगुण रूप में पूजा ग्रहण करेंगें। तत्पश्चात उन पुष्पों को यंत्र मध्ये बन्दिुओं में स्थापित करें। सर्वत्र नाम के बाद **"नमः"** का उच्चारण करें।

१. *बिन्दु मध्ये* :– ऐं ह्रीं क्लीं चामुण्डाये विच्चे श्रीमहाकाली महालक्ष्मी महासरस्वती स्वरूपिणी श्रीत्रिगुणात्मिका स्वरूपाये श्रीमहादुर्गा देवताये नमः।

फिर गुरु मण्डल का ध्यान करें –

२. श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवम्। सिद्धौघं बटुकत्रयं पदयुगं दूति क्रमं मण्डलम्।।१।। वीरानऽष्ट चतुष्कषष्टि नवकम् वीरावलि पंचकम्। श्रीमन् मालिनी मंत्रराज सहितं वन्दे श्री गुरु मण्डलम्।।२।।

इसके बाद द्विव्यौघ, सिद्धौघ, मानवौघ गुरु तथा गुरु चतुष्टय का आवाहन करें। देवी को श्रीकुलस्वस्वरूप मानने से दिव्यायौघादि श्री यंत्र पूजा वाले लेंवें।

३. "काली समष्टिमानने से" कलिका के दिव्यौघादि गुरु पूजन करें।

यथा दिव्यौघ — ॐ महादेव्याम्बामयी श्री। ॐ महादेवानंदमयी.। ॐ त्रिपुराम्बामयी। ॐ त्रिपुरभैरवानंदनाथमयी आ. स्था.।

४. *सिद्धौघ गुरु* :— ॐ ब्रह्मानंदनाथमयी। ॐ पूर्णदेवानन्दनाथमयी आ. स्था.। ॐ चलचित्तानंदनाथमयी आ. स्था.। ॐ लोलानंदनाथमयी। ॐ कुमारानंदनाथमयी। ॐ क्रोधानंदनाथमयी। ॐ वरदानंदनाथमयी। ॐ स्मरद्वियानंदनाथमयी। ॐ मायाम्बानंदनाथमयी। ॐ मायावत्यानंदनाथमयी।

५. *मानवौघ गुरु* :— ॐ विमलानंदनाथमयी आ. स्था.। ॐ कुशलसानंदनाथमयी। ॐ भीमसेनानंदनाथमयी। ॐ सुधाकरानंदनाथमयी। ॐ मीनानंदनाथमयी। ॐ गोरक्षानंदनाथमयी। ॐ भोजदेवानंदनाथमयी। ॐ प्रजापत्या नंदनाथमयी। ॐ मूलदेवा नंदनाथमयी। ॐ रंतिदेवा नंदनाथमयी। ॐ विघ्नेश्वरानंदनाथमयी। ॐ हुताशना नंदनाथमयी। ॐ समरानंदनाथमयी। ॐ संतोषा नंदनाथमयी।

६. गौं गुरुवे नमः, परमगुरुवे नमः, परात्परगुरुवे नमः, परमेष्ठिगुरुवे नमः।

अपने गुरुकुल के चारों गुरुवों का स्मरण करें

७. *महादुर्गा की षड्ंग पूजा करें*। ऐं हृदयायनमः। ह्रीं शिरसे स्वाहा। क्लीं शिखायै वषट्। चामुण्डायै कवचाय हुं। विच्चे — नेत्रत्रयाय वौषट। मूलमंत्रेण — अस्त्राय फट्।

८. *त्रिकोणे* :— स्वाग्रादि प्रादक्षिण्येन क्रमेण — स्वरया सह विधात्रे आ. स्था.। श्रिया सह विष्णवे आ. स्था.। उमाया सह शिवाय आ. स्था।

दक्षिणे क्षुं नमः सिंहाय। वामे हुं नमः महिषाय आ. स्था.।,

९. *षट्कोणे* :– ऐं नंदजायै नमः अग्निकोणे। ह्रीं रक्तदंतिकायै नमः ईशाने। क्लीं शाकम्भर्यै नमः निर्ऋत्ये कोणे। दुं दुर्गायै नमः वायव्वे। हुं भीमायै नमः पूर्वे। ह्रीं भ्रामर्यै नमः पश्चिमे (स्वग्रे)

१० *अष्टदले* :– (पूर्वादिक्रमेण) ऐं ब्राह्मै.। ह्रीं माहेश्वर्यै.। क्लीं कौमार्यै.। ह्रीं वैष्णव्यै.। हुं वाराह्यै.। क्ष्यौं नारसिंह्यै.। लं ऐन्द्र्यै.। स्फें चामुण्डायै नमः आ. स्था.।

११ *अष्टदले पत्राग्रे* :– (पूर्वादिक्रमेण) असितांङ्ग भैरवाय नमः। रुरुभैरवाय.। चण्डभैरवाय.। क्रोधभैरवाय.। उन्मत्तभैरवाय.। कपालि भैरवाय.। भीषण भैरवाय.। संहार भैरवाय. नमः संहार भैरव आ. स्था.।

ततपश्चतुर्विंशतिदले :–

१२. *पूर्वादिक्रमेण* :– विं विष्णुमायायै नमः। चें चेतनायै.। बुं बुद्ध्यै। निं निंद्रायै.। क्षुं क्षुधायै.। छां छायायै.। शं शक्तयै.। तृं तृष्णायै। क्षुं क्षान्त्यै.। जां. जात्यै.। लं लज्जायै नमः। शां शान्त्यै। श्रं श्रद्धायै। कांत्यै। लं लक्ष्म्यै.। धृं धृत्यै.। वृं वृत्त्यै.। श्रुं श्रत्यै.। स्मृं स्मृत्यै.। दं दयायै.। तुं तुष्टयै.। पुं पुष्ट्यै। मां मातृभ्यो.। भ्रां भ्रान्त्यै. नमः भ्रान्ति आ. स्था.।

१३. *भूपूरे कोण चतुष्टये* :– गं गणपतये. अग्नियै। क्षं क्षेत्रपालाय. नैऋत्ये। बं बटुकाय. वायव्ये। यां योगिन्यै. ईशाने।

१४. *भूपूरे पूर्वादि क्रमेण* :– इन्द्राय.। अग्नये.। यमाय.। निर्ऋतये। वरुणाय.। वायवे.। सोमाय.। ईशानाय.। ब्रह्मणे.। अनंताय.।

१५. *तद्बहि* :– वज्रहस्तां गजारूढायै कादंबरीदेव्यै.। शक्ति हस्तायै अजवाहनायै उल्का देव्यै.। दण्डहस्तायै महिषारूढायै कराली देव्यै.। खड्गहस्तायै शववाहनायै रक्ताक्षीदेव्यै.। पाशहस्तायै मकरवाहनायै श्वेताक्षीदेव्यै.। अंकुश हस्तायै मृगवाहनायै हरिताक्षीदेव्यै.।

गदाहस्तायैसिंहारूढायै यक्षिणीदेव्यै.। शूलहस्तायै वृषभवाहनायै काली देव्यै.। पद्महस्तायै हंसवाहनायै सुरजेष्ठा देव्यै.। चक्र हस्तायै सर्पवाहनायै सर्पराज्ञी देव्यै नमः।

ॐ यंत्रस्थदेवताभ्यो नमः। यथाशक्त्या पूजनं कुर्यात्।

आगच्छवरदे देवि दैत्यदर्प निषूदिनि ।
पूजां गृहाण सुमुखि नमस्ते, शंकर प्रिये ।।

श्री महाकाली महालक्ष्मी महासरस्वती स्वरूपिणी दुर्गे देवते आवाहित भव स्थापिता भव। सन्निहिता भव। सन्निरुद्धा भव। संमुखीकृता भव। षडङ्गन्यासेन सकलीकृता भव। अवगुंठिता भव। परमीकृता भव। अमृताकृता भव। ॐ मनोजूति......। ॐ भूर्भुवः स्वः श्री महाकाली महालक्ष्मी महासरस्वती स्वरूपिणि श्रीमहादुर्गा देवता सुप्रतिष्ठिता वरदा भव। ततः श्रीसूक्तेन देवीन्यास कृत्वा षोढशोपचारैः पूजयेत्।

अथ गौरी तिलक मंडल देवता पूजनम्

अगर तंत्रोक्त देवी यंत्र नहीं बनायें तो गौरीतिलक मंडल अवश्य बनावें। तथा गौरीतिलक मंडल पर देवी यंत्र – प्रतिमा स्थापन कर पूजा करें। गौरी तिलक मंडल का यंत्र चौपड़ की आकृति का बनता है।

१. हाथ में अक्षत लेकर (१) **यंत्र के मध्य** में कलश में मूल मंत्र से देवी का आवाहन करें। (२) **चतुर्थी से आवाहन** तथा **प्रथमा** से स्थापन करें। **ॐ गौर्यै नमः गौरी आवाहयामि स्थापयामि।**

२. मंडल के मध्य में **८ पीत कोष्ठक** है इनमें ईशानादि ४ कोणों में १. ।।१।। **ॐ महाविष्णवे नमः ईशान्याम् ।।२।। महालक्ष्म्यै नमः आ. स्था. आग्नेयां ।।३।। महेश्वराय नमः नैर्ऋत्यां। ।।४।। महामायाय नमः वायव्याम्।**

पहले सभी श्वेत कोष्ठों के देवता की पूजा करें मध्य, पूर्व, अग्नि, दक्षिण, नैर्ऋत्य, उत्तर, एवं ईशान कोष्ठकों में होगी।

३. ***षडङ्ग पूजायाम् हृदयांग पूजा*** – श्वेत कोष्ठे मध्ये

चतुर्षुश्वेत कोष्ठेषु — (रक्त के चारों ओर) **ऋग्वेदाय नमः** पूर्वे। **यजुर्वेदाय नमः** दक्षिणे। **सामवेदाय नमः** पश्चिमे। **अथर्ववेदाय नमः** उत्तरे।

परिधि समीपे पूर्वे श्वेत काष्ठेषु वामसे दक्षिण की ओर

१. ॐ अद्भ्यो नमः २. ॐ जलोद्भयो नमः ३. ॐ ब्रह्मणे नमः ४. ॐ प्रजापतये नमः ५. ॐ शिवाय नमः।

अग्निकोण के दो श्वेत कोष्ठकों में — १. ॐ अनंताय नमः। २. ॐ परमेष्ठिने नमः।

पुनः अग्निकोण खण्ड में कृष्ण कोष्ठक के चारों ओर श्वेत कोष्ठकों में —

१. ॐ धात्रे नमः २. ॐ विधात्रे नमः ३. ॐ अर्य्यैम्णे नमः ४. ॐ मित्राय नमः।

दक्षिण दिशा में पांच श्वेत कोष्ठकों में — १. ॐ वरुणाय नमः २. ॐ अंशुमते नमः३. ॐ भगाय नमः ४. ॐ इंद्राय नमः ५. ॐ विवश्वते नमः।

नैऋत्यकोण के दो श्वेत कोष्ठकों में — १. ॐ पूष्णे नमः २. ॐ पर्ज्जन्याय नमः।

नैऋत्यकोण खण्ड के कृष्ण कोष्ठकों के चारों ओर श्वेत कोष्ठकों में —

१. ॐ त्वष्ट्रे नमः २. ॐ दक्षयज्ञाय नमः ३. ॐ देववसवे नमः ४. ॐ महासुताय नमः।

पश्चिम दिशा में पांच श्वेत कोष्ठकों में — १. ॐ सुधर्मणे नमः २. ॐ शङ्खपदे नमः ३. ॐ महाबाहवे नमः ४. ॐ वपुष्मते नमः ५. ॐ अनंताय नमः।

वायव्य कोण के दो श्वेत कोष्ठों में १. ॐ महेरणाय नमः २. विश्वावसवे नमः।

वायव्य खण्ड कोण के कृष्ण कोष्ठकों के चारों ओर श्वेत कोष्ठकों में —

१. ॐ सुपर्वणे नमः २. ॐ विष्टराय नमः ३. ॐ रुद्रदेवताय नमः ४. ॐ ध्रुवाय नमः।

... में पांच श्वेत कोष्ठों में — १. ॐ धराय नमः। २. ॐ सोमाय

नमः। ३. ॐ आपवत्साय नमः। ४. ॐ नलाय नमः। ५. ॐ अनिलाय नमः।

ईशान कोण खण्ड में कृष्ण कोष्ठ के चारों ओर श्वेत कोष्ठों में —

१. ॐ आवर्त्ताय नमः २. ॐ सांवर्त्ताय नमः ३. ॐ द्रोणाय नमः ४. पुष्कराय नमः

ईशान कोण के दो श्वेत कोष्ठों में :— १. ॐ प्रत्युषाय नमः २. ॐ प्रभासनाय नमः।

॥इति हृदयाङ्ग पूजा॥

(४) *अथ शिरोङ्ग शक्ति पूजा* — हरित कोष्ठों में पूजा करें।

मंडल में ५ हरित कोष्ठक बनते है। मध्यखण्ड १६ कोष्ठक का बनता है, बाकी चारों कोणों में प्रत्येक खण्डों में तीन दिशाओं के मिलाकर ११ खण्ड बनते हैं उनमें पूजा करें।

ईशान कोण की हरित शृंखला में ११ कोष्ठों में वायव्य से ईशान की ओर व निर्ऋत्य दिशा की तरफ।

१. ॐ ह्रींकार्य्यै नमः। २. ॐ ह्रीयै नमः। ३. ॐ कात्यायन्यै नमः। ४. ॐ चामुण्डायै नमः। ५. ॐ महादिव्यायै नमः। ६. ॐ महाशब्दायै नमः। ७. ॐ सिद्धिदायै नमः। ८. ॐ ह्रींकार्य्यै नमः। ९. ॐ ऐं नमः। १०. ॐ श्रीं श्रियै नमः। ११. ॐ ह्रीयै नमः।

ईशान कोण में कृष्ण कोष्ठ के चारों ओर आठ पीत कोष्ठों में—

१. ॐ लक्ष्म्यै नमः। २. ॐ श्रियै नमः। ३. ॐ सुधायै नमः। ४. ॐ मेधायै नमः। ५. ॐ प्रज्ञायै नमः। ६. ॐ मत्यै नमः। ७. ॐ स्वाहायैनमः। ८. ॐ सरस्वत्यै नमः।

अग्नि कोण की हरित शृङ्खला में वायव्य कोण से नैर्ऋत्य की ओर ११ कोष्ठो में —

१. ॐ गौर्यै नमः। २. ॐ पद्मायै नमः। ३. ॐ शच्यै नमः। ४. ॐ सुमेधायै नमः। ५. ॐ सावित्र्यै नमः। ६. ॐ विजयायै नमः। ७. ॐ देवसेनायै नमः। ८. ॐ स्वाहायै नमः। ९. ॐ स्वधायै नमः। १०. ॐ

मात्रे नमः। ११. ॐ गायत्र्यै नमः।

अग्नि कोण में कृष्ण कोष्ठ के चारों ओर पीत कोष्ठकों में

१. ॐ लोकमात्रे नमः। २. ॐ धृत्यै नमः। ३. ॐ पुष्ट्यै नमः। ४. ॐ तुष्ट्यै नमः। ५. ॐ आत्मकुल देवतायै नमः। ६. ॐ गणेश्वर्य्यै नमः। ७. ॐ कुलमात्र्यै नमः। ८. ॐ शान्त्यै नमः।

पूवार्द्ध भागे पीत कोष्ठेषु (१० खण्ड) उत्तर दिशा में दो पीत में से एक खण्ड, तीन खण्ड ईशान, २ पूर्व, ३ अग्नि कोण, एक दक्षिण का पीत खण्ड कुल दस खण्डों में। (उत्तर से दक्षिण तक क्रमशः पूजन करें)

१. ॐ जयन्त्यै नमः। २. ॐ मंगलायै नमः। ३. ॐ काल्यै नमः। ४. ॐ भद्रकाल्यै नमः। ५. ॐ कपालिन्यै नमः। ६. ॐ दुर्गायै नमः। ७. ॐ क्षमायै नमः। ८. ॐ शिवायै नमः। ९. ॐ धात्र्यै नमः। १०. ॐ स्वधायै स्वाहाभ्यां नमः।

(५) *अथ शिखाङ्ग देवपूजनम्* — नैऋत्य कोण की हरित शृंखला में ११ कोष्ठों में अग्निकोण से ईशान की ओर —

१. ॐ दीप्यमानायै नमः। २. ॐ दीप्तायै नमः। ३. ॐ सूक्ष्मायै नमः। ४. ॐ विभूत्यै नमः। ५. ॐ विमलायै नमः। ६. ॐ परायै नमः। ७. ॐ अमोघायै नमः। ८. ॐ विद्युतायै नमः। ९. ॐ सर्वतोमुख्यै नमः। १०. ॐ आनन्दायै नमः। ११. ॐ नंदिन्यै नमः।

नैऋत्य कोणे (खण्डे)— कृष्ण कोष्ठक के चारों ओर ८ पीत कोष्ठों में

१. ॐ शक्त्यै नमः। २. ॐ महासूक्ष्मायै नमः। ३. ॐ करालिन्यै नमः। ४. ॐ भारत्यै नमः। ५. ॐ ज्यातिष्मत्यै नमः। ६. ॐ ब्राह्म्यै नमः। ७. ॐ माहेश्वर्य्यै नमः। ८. ॐ कौमार्य्यै नमः।

वायु कोण में हरित शृंखला के ११ कोष्ठों में नैऋत्य से ईशान की ओर —

१. ॐ वैष्णव्यै नमः। २. ॐ वाराह्यै नमः। ३. ॐ इंद्राण्यै नमः। ४. ॐ चंडिकायै नमः। ५. ॐ बुद्ध्यै नमः। ६. ॐ लज्जायै नमः। ७. ॐ वपुष्मत्यै नमः। ८. ॐ शान्त्यै नमः। ९. ॐ कान्त्यै नमः। १०. ॐ रत्यै नमः। ११. ॐ प्रीत्यै नमः।

वायु कोण खण्ड में कृष्ण खंड के चारों ओर ८ पीत खंडों में —

१. ॐ कीर्त्यै नमः। २. ॐ प्रभायै नमः। ३. ॐ काम्यायै नमः। ४. ॐ कान्त्यायै नमः। ५. ॐ ऋद्ध्यै नमः। ६. ॐ दयायै नमः। ७. ॐ शिवदूत्यै नमः। ८. ॐ श्रद्धायै नमः।

पश्चिमार्द्ध पीतकोष्ठेषु — दक्षिण का एक नैऋत्य के तीन, पश्चिम के दो वायव्य के तीन तथा उत्तर का एक खण्ड (१० खण्डों)में —

१. ॐ क्षमायै नमः। २. ॐ क्रियायै नमः। ३. ॐ विद्यायै नमः। ४. ॐ मोहिन्यै नमः। ५. ॐ यशोवत्यै नमः। ६. ॐ कृपावत्यै नमः। ७. ॐ सलीलायै नमः। ८. ॐ सुशीलायै नमः। ९. ॐ ईश्वर्यै नमः। १०. ॐ सिद्धश्वर्यै नमः।

(६) *अथ कवचाङ्गेषु* — परिधि समिपे अरुण कोष्ठये ऋषीन् पूजयेत्

पूर्वे — १. ॐ द्वैपायनाय नमः। २. ॐ भारतद्वाजाय नमः।

दक्षिणे — १. ॐ गौतमाय नमः। २. ॐ सुमन्तवे नमः।

पश्चिमे — १. ॐ देवलाय नमः। २. ॐ व्यासाय नमः।

उत्तरे — १. ॐ वसिष्ठाय नमः। २. ॐ च्यवनाय नमः।

ईशाने एको कृष्ण कोष्ठये — १. ॐ कण्वाय नमः। अग्निकोण एको कृष्ण कोष्ठये — १. ॐ मैत्रेयाय नमः। नैर्ऋत्य कोणे कृष्ण कोष्ठये — १. ॐ कवये नमः। वायव्यकोणे एको कृष्ण कोष्ठये — १. ॐ विश्वामित्राय नमः।

मध्ये खण्डे अष्ट पीतकोष्ठेषु (रक्त कोष्ठ के चारों ओर)

१. ॐ वामदेवाय नमः। २. ॐ सुमन्ताय नमः। ३. ॐ जैमिन्ये नमः। ४. ॐ क्रतवे नमः। ५. ॐ पिप्पलादाय नमः। ६. ॐ पाराशराय नमः। ७. ॐ गर्गाय नमः। ८. ॐ वैशम्पाय नमः।

मध्य खण्डे द्वादश कृष्ण कोष्ठेषु प्रागेषु ईशानतः — १. ॐ दक्षाय नमः। २. ॐ मार्कण्डेयाय नमः। ३. ॐ मृकण्डाय नमः। ४. ॐ लोमशाय नमः। ५ ॐ पुलहाय नमः। ६. ॐ पुलस्त्यायनमः। ७. ॐ

बृहस्पतये नमः। ८. ॐ जमदग्नये नमः।.९ ॐ जामदग्न्याय नमः।१०. ॐ दलभ्याय नमः। ११. ॐ शिलोञ्छनाय नमः। १२. ॐ गालवाय नमः।

मध्ये षोडश हरित्कोष्ठेषु पूर्वादिक्रमेण ईशानतः –

१. ॐ याज्ञवल्क्याय नमः। २. ॐ दुर्वासाये नमः। ३ ॐ सौरभाये नमः। ४. ॐ जावालये नमः। ५. ॐ वाल्मीकये नमः। ६. ॐ बह्चाय नमः। ७. ॐ इन्द्रप्रमितये नमः। ८. ॐ देवमित्राय नमः। ९. ॐ जाजलये नमः। १०. ॐ शाकल्याय नमः। ११. ॐ मुद्गलाय नमः।१२. ॐ जातुकर्ण्याय नमः।१३. ॐ बलाकाय नमः।१४. ॐ कृपाचार्याय नमः।१५. ॐ सुकर्मणे नमः।१६. ॐ कौशल्याय नमः।

(७) *अथ नेत्राङ्ग पूजनम्* – (१) (ईशान कोणे द्वादश अरुणकोष्ठेषु प्राग्रषु ईशानतः)

१. ॐ ब्रह्माग्नये नमः। २. ॐ गार्हष्पत्याग्नये नमः। ३. ॐ ईश्वराग्नये नमः। ४ . ॐ दक्षिणाग्नये नमः। ५. ॐ वैष्णवाग्नये नमः। ६. ॐ आहवानीयाग्नये नमः। ७. ॐ सप्तजिह्वाग्नये नमः। ८. ॐ इध्मजिह्वाग्नये नमः। ९. ॐ प्रवर्ग्याग्नये नमः।१०. ॐ बडवाग्नये नमः। ११. ॐ जठराग्नये नमः। १२. ॐ लोकिकाग्नये नमः।

(२) *अग्निकोणे द्वादश अरुण कोष्ठेषु* – १. ॐ सूर्याय नमः। २. ॐ वेदाङ्गाय नमः। ३. ॐ भानवे नमः। ४. ॐ इंद्राय नमः। ५. ॐ खगाय नमः। ६. ॐ गभस्तिने नमः। ७. ॐ यमाय नमः। ८. ॐ अंशुमते नमः। ९. ॐ हिरण्यरेतसे नमः। १०. ॐ दिवाकराय नमः। ११. ॐ मित्राय नमः। १२. ॐ विष्णवे नमः।

(३) *नैऋत्यकोणे द्वादश अरुण कोष्ठेषु* – १. ॐ शम्भवे नमः। २. ॐ गिरिशयाय नमः। ३. ॐ अजैक पदे नमः। ४. ॐ अर्हिर्बुध्न्याय नमः। ५. ॐ पिनाकपाणये नमः। ६. ॐ अपराजिताय नमः। ७. ॐ भुवनाधीश्वराय नमः। ८. ॐ कपालिने नमः। ९. ॐ विशाम्पतये नमः। १०. ॐ रुद्राय नमः। ११. ॐ वीरभद्राय नमः।

१२. ३ॐ अश्विनीकुमाराभ्यां नमः।

(४) *वायु कोणे द्वादश कोष्ठेषु* — १. ३ॐ आवहाय नमः। २. ३ॐ प्रवहाय नमः। ३. ३ॐ उद्वहाय नमः। ४. ३ॐ सम्वहाय नमः। ५. ३ॐ विवहाय नमः। ६. ३ॐ परीवहाय नमः। ७. ३ॐ परीवहाय नमः। ८. ३ॐ धरायै नमः। ९. ३ॐ अद्भयो नमः। १०. ३ॐ अग्नये नमः। ११. ३ॐ वायवे नमः। १२. ३ॐ आकाशाय नमः।

(७) *अथास्त्राङ्ग पूजानंतरे 48 कृष्ण कोष्ठकेषु ऋषीन्पूजयेत्* — प्रत्येक दिशा में १ + १ + ७ + १ + १ के अनुसार ११ कृष्ण कोष्ठक है कुल चारो दिशाओं में ४४ हुये तथा मध्य खण्डों के १–१ करके चार कुल ४८ हुये।

(१) *पूर्व दिशायाम्* — (ईशान से अग्नि कोण तक १ + १ + ७ + १ + १) १. ३ॐ हिरण्यनाभाय नमः। २. ३ॐ पुष्पञ्जयाय नमः। ३. ३ॐ द्रोणाय नमः। ४. ३ॐ शृङ्गिणे नमः। ५. ३ॐ वादराणाय नमः। ६. ३ॐ अगस्त्याय नमः। ७. ३ॐ मनवे नमः। ८. ३ॐ कश्यपाय नमः। ९. ३ॐ धौम्याय नमः। १०. ३ॐ भृगवे नमः। ११. ३ॐ वीतिहोत्राय नमः।

(२) *दक्षिणे कृष्ण कोष्ठेषु* — (अग्नि कोण से नैर्ऋत्य तक १ + १ + ७ + १ + १) १. ३ॐ मधुछन्दसे नमः। २. ३ॐ वीरसेनाय नमः। ३. ३ॐ कृतवृष्णवे नमः। ४. ३ॐ अत्रये नमः। ५. ३ॐ मेधातिथये नमः। ६. ३ॐ अरिष्टनेमये नमः। ७. ३ॐ अङ्गिरसाय नमः। ८. ३ॐ इंद्रप्रमादाय नमः। ९. ३ॐ इध्मबाहवे नमः। १०. ३ॐ पिप्पलादाय नमः। ११. ३ॐ नारदाय नमः।

(३) *पश्चिमे कृष्ण कोष्ठेषु* — (नैर्ऋत्य कोण से वायव्य कोण तक १ + १ + ७ + १ + १) १. ३ॐ अरिष्टसेनाय नमः। २. ३ॐ अरुणाय नमः। ३. ३ॐ सनकाय नमः। ४. ३ॐ सनन्दनाय नमः। ५. ३ॐ सनातनाय नमः। ६. ३ॐ सनत्कुमाराय नमः। ७. ३ॐ कपिलाय नमः। ८. ३ॐ कर्दमाय नमः। ९. ३ॐ मरीचये नमः। १०. ३ॐ क्रतवे नमः। ११. ३ॐ प्रचेतसे नमः।

(४) *उत्तरे कृष्ण कोष्ठेषु* – (वायव्य से ईशान कोण तक १ + १ + ७ + १ + १) १. ॐ उत्तमाय नमः। २. ॐ दधीचये नमः। ३. ॐ श्राद्धदेवताभ्यो नमः। ४. ॐ गणदेवेभ्यो नमः। ५. ॐ विद्या ६ रेभ्यो नमः। ६. ॐ अप्सरेभ्यो नमः। ७. ॐ यक्षेभ्यो नमः। ८. ॐ रक्षेभ्यो नमः। ९. ॐ गंधर्वेभ्यो नमः। १०. ॐ पिशाचेभ्यो नमः। ११. ॐ गुह्यकेभ्यो नमः।

(५) *मध्ये चतुर्कृष्ण कोष्ठेषु ईशानात वायव्य पर्यन्त* – १. ॐ सिद्ध देवताभ्यो नमः। २. ॐ औषधीभ्यो नमः। ३. ॐ भूतग्रामाय नमः। ४. ॐ चतुर्विधभूतग्रामाय नमः।

।। इति हेमाद्रि लिखित गौरीतिलक पूजनम् ।।

अथ गायत्री यंत्र पूजा

भगवती श्रीगायत्री की विशेष है, इसका विस्तृत पूजा प्रकरण है यह एकापदा, द्विपदा, त्रिपदा, चतुष्पदा, पंचपदा, षट्पदा सप्तपदा, अष्टपदा, नवपदा..... शतपदा एवं सहस्राक्षरी भी है। अतः इसकी उपासना का क्षेत्र वृहद् है।

सामान्यतया त्रिपदागायत्री की उपासना प्रचलित है **रात्रि समय तुरीय संध्या में चतुष्पदा गायत्री करें। अलग–अलग दीक्षा क्रम है। दीक्षा बाद के क्रम सिद्धि में भिन्न पाद गायत्री क्रम करना चाहिये अन्यथा सफलता में बाधायें रहती है।**

अच्छिन्नाद् गायत्री ब्रह्महत्यां प्रयच्छति ।
भिन्नपाद गायत्री ब्रह्महत्यां व्यपोहति ।।

अर्थात् **ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गोदेवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ (इस तरह भिन्नपाद गायत्री हुई)**

कामना भेदद से **ऐं, ह्रीं, श्रीं क्लीं** कोई भी बीज मंत्र लगाकर भिन्नपाद मंत्र जपा जा सकता है।

प्रणव न्यास **:– ॐ प्रणवस्य ब्रह्मा ऋषि, गायत्री छंद परमात्मा देवता शरीर शुद्ध्यर्थे जपे विनियोगः।**

ॐ ब्रह्मऋषये नमः शिरसि। ॐ गायत्री छंदसे नमः मुखे। ॐ

परमात्मदेवायै नमः हृदि।

सप्त व्याहृति न्यास — ३ॐ सप्तव्याहृतीनां जगदग्नि भारद्वाजात्रि गौतम कश्यप विश्वामित्र वसिष्ठाः ऋषयः, गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्ति त्रिष्टुब्जगत्यश्छंदासि, अग्निवायु सूर्य बृहस्पति वरुणेंद्र विश्वेदेवा देवताः न्यासे जपे विनियोगः।

३ॐ जगदग्नि भारद्वाजात्रि गौतम कश्यप विश्वामित्र वसिष्ठः ऋषिभ्यो नमः शिरसि।

३ॐ गायत्र्युष्णिगनुष्टु ब्बृहती पङक्ति त्रिष्टुब्जगती छंदोभ्यो नमः मुखे। अग्निवायु सूर्य बृहस्पति वरुणेंद्र विश्वेदेव देवताभ्यो नमः हृदि।

ऋष्यादिन्यास :— ३ॐ अस्य श्री गायत्री मंत्रस्य विश्वामित्र ऋषिः गायत्री छंदः। सविता देवता। न्यासे जपे च विनियोगः।

३ॐ विश्वामित्र ऋषिये नमः शिरसि। ३ॐ गायत्री छन्दसे मुखे। ३ॐ सवितृदेवतायै नमः हृदि।

३ॐ भूः अंगुष्ठाभ्यां नमः। ।। हृदयाय नमः।।

३ॐ भुवः तर्जनीभ्यां नमः। ।। शिरसे स्वाहा ।।

३ॐ स्वः मध्यमाभ्यां नमः। ।। शिखायै नमः ।।

३ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः। ।। कवचाय हुँ।

३ॐ भर्गोदेवस्य धीमहि, कनिष्ठकाभ्यां नमः। ।। नेत्रत्रयाय वाषट्।।

३ॐ धियो यो नः प्रचोदयात्, करतलपृष्ठाभ्यां नमः।। अस्त्राय फट्।।

व्याहृति न्यास :— १. ३ॐ भू नमः हृदये। २. ३ॐ भुवः नमो मुखे। ३. ३ॐ स्वः नमो दक्षांसे। ४. ३ॐ महः नमो वामांसे। ५. ३ॐ जनः नमो दक्षिणोरौ ६. तपः नमो वामोरौ ७. सत्यः नमः जठरे।

अथ गायत्री वर्ण न्यास :— १. ३ॐ तत् नमः पादद्वयांगुलिमूलयोः। २. ३ॐ सं नमः गुल्फयोः। ३. ३ॐ विं नमः जानुनोः। ४. ३ॐ तुर् नमः पादमूलयो। ५. ३ॐ वं नमः लिंगे। ६. ३ॐ रें नमः नाभौ। ७. ३ॐ णिं नमः हृदये। ८. ३ॐ यं नमः कण्ठे। ९. ३ॐ भं नमः हस्तद्वांगुली

मूलयो:। १०. ॐ र्गो नम: मणिबंधयो। ११. ॐ दें नम: कर्पूरयो:। १२. ॐ वं नम: बाहुमूलयो:। १३. ॐ स्यं नम: आस्ये मुखे। १४. ॐ धीं नम: नासापुटयो:। १५. ॐ मं नम: कपोलयो:। १६. ॐ हिं नम: नेत्रयो:। १७. ॐ धीं नम: कर्णयो:। १८. ॐ यों नम: भ्रूमध्ये। १९. ॐ यों नम: मस्तके। २०. ॐ नं नम: पश्चिमवक्त्रे। २१. ॐ प्रं नम: उत्तरवक्त्रे। २२. ॐ चों नम: दक्षिणवक्त्रे। २३. ॐ दं नम: पूर्ववक्त्रे। २४. ॐ यात् नम: उर्ध्ववक्त्रे।

पदन्यास :— ॐ तत् नम: शिरसि। . ॐ सवितुर्नम: भ्रुवोमध्ये। . ॐ वरेण्यं नम: नेत्रयो। . ॐ भर्गो नम: मुखे। . ॐ देवस्य नम: कंठे। . ॐ धीमहि नम: हृदये। ॐ धियो नम: नाभौ। ॐ यो नम: गुह्ये। ॐ न: नम: जानुनो:। ॐ प्रचोदयात् नम: पादयो: । ॐ आपोज्योतिरसोमृतं ब्रह्म भूर्भुव: स्वरोम् नम: शिरसि।

षडङ्ग देवन्यास :— ॐ तत्सवितुर्ब्रह्मणे हृदयाय नम: । ॐ वरेण्यं विष्णवे शिरसे स्वाहा। ॐ भर्गोदेवस्य रुद्राय शिखायै वषट्। ॐ धीमहि ईश्वराय कवचाय हुँ। ॐ धियो योन: सदाशिवाय नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् सर्वात्मने अस्त्रायफट्।

व्यापक न्यास :— ॐ तत्सवितुर्वरेण्यं नम: नाभ्यादि पादांगुलि पर्यन्तम्। ॐ भर्गोदेवस्य धीमहि नम: हृदयादि नाभ्यान्तरम्। ॐ धियो यो न: प्रचोदयात् मूर्द्धादि हृदयांतम्।

इसके बाद मूल मंत्र से दोनों हाथों की हथेलियों से शिर से पांव तथा पैर से शिर क ४ बार व दो—दो बार दोनों पार्श्व में करें।

।। सर्वदेवानां यंत्रस्थमंडलेषु पीठ पूजा ।।

अपने सामने विशेषार्घ पात्र के पृष्ठ भाग में जो सिंहासन रखा है या मंडल बना रखा है उसका प्रोक्षण करें, अष्टदल मण्डल रचित तश्तरी में या कलश पात्र पर श्रीयंत्र, गायत्रीयंत्र या साध्य देव यंत्र को स्थापित करें।

पीठ पूजा :-

हस्ते अक्षतान्गृहीत्वा — ॐ पूं पूर्व पीठाय नम:। ॐ पूं पूर्णपीठाय

नमः। कं कामपीठाय नमः। प्राच्यां दिशी — ॐ उडड्डीयानपीठाय नमः। आग्नेयां—मातृपीठाय नमः। दक्षिणे—जं जलंधरपीठाय नमः। नैर्ऋत्य—कं कोल्हापुरपीठाय नम्ः। पश्चिमे पूं पूर्णगिरिपीठाय नमः। वायव्यां—सौं—सौहारोपपीठाय नमः। उत्तरे कं कोल्हागिरिपीठाय नमः। ऐशानां—कं कामरूपपीठाय नमः।

दक्षिणे — गुरुवे.। परम गुरुवे.। परात्पर गुरुवे.। परमेष्ठि गुरुवे.। मातृपितृभ्यां। उपमन्यु, नारद, सनक, व्यासादिभ्यो नमः।

वामे — गं गणपतिये.। दुं दर्गाये.। सं सरस्वत्यै.। क्षं क्षेत्रपालाय।

पीठ देवता स्थापनम् :-

मं मण्डूकाय नमः। कां कालाग्निरुद्राय नमः। मूं मूल प्रकृत्यै नमः। आं आधार शक्तै नमः। कूं कूर्माय नमः। ॐ अनंताय नमः। वं वराहाय नमः। पृं पृथिव्यै.। ॐ अमृतावर्णवाय.। ॐ आं...क्षं नवरत्नमय मणिद्वीपाय नमः। नं नंदनोद्यानाय नमः। कं कल्पवृक्षाय नमः। स्वं स्वर्ण प्राकाराय नमः। चिं चिंतामणि मण्डपाय.। रं रत्न वदिकायै.। रं रत्नसिंहासनाय नमः।

मंडल के चारों कोनों में पूजा करें।

धं धर्माय नमः.आग्नये। ज्ञां ज्ञानाय नमः नैर्ऋत्ये। वैं वैराग्य नमः वायव्ये। ऐं ऐश्वर्याय नमः ईशाने।

इसके बाद मंडल की पूर्वादि चारों दिशाओं में :-

अं अधर्माय नमः पूर्वे। अं अज्ञानाय नमः दक्षिणे। अं अवैराग्य नमः पश्चिमे। अं अनैश्वर्याय नमः उत्तरे।

इसके बाद मण्डल के मध्य में :-

ह्रीं आदिमायायै नमः। विं विद्यायै.। आं आनन्दकन्द पद्ममाय.। सवित्रालाय नमः। प्रं प्रकृतिमय पत्रेभ्यो नमः। विं विकारमय केसरेभ्यो नमः। रं वह्नि मण्डलाय नमः। अं सूर्य मण्डलाय नमः। वं सों सोममण्डलाय नमः। सं सत्वाय नमः। रं रजसे नमः। तं तमसे नमः। मं महात्मने नमः। मां मायात्वाय नमः। विं विद्यातत्वाय नमः। शं

शिवतत्वाय नमः। ब्रं ब्रह्मणे नमः। विं विष्णवे नमः। मं महेश्वराय नमः।

इसके बाद आग्नेयादि चारों कोणों में आं आत्मने नमः आग्नये।।अं अंतरात्मने नमः वायव्ये। अं परात्मने नमः नैऋत्ये। ह्रीं ज्ञानात्मने नमः ईशाने।

अथ नवशक्ति स्थापयेत (दुर्गोपसनायाम्) — तद्यथा पूर्वाद्यष्टसु — नं नन्दायै नमः। भगवत्यै नमः। रक्तदन्तिकायै नमः। शाकम्भर्यै नमः। दुर्गायै नमः। भीमायै नमः। कालिकायै नमः। भ्रामर्यै नमः। मध्ये शिवदूत्यै नमः।

धं धर्मस्वरुपाय सिंहाय नमः।

(ललितोपसनायाम्) पूर्वादिक्रमेण — इं इच्छायै नमः पूर्वे। ज्ञां ज्ञानायै नमः आग्नये। किं क्रियायै नमः दक्षिणे। कां कामिन्यै नमः नैऋत्यै। कां कामदायै नमः पश्चिमे। रं रत्यै नमः वायव्ये। रं रतिप्रियायै उत्तरे। नं नन्दायै नमः इंशाने। मध्ये मं मनोन्मयै नमः। ऐं परायै अपरायै हसौः सदाशिव महाप्रेतपद्मासनाय नमः।

गायत्री यंत्रस्थदेवतानां स्थापनं पीठ पूजा

पीठ पूजा का सूक्ष्म क्रम इस तरह से है।

ॐ मण्डूकाय नमः। ॐ कूं कूर्माय नमः। ॐ कां कालाग्नि रुद्राय नमः। ॐ अं अमृतसागराय नमः। ॐ मं मणि द्वीपाय नमः। ॐ रं रत्न द्वीपाय नमः। ॐ नं नंदनोद्योपनाय नमः। ॐ कं कल्पवृक्षेभ्यो नमः। ॐ रं रत्न वेदिकायै नमः। ॐ रं रत्न सिंहासनाय नमः। ॐ अं अग्नि मण्डलाय नमः। ॐ अं अर्क मण्डलाय नमः। ॐ सों सोम मंडलाय नमः।

मध्ये-पूर्वादिक्रमेण अष्टदलेषु :— ॐ रां दीप्तायै नमः। ॐ रीं सूक्ष्मायै नमः। ॐ रुं जयायै नमः। ॐ रें भद्राय नमः। ॐ रैं विभूत्यै नमः। ॐ रों विमलायै नमः। ॐ रौं अमोघायै नमः। ॐ रं विद्युतायै

नमः। मध्ये ॐ रः सर्वतोमुख्यै नमः।

त्रिकोण मध्ये (बिन्दु से) :– पूर्वादि चतुर्दिक्षुमध्ये – ॐ प्रभुताय नमः। ॐ विमलाय नमः। ॐ साराय नमः। ॐ समाराध्याय नमः। ॐ मध्ये परमसुखाय नमः।

इसके बाद पीठ पर कलश मध्ये गायत्री देवी का आवाहन करें।

ध्यान :-

मुक्ता–विद्रुम हेम नील धवलच्छायै मुर्खैस्त्रीक्षणैः
युक्तामिन्दु–निबद्ध रत्नमुकुटां तत्वात्म–वर्णात्मिकाम् ।
गायत्री वरदाभयाङ्कुश–कुशां शुभ्रं कपालं गुणैः
शंखं चक्रमथारविन्द–युगलं हस्तैर्वहन्तीं भजे ।।

अथ गायत्री यंत्र पूजनम्

मंत्र महार्णव के अनुसार बिन्दु, त्रिकोण, वृत्त, अष्टदल एवंभूपुर युक्त यंत्र बनावें। स्त्री देवता के पूजन में त्रिकोण को मुँह नीचे की ओर तथा पुरुष देवता के पूजन में त्रिकोण का मुँह ऊपर की ओर होता है।

पूजन तर्पण के लिये पात्रा साधन करें। या विशेषार्घ जल एवं पंचामृत एक पात्र में मिलाकर तर्पण करें पात्र की पूजा करें। गंध, अक्षत, खुले पुष्पों को एक पात्र में एकत्र करें। पूजन तर्पण यंत्र पर करें या यंत्र व अपने मध्य में अन्य पात्र रखलें उसमें पूजन तर्पण करते रहें। पूजन दो व्यक्ति अलग–अलग करें या स्वयं करें तो प्रत्येक नामावलि के साथ **"श्री पादुकां पूजयामि नमः तर्पयामि स्वाहा" उच्चारण करते हुये दाहिने हाथ से ज्ञान मुद्रा से पुष्पाक्षत गंध अर्पण करें तथा बायें हाथ से तत्वमुद्रा से तर्पण करें।**

नमस्करोति -

ॐ सचिन्मये परे देवि परामृत रस प्रिये ।
अनुज्ञां देहि गायत्री! परिवारार्चनाय मे ।।

अथ प्रथमावरणम् -

(१) बिन्दु में मूल मंत्र से **"श्रीसविता देवता" श्री पादुकां पूजयामिनमः तर्पयामि।**

अत्रैव :-

स्वगुरु क्रम — (१) ॐ अमुकानंदनाथ स्वगुरु श्री पा. पू. न. त. (२) ॐ अमुकानंदनाथ परमगुरु श्री पा. पू. न. त. (३) ॐ अमुकानंदनाथ परात्परगुरु श्री पा. पू. न. त. (४) ॐ अमुकानंदनाथ परमेष्ठिगुरु श्री पा. पू. न. त.

अत्रैव षडङ्ग पूजा -

(१) ॐ तत्सवितुर्ब्रह्मणे हृदयाय नमः श्री पा. पू. न. त.।

(२) ॐ वरेण्यं विष्णवे शिरसे स्वाहा श्री पा. पू. न. त.।

(३) ॐ भर्गोदेवस्य रुद्राय शिखायै वषट् श्री पा. पू. न. त.।

(४) ॐ धीमहि ईश्वराय कवचाय हुँ श्री पा. पू. न. त.।

(५) ॐ धियो यो नः सदाशिव नेत्र त्रयाय वौषट् श्री पा. पू. न. त.।

(६) ॐ प्रचोदयात् सर्वात्मने अस्त्राय फट् श्री पा. पू. न. त.।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ।।

पुष्पांजलीं समर्पयामि।

"पूजिताः तर्पिताः सन्तु" उच्चारण कर सामान्यर्घ से तृप्त करें।

अथ द्वितीयाऽवरणम् — (त्रिकोणे) जिस गुरु क्रम में पूजन रेखाओं में कहा है उस क्रम में पूर्व रेखा नैऋत्य एवं वायव्य रेखा में करें एवं जिस गुरु क्रम में कोणों में पूजन बताया है वे अग्निकोण, पश्चिम एवं ईशान कोण में पूजन करें। **(१) ॐ गायत्र्यै नमः श्री पा. पू. न. त.। (२) ॐ सावित्र्यै नमः श्री पा. पू. न. त। (३) ॐ सरस्वत्यै नमः श्री पा. पू. न. त.।**

ॐ अभीष्ट सिद्धिं....द्वितीया ऽवरणार्चनम्। पुष्पं स.। "पूजिताः तर्पिताः सन्तु" उच्चारण कर तृप्त करें।

अथ तृतीयावरणम् — (त्रिकोण के बाहरी कोणों वृत्त में) **(१) ॐ ब्रह्मणे नमः श्री पा. पू. न. त.। (२) ॐ विष्णवे नमः श्री पा. पू. न. त.। (३) ॐ रुद्राय नमः श्री पा. पू. न. त.। अभीष्ट सिद्धिं ....**

तृतीयावरणार्चनम्। पुष्प स.। "पूजिताः तर्पिताः सन्तु" अर्घ जल तृप्त करें।

अथ चतुर्थावरणम् — अष्ट दल में पूर्वादि क्रमेण — (१) ॐ आदित्याय नमः श्री पा. पू. न. त.। (२) ॐ उषायै नमः। (३) ॐ भानवे नमः। (४) ॐ प्रज्ञायै नमः। (५) ॐ भास्कराय नमः। (६) ॐ प्रभायै नमः। (७) ॐ रवये नमः। (८) ॐ संध्यायै नमः। श्री पा. पू. न. त.। ॐ अभिष्ट सिद्धिं मे देहि शरणागत वत्सले। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्।। पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर अर्घ जल से तृप्त करें।

अथ पंचमावरणम् — पुनः अष्टदले पूर्वादिक्रमेण (केसरेषु) (१) ॐ प्रल्हादिन्यै नमः श्री पा. पू. न. त.। (२) ॐ प्रभायै नमः। (३) ॐ नित्यायै नमः। (४) ॐ विश्वम्भरायै नमः। श्री पा. पू. न. त.। (५) ॐ विशालिन्यै नमः। (६) ॐ प्रभावत्यै नमः। (७) ॐ जयायै नमः। (८) ॐ शान्त्यै नमः। श्री पा. पू. न. त.। अभिष्ट सिद्धिं....पंचमावरणार्चनम् पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर अर्घ जल से तृप्त करें।

अथ षष्टमावरणम् — पूर्ववत् अष्ट दलों के मूल भागों में पूर्वादि क्रमेण—

ॐ कान्त्यै नमः कान्ति श्रीपा.।।१।। ॐ दुर्गायै नमः दुर्गा श्री पा. ।।२।। ॐ सरस्वत्यै नमः सरस्वती श्रीपा. ।।३।। ॐ विश्वरूपाय नमः विश्वरूपा श्रीपा.।।४।। ॐ विशालायै नमः विशाला श्रीपा. ।।५।। ॐ ईशायै नमः ईशा श्रीपा.।।६।। ॐ चापिन्यै नमः चापिनी श्रीपा.।।७।। ॐ विमलायै नमः विमला श्रीपा.।।८।।

ॐ अभीष्ट सद्धि मे देहि शरणागत वत्सले ।
भक्त्या समर्पयं तुभ्यं षष्ठमावरर्णाचनम् ।।

अथ सप्तमावरणम् — अष्टदल के मध्य में प्राची क्रमेण...

(१) ॐ अपहारिण्यै नमः। (२) ॐ सूक्ष्मायै नमः। श्री पा. पू. न.

त.। (३) ॐ विश्वयोन्यै नमः। (४) ॐ जयावहायै नमः। (५) ॐ पद्मालयायै नमः। (६) ॐ परायै नमः। (७) ॐ शोभायै नमः। (८) ॐ पद्मरूपायै नमः। ॐ अभिष्ट सिद्धिं...सप्तमावरणाचैनम्। पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर अर्घ जल से तृप्त करें।

अथ अष्टमावरणम् — अष्टदलाग्रे (कर्णिकायै) पूर्वादिक्रमेण (१) ॐ आं ब्राह्म्यै नमः श्री पा. पू. न. त.। (२) ॐ ई माहेश्वर्यैनमः। (३) ॐ ऊं कौमार्यै नमः। (४) ॐ ॠं वैष्णव्यै नमः। (५) ॐ ॡंवाराह्यै नमः। (६) ॐ ऐं इंद्राण्यै नमः। (७) ॐ औं चामुण्डायै नमः। (८) ॐ अः महालक्ष्म्यै नमः। ॐ अभिष्ट सिद्धिं...अष्टमावरणार्चनम्। पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर अर्घ जल से तृप्त करें।

अथ नवमावरणम् — भूपूरे (प्रथम श्वेत परिधौ) पूर्वादि क्रमेण (१) ॐ शुं शुक्राय नमः। (२) ॐ सों सोमाय नमः। (३) ॐ बुं बुध ायै नमः श्री पा. पू. न. त.। (४) ॐ गुं गुरवे नमः। (५) ॐ भौं भोमाय नमः। (६) ॐ शं शनैश्चरायै नमः। (७) ॐ रां राहवे नमः। (८) ॐ कें केतवे नमः। ॐ अभिष्ट सिद्धिं...नवमावरणार्चनम्। पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर सामान्यअर्घ से तृप्त करें।

अथ दशमावरणम् — भूपुरे रक्त परिधौ (पूर्वादिदशदिक्षु) — (१) ॐ लं इंद्राय नमः। श्री पा. पू. न. त.। (२) ॐ रं अग्नये नमः। (३) ॐ मं यमाय नमः। (४) ॐ क्षं निर्ऋतये नमः। (५) ॐ वं वरुणाय नमः। (६) ॐ यं वायवे नमः। (७) ॐ सं सोमाय नमः। (८) ॐ ईं ईशानाय नमः। (९) (ईशान पूर्वयोर्मध्ये) ॐ आं ब्रह्मणे नमः। (१०) (निर्ऋति पश्चिमयोऽर्मध्ये) ॐ अं अनंताय नमः। श्री पा. पू. न. त.। ॐ अभिष्ट सिद्धिं...दशमावरणार्चनम्। पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर अर्घ जल से तृप्त करें।

अथ एकादशमावणरम् :— भूपूरे कृष्ण परिधौ (पूर्वादिदशदिक्षु) (१) ॐ वं वज्राय नमः। श्री पा. पू. न. त.। (२) ॐ शं शक्तये नमः। (३) ॐ दं दण्डाय नमः। (४) ॐ खं खड्गाय नमः। (५) ॐ पं

पाशाय नमः। (६) ॐ अं अंकुशाय नमः। (७) ॐ गं गदायै नमः। (८) ॐ त्रिं त्रिशूलाय नमः। (९) ॐ पं पद्माय नमः। (१०) ॐ चं चक्राय नमः। श्री पा. पू. न. त.। ॐ अभिष्ट सिद्धिं...एकादशमावरणम्। पुष्पांजलि अर्पण करें "पूजिताः तर्पिताः सन्तु" कहकर अर्घ जल से तृप्त करें।

"ॐ...(मूल मंत्रेण) श्री गायत्री यंत्र स्थापित देवताभ्यो प्रसन्ना वरदा भव" कहकर पुष्पांजलि अर्पीत करें।

अगर यंत्र पर पूजन किया हो तो निर्माल्य कर यंत्र को शुद्धकर गंधोपचार से पूजन कर धूप दीप नैवेद्य अर्पण कर नीरांजन करें।

।। सविता देवता वरदा भवन्तु ।।

अथ सूर्यभद्रमंडल देवता स्थापनम्

सूर्य भद्रमंडल के परिवार देवता के आवाहन से पहिले सूर्य वंश को कुछ संक्षिप्त वर्णन दिया जा रहा है, क्यों कि प्रस्तुत पूजा विधि में सूर्य परिवार व तंत्रोक्त पूजन क्रम के आधार पर ही आवाहन क्रम दिया गया है।

सूर्य का विवाह प्रजापति विश्वकर्मा की पुत्री संज्ञा से हुआ। **संज्ञा के तीन संतानें** हुई **(१) वैवस्वत – मनु (२) यम (३) यमुना(युगल)।**

सूर्य के अत्यंत तेज को सह नहीं पाने के कारण संज्ञा ने **"छाया के रूप में"** अपनी प्रतिबिम्ब शक्ति को सूर्य के पास रहने की आज्ञा दी। छाया से दो पुत्र **"संवीर्ण"** और **"शनि"** तथा **तपती(तापती नदी)** की उत्पत्ति हुई।

संज्ञा जो **"उत्तरकुश"** में अश्विनी (घोड़ी) के रूप में विचरण कर रही थी, उससे सूर्य का पुनः संयोग होने पर दोनों **"अश्विनी कुमारों"** की उत्पत्ति हुई।

सूर्य की **दो पत्नियां** और थी। राजा रैवत की पुत्री **राज्ञी**(रात्री), से **रेवत** तथा अन्य पत्नि **प्रभा** से **प्रभात** की उत्पत्ति हुई।

पुराणों के अनुसार सूर्य के सम्पूर्ण रूप से १० पुत्र एवं ३ पुत्रियां हुई।

भद्रमंडल देवता आवाहनम्

मंडल मध्ये पूर्वादि क्रमेण :-

।१।। ॐ ब्रह्मणे तेजोमण्डलाय नमः ।।२।। विष्णवे तेजोमण्डलाय

नम: ।।३।। रुद्राय तेजोमण्डलाय नम: ।।४।। अग्नये तेजोमण्डलाय नम:।

मध्ये :— ।।५।। ३ॐ सूर्य तेजोमण्डलाय नम:।

ध्यानम् :-

रक्ताम्बुजासनमशेष गुणैक सिंधुं
भानुं समस्तजगतामधिपं भजामि ।
पद्मद्वयाभय वरान् दधत: कराब्जै
माणिक्य मौलिमरुणाङ्ग रुचिं त्रिनेत्रम् ।।

३ॐ आकृणेन रजसा... इति मन्त्रेण आवाह्य। भो सूर्य इहागच्छ इहतिष्ठ। प्रसन्नो वरदो भव।

परिधि समीपे त्रिपद पीत भद्रों में ८ पीठ शक्तियों का आवाहन करें।

।।६।। पूर्व ईशान मध्ये — **३ॐ दीप्तायै नम:।** ।।७।। पूर्व आग्नये मध्ये — **३ॐ सूक्ष्मायै नम:।** ।।८।। आग्नये दक्षिण मध्ये — **३ॐ जयायै नम:।** ।।९।। दक्षिण निर्ऋति मध्ये — **३ॐ भद्रायै नम:।** ।।१०।। निर्ऋति पश्चिम मध्ये — **३ॐ विभूत्यै नम:।** ।।११।। पश्चिम वायवो मध्ये — **३ॐ विमलायै नम:।** ।।१२।। वायवोत्तर मध्ये — **३ॐ अमोघाय नम:।** ।।१३।। उत्तरीशान मध्ये — **३ॐ विद्युतायै नम:।**

परिधि समीपे अष्ट ग्रहान् स्थापयेत् :—

।।१४।। पूर्वे परिधि समीपे — **३ॐ शुक्राय नम:।** ।।१५।। आग्नेयां खंडेन्दौ — **३ॐ सोमाय नम:।** ।।१६।। दक्षिणे परिधि समीपे — **३ॐ अंगारकायनम:।** ।।१७।। नैऋत्यां खंडेंदौ — **३ॐ राहवे नम:।** ।।१८।। पश्चिम परिधि समिपे — **३ॐ शनैश्चराय नम:।** ।।१९।। वायव्यां खंडेंदौ — **३ॐ केतवे नम:।** ।।२०।। उत्तरे परिधि सभापे — **३ॐ गुरुवे नम:।** ।।२१।। ईशान खंडेंदौ — **३ॐ बुधाय नम:।**

कृष्ण श्रृंखलायाम् सूर्य पुत्रान् ईशान आग्नेयादि क्रमेण आवाहयेत्

।।२२।। ईशाने कृष्ण शृंखलायाम् — ॐ **वैवस्वत मनवे नमः।** ।।२३।। आग्नेयां कृष्ण शृंखलायाम् — ॐ **अश्विनीकुमाराभ्यां नमः।** ।।२४।। नैऋत्यै कृष्ण शृंखलायाम् — ॐ **संवीर्णाय नमः।** ।।२५।। वायवे कृष्ण शृंखलायाम् — ॐ **रेवताय प्रभाताय नमः।**

प्रतिकोणे ७ पद द्वौ—द्वौ नीलवल्ली अस्ति तेषां ईशानादि क्रमेण —

।।२६।। ईशाने — ॐ **भूर्भुवादि सप्त लोकेभ्यः नमः।** ।।२७।। ईशाने — ॐ **रेवन्तादि सप्ताश्वाय नमः।** ।।२८।। आग्नेये — ॐ **सुषुम्णा, सुरादना, उदन्वसु, विश्वकर्मा, उदावसु, विश्वव्यचा हरिकेशादि सप्त रश्मि देवतायै नमः।** ।।२९।। तत्रैव आग्नेयां — ॐ **काली कराली मनोजवादि सप्त जिह्वा देवतायै नमः।** ।।३०।।

आग्नेयां द्वितीय वल्लीमध्ये **सप्तगंधर्व अप्सरसः देवतायै।** ।।३१।। नैऋत्यां — ॐ **दक्षादि सप्तगणेभ्यो नमः।** ।।३२।। नैर्ऋत्यां — **तल, अतल, वितल आदि सप्त पातालाअधिपतये नमः।** ।।३३।। वायव्यां — **आवहाय, प्रवहाय, उद्वहाय, वहाय, विवहाय, परावहाय परिचहाय आदि सप्तमरुद गणेभ्यो नमः।** ।।३४।। वायव्यां — **सप्त ऋषीन् आ. स्था.।**

मंडलमध्ये कर्णिका समीपे चतुष्पद श्वेत भद्रे पूर्वादिक्रमेण —

।।३५।। पूर्वे — ॐ **आदित्याय नमः।** ।।३६।। दक्षिणे — ॐ **रवये नमः।** ।।३७।। पश्चिमे — ॐ **भानवे नमः।** ।।३८।। उत्तरे — ॐ **भास्कराय नमः।**

मण्डल मध्ये चतुर्दिक्षु द्वादश पद रक्त भद्राणि सन्ति: तेषां पूर्वादिक्रमेण :—

।।३९।। पूर्वे — ॐ **उषायै नमः।** ।।४०।। दक्षिणे — ॐ **प्रज्ञायै नमः।** ।।४१।। पश्चिमे — ॐ **प्रभायै नमः।** ।।४२।। उत्तरे — ॐ **संध्यायै नमः।**

मण्डलमध्ये ।।४३।। सूर्यस्य वामभागे — ॐ **संज्ञायै नमः।** ।।४४।।

सूर्यस्य दक्षिण भागे — ॐ छायायै नमः। ।।४५।। सूर्यस्य पादमूले — ॐ यमुनायै नमः। ।।४६।। तत्रैव — ॐ तात्प्यै नमः। ।।४७।। तत्रैव — ॐ सप्तसागरेभ्यो नमः। ।।४८।। सूर्यस्य मस्तकोपरि — ॐ मेरवे नमः।

ततः द्वादशमासाधिपति द्वादश सूर्यान् आवाहयेत्

चैत्र, वैशाख, जेष्ठादि मासों के नाम क्रमशः मधु, माधव, शक्र, शुचि, नभ, नभस्य, तप, तपस्य, सह, पुष्य, इस्र, एवं ऊर्ज है। अतः उनके मास स्वामि सूर्य का पूर्वादि क्रम से (प्रत्येक दिशा में तीन—तीन) आवाहन करें।

।।४९।। *पूर्वे प्रथम* — मधुमासाधिपतये — धातायै नमः। ।।५०।। माधव मासधिपतये — अर्यमाये नमः। ।।५१।। शक्रमासाधिपतये — मित्राय नमः। ।।५२।। *(दक्षिणे)* शुचिमासाधिपतये — वरुणाय नमः। ।।५३।। नभ (श्रावण)मासाधिपतये — शक्राय नमः। ।।५४।। नभस्य (भाद्रपद) मासा धिपतये — विवस्वाने नमः। ।।५५।। *पश्चिमे* तप (आश्विन) मासाधिपतये — पूषायै नमः। ।।५६।। तपस्यमासाधिपतये — पर्जन्याय नमः। ।।५७।। सहमासाधिपतये — अंशुवे नमः। ।।५८।। *(उत्तरे)* पुष्यमासाधिपतये — भङ्गाय नमः। ।।५९।। इस्रमासाधिपतये — त्वष्टायै नमः। ।।६०।। ऊर्ज मासाधिपतये — विष्णवे नमः।

सप्तपरिधौ पूर्वादिक्रमेण :— ।।६१।। पूर्वे — इंद्राय नमः। ।।६२।। आग्नयां — अग्नये नमः। ।।६३।। दक्षिणे — यमाय नमः। ।।६४।। नैर्ऋत्यां — निर्ऋतये नमः। ।।६५।। पश्चिमे — वरुणाय नमः। ।।६६।। वायव्यां — वायवे नमः। ।।६७।। उत्तरे — कुबेराय नमः। ।।६८।। ईशाने — ईशानाय नमः।

रजः परिधौ पुनः पूर्वादिक्रमेण :— ।।६९।। वज्राय नमः। ।।७०।। शक्त्यै नमः ।।७१।। दण्डाय नमः।।७२।। खड्गाय नमः ।।७३।। पाशाय नमः।।७४।। अंकुशाय नमः।।७५।। गदायै नमः।।७६।। त्रिशूलाय नमः।

ततः परिधौ पुनः पूर्वादिक्रमेण अष्टमातृकां आवाहयेत् :—

।।७७।। ब्राह्म्यै नमः। ।।७८।। आग्नये — कौमार्यै नमः। ।।७९।।

दक्षिणे — वैष्णव्यै नमः। ।।८०।। नैऋत्यां — वाराह्यै नमः। ।।८१।।
पश्चिमे — इंद्राण्यै नमः। ।।८२।। वायव्यां — इंद्राण्यै नमः। ।।८३।।
उत्तरे — चामुण्डायै नमः। ।।८४।। ईशाने — महालक्ष्म्यै नमः।

"ॐ मनोजूति" इति मन्त्रेण प्रतिष्ठाप्य सूर्य मण्डल मध्ये प्राण —प्रतिष्ठा पूर्वकं संस्थाप्य एवं मण्डल परिवारदेवतायै सर्वोपचाराय पूजनं कुर्यात्।

अथ पंचवक्त्र (शिव) पूजनम्

भगवान आशुतोष के पंचवक्त्र ब्रह्म स्वरूप पूजन में आवाहन, ध्यानक्रम एक तंत्रेण दिया गया है। तदुपरान्त पूजन एकतंत्रेण कर सकते है।

श्वेत गंधाक्षत पुष्पों से नमस्कार करें, प्राण प्रतिष्ठा की हुई मूर्ति में आवाहन नहीं होता है अतः नाम मंत्र के साथ ध्यान करते हुये पूजन करें।

पश्चिमवक्त्र पूजा :— ॐ सद्योजातमित्यस्य जमदग्नि सद्योजातः ऋषिं त्रिष्टुप छंद सद्योजातो देवता श्वेत वर्ण हंसवाहनं पश्चिमवक्त्रं पृथिवीतत्वं पश्चिमवक्त्र नमस्कारे पूजने विनियोगः।

ॐ सद्योजातो व्यमिमीत यज्ञमग्निर्देवानाम भवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहा कृत ठ हविरदन्तु देवाः।।१।।
ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमो नमः ।।२।।

(गंधसिताक्षत श्वेत पुष्पैः) सद्योजाताय श्वेतवर्णाय हंसवाहनाय पश्चिम वक्त्राय पृथिवि तत्त्वाय सृष्टिरूपात्मने ब्रह्मणे नमः।

धेनुर्बाणमुद्रा प्रदर्शय

वामस्य मध्यमाग्रं तु तर्जन्यग्रे नियोजयेत् ।
अनामिका कनिष्ठां च तस्याङ्गुष्ठेन पीडयेत् ।
दर्शयेद् दक्षिण स्कंधे धनुर्मुद्रेयमीरिता ।।
दक्ष मुष्टिस्थतर्जन्या दीर्घया बाणमुद्रिका ।।

(इति बाणमुद्रा)

ध्यानम् :-

प्रालेयामलबिन्दु कुंद धवलं गोक्षीर फेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदमन ज्वालावलीलोचनम् ।
ब्रह्मेन्द्रादि मरुद्गणैः स्तुति परैरभ्यर्चितं योगिभि–
र्वन्देऽहं सकलं कलंक रहितं स्थाणोर्मुखं पश्चिमम् ।।

ततः सद्योजातस्य कला देवता पूजनम् :—

ॐ ऋद्ध्यै नमः। ॐ सिद्ध्यै नमः। ॐ धृत्यै नमः। ॐ लक्ष्म्यै नमः। ॐ मेधायै नमः। ॐ कान्त्यै नमः। ॐ स्वधायै नमः। ॐ प्रभायै नमः।

अथोत्तरवक्त्रपूजा :— ॐ वाममद्येत्य च वामदेवायत्यस्य मंत्रस्त्रय भारद्वाज–वामदेव ऋषि, त्रिष्टुप जगती छंद, सविता–विष्णु देवता, गरुड़ वाहन नमस्कार पूजने विनियोगः।

ॐ वाममद्य सवितर्वाममुश्वो दिवे दिवे वामस्मभ्यः सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ।।१।।
ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बल विकरणाय नमः ।।२।।

वामदेवाय कृष्णवर्णाय गरुड़ वाहनायोत्तर वक्त्रायापस्तत्वाय अमृतरूपात्मने विष्णवे नमः इति प्रणम्य पद्ममुद्रा प्रदर्शनम्।

करौतु संहता कृत्वासम्मुखावुन्नतांगुली ।
तलान्तर्मिलितांगुष्ठौ कुर्यादिवऽब्ज मुद्रिका ।।
(इति पद्ममुद्रा)

ध्यानम् -

गौरं कुंकुमपिङ्गलं सुतिलकं व्यापाण्डु गण्डस्थलं
भ्रू विक्षेप कटाक्ष वीक्षण लसत्संसक्त कर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलाल कालङ्कृतं
वन्दे पर्ण शशाङ्क मण्डल निभ वक्त्रं हरस्योत्तरम् ।।

ततः त्रयोदश कला देवता पूजनम् :—

ॐ रजसे नमः। ॐ रक्षायै नमः। ॐ रत्यै नमः। ॐ पाल्यायै नमः। ॐ कामायै नमः। ॐ संजीविन्यै नमः। ॐ प्रियायै नमः। ॐ बुद्ध्यै नमः। ॐ क्रियायै नमः। ॐ धात्रै नमः। ॐ भ्रामर्यै नमः। ॐ मोहिन्यै नमः। ॐ ज्वरायै नमः।

अथ दक्षिणवक्त्र पूजा :— ॐ यातेरुद्र शिवेत्यस्य मंत्रस्य परमेष्ठि ऋषि अनुष्टुप छंद एको रुद्रो देवता तथा ॐ अघोरेभ्य इत्यस्य अघोरऋषि अनुष्टुप छंद रुद्रो देवता नीलवर्ण कूर्मवाहनं दक्षिणवक्त्रं तेजस्तत्वं नमस्कार पूजने विनियोगः।

ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ।।१।।
ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्य सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररुपेभ्यः ।।२।।

ध्यानम् :–

कालाभ्र भ्रमराञ्चनाचल निभं व्यावृत्त पिङ्गेक्षणं
खण्डेन्दु द्वय मिश्रितांशु दशनाप्रोद् भिन्न दंष्ट्राङ्कुरम् ।
सर्प प्रोत कपाल शक्ति सकलं व्याकीर्णसच्छेखरं
वन्दे दक्षिणमीश्वरस्य कुटिलभ्रूभङ्गरौद्रं मुखम् ।।

नमस्कारं एवं ज्ञान मुद्रां प्रदर्शय।

ततौ अष्ट कलां प्रपूजयेत् — ॐ तमसे नम। ॐ मोहायै नमः। ॐ क्षयायै नमः। ॐ निद्रायै नमः। ॐ व्याधये नमः। ॐ मृतवे नमः। ॐ क्षुधायै नमः। ॐ तृषायै नमः।

अथ पूर्वक्त्र पूजा — ॐ यत्पुरुषमित्यस्य नारायण ऋषिः अनुष्टुप् छंदः जगद्बीजं पुरुषो देवता तथा तत्पुरुषायेत्यस्य तत्पुरुष ऋषिः गायत्री छंदः रुद्रो देवता पीतवर्णम् अश्ववाहनं पूर्ववक्त्रं वायु तत्वं पूर्ववक्र नमस्कार पूजने विनियोगः।

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा उच्येते ।।१।।
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ।।२।।

तत्पुरुषाय पीतवर्णाया ऽश्ववाहनाय पूर्ववक्राय वायुतत्वाय चैतन्यात्मने आदित्याय नमः । इति प्रणम्य कवच मुद्रां प्रदर्शय। (करद्वन्दांगुल्यो वर्मणिस्यु)

ध्यानम् –

संवर्त्ताग्नि तडित्प्रतप्त कनक प्रस्पर्द्धितेजोरुणं
गंभीर स्मृति निः सृतोग्र दशनप्रोद्भासिताम्राधरम् ।
बालेन्दु द्युति लोलपिङ्गल जटाभार प्रबद्धोरगं
वन्दे सिद्धसुरासुरेन्द्र नमितं पूर्व मुखं शूलिनः ।।

अथ कला पूजनम् – ॐ निवृत्यै नमः। ॐ प्रतिष्ठायै नमः। ॐ विद्यायै नमः। ॐ शांत्यै नमः।

अथोर्ध्ववक्त्रपूजा – ॐ तमीशानमित्यस्य गौतम ऋषिः जगती छंदः ईशानो देवता तथा ॐ ईशान इत्यस्य ईशान ऋषिः अनुष्टुप छंदः रुद्रो देवता गोक्षीरवर्णं वृषभवाहनं आकाश तत्वं उर्ध्ववक्त्र नमस्कार पूजने विनियोगः

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियान् जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसा मसदवृधे रक्षिता पायुरदब्धः स्वस्तये ।।१।।
ॐ ईशानः सर्वविधानामीश्वरः सर्वभूतानां ब्रह्माधिपति ब्रह्मणोधिपतिः ब्रह्मा शिवो मे ऽ अस्तु सदाशिवोम् ।।२।।

ध्यानम् –

व्यक्ताव्यक्त गुणोत्तरं सुवदनं षट्त्रिंशतत्वाधिकं
तस्मादुत्तर तत्वमक्षयमिति ध्येयं सदा योगिभिः ।
वन्दे तामसवर्जितेन मनसा सूक्ष्माति सूक्ष्मं परं शान्तं
पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ।।

ततः पञ्चकला पूजनम् — ॐ शशिन्यै नमः। ॐ अङ्गदायै नमः। ॐ इष्टायै नमः। ॐ मरीच्यै नमः। ॐ ज्वालिन्यै नमः।

अथ यथायथोपचारैन पंचवक्त्र पूजनम् (एक तंत्रेण)

पश्चिमवक्त्र पूजा — गंध मनशिला चन्दन श्वेताक्षतपुष्प गुग्गुलु धूप घृत दीप पायस नैवेद्यदिभिः पूजनम् । एवं प्रार्थयेत्

शुभ्रं त्रिलोचनं नाम्ना सद्योजातं शिवप्रदम् ।
शुद्ध स्फटिक संकाशं वन्देऽहं पश्चिमं मुखम् ।।

उत्तर वक्त्र पूजा — हरिचन्दन तुलसीशतपत्र(मंजरी) पुष्प पंचसौगंधिक धूप घृत पक्कगोधूमान्न नैवेद्याभिः पूजनम्। एवं प्रार्थयेत् —

वामदेवं सुवर्णाभं दिव्यास्त्रगण सेवितम् ।
अजन्मानमुमाकान्तं वन्देऽहं ह्युत्तरं मुखम् ।।

दक्षिणवक्त्र पूजा — कृष्णागरु चन्दन नीलोत्पल करवीरपुष्प सितागरु धूप माषान्न नैवेद्यादिभिः पूजनम्। एवं प्रार्थयेत्—

नीलाभ्रवर्णमोकारमघोरं घोरदंष्ट्रकम् ।
दंष्ट्राकराल मत्युग्रं वन्देऽहं दक्षिणं मुखम् ।।

पूर्ववक्त्र पूजा — हरिताल चन्दन दुर्वांकुरार्कपुष्पान्यतर पुष्प कृष्णागरु धूप मोदक नैवेद्यादिभिः पूजनम्। एवं प्रार्थयेत—

बालार्कवर्णमारक्तं पुरुषं च तडित्प्रभम् ।
दिव्यं पिङ्गजटाधारं वन्देऽहं पूर्वदिङ्मुखम् ।।

उर्ध्ववक्त्र पूजा — भस्म चन्दन बिल्वपत्र कनकपुष्प ॠतु भवान्य पुष्प हरिचन्दन धूप शर्करा दध्योदन नैवेद्यादिभिः पूजनम्। एवं प्रार्थयेत्—

ईशानं सूक्ष्ममव्यक्तं तेजः च पुञ्जपरायणम् ।
अमृतस्त्रावि चिद्रूपं वन्देऽहं पंचमं मुखम् ।।

इति पवक्त्र पूजां कृत्वा देवस्यवामभागे शक्ति पूजनम् - ॐ उमायै नमः। ॐ शंकर प्रियायै नमः। ॐ पार्वत्यै नमः। ॐ गौर्यै नमः। ॐ काल्यै नमः। ॐ कालिन्द्यै नमः। ॐ कोटर्यै नमः। ॐ विश्वधारिण्यै

नमः। ॐ ह्रां नमः। ॐ ह्रीं नमः। ॐ गंगादेव्यै नमः।

ततः ॐ गणपतये नमः। ॐ कार्तिकाय नमः। ॐ पुष्पदंताय नमः। ॐ कपर्दिने नमः। ॐ भैरवाय नमः। ॐ शूलपाणये नमः। ॐ ईश्वराय नमः। ॐ दण्डपाणये नमः। ॐ नंदिने नमः। ॐ महाकालाय नमः।

।। इति संपूज्य।।

ततः एकादश रुद्रार्चनम् -

ॐ अघोराय नमः। ॐ पशुपतये नमः। ॐ शर्वाय नमः। ॐ विश्वरूपिणे नमः। ॐ त्र्यम्बकाय नमः। ॐ कपर्दिने नमः। ॐ विरूपाक्षाय नमः। ॐ भैरवाय नमः। ॐ शूलपाणयै नमः। ॐ ईशानाय नमः। ॐ महेश्वराय नमः।

ततो रुद्राभिषेकं कृत्वा। शुद्धोदक स्नान वस्त्रोपवित गंधाक्षत पुष्पाणि समर्प्य। बिल्वपत्रार्पणं कुर्यात्। तदनंतर सौभाग्यद्रव्य धूप दीप नैवेद्य ताम्बूल दक्षिणा आर्तिक्य प्रदक्षिणा मंत्र पुष्पांजली विशेषार्घाद्युपचारान् समर्प्य।

राजोपचारै - (यथा)

छत्रं च चामरं चैव व्यञ्जनं दर्पण तथा ।
पादुकानि च सर्वाणि गृह्यतां परमेश्वर ।।

(अभावे कल्पयामि)

।। इति पंचवक्त्र पूजा विधानम्।।

अथ यज्ञविधानं प्रारंभते

मंत्राणां अरि-मित्र विचार

मंत्राक्षर त्रिगुणं कृत्वा नामाक्षर समन्विता (स्वयं की नामाक्षर संख्या) द्वादशौ तु हरेर्भागं अरिमूलं निकन्दते। एकौ नव पंचमे सिद्धि, द्वी, षट, दश, युग्मकम् त्रीसप्त एकादशौ सुसाध्य, चत्वाराष्टौद्वादशो अरि।

वार बलि विचार

रविवारे पायसान्नं, सोमवारेण मोदकं, भौमेगुडाज्य गोधूमा। बुधश्च दधि शर्करा गौधूमा पूरिका युक्ता घृतमध्ये सुपार्जिता। गुरु चणक खाण्डाज्यं केवलं चणका भृगु शनि माषान्न तैलं च। एतेवारे बलिक्रमा।

कर्मविशेषे अग्निनामानि (प्रयोगरत्ने च)

पावक कार्य में लोकिक नाम की अग्नि, मारुत गर्भाधाने, पुंसवसने पावमान, सीमन्ते—मंगल, जातककर्मणिप्रबल, प्राशने पार्थिव, चौलसंस्कारे—सभ्य, व्रतोपवासे—समुद्भव। गोदाने—सूर्याग्नि, विवाहे योजक। आवसथ्ये—द्विज, वैश्वदेवे—रुक्मक, प्रायश्चिते—विट्, पाकयज्ञेषु—पावक,:। देवानां —हव्यवाह, पितृणां—कव्यवाहनः। शांति के वरदाग्नि, पौष्ठिके—बलवर्धनः। पूर्णाहुत्यां मृडनामाग्नि, अभिचारे क्रोधाग्नि। वशीकरणे—कामदः, वनदाहे—दुषकः। कुक्षौ जठराग्नि। मृतदाहके क्रव्यादः। लक्षहोमे—वाह्निनामाग्नि, कोटिहोमे—हुताशनः। वृषोत्सर्गेऽध्वरो। शुचिकर्मे—ब्राह्मणः। ब्रह्मयज्ञे—गार्हपत्यः। शिवे—दक्षिणाग्नि। विष्णु—त्रयऽग्नयः। दुर्गा होमे—शतमंगल। उपनयन समये - व्रतादौ-जातवेदस् नाम्ने, बह्मचारिणव्रते-प्रकृतिऽग्नि, समिधादाने-पाणिनाग्नि वंदारंभसमये-लोकिकाग्नि।

ग्रहहोमे (स्कान्दे) :— आदित्ये कपिलाग्नि। सोमे—पिङ्गलः। भौमे—धूमकेतू। बुधे—जठराग्नि। गुरौ—शिखि। शुक्रे—हाटकः। शनैश्चरे—महतेजा। राहुकेतु—हुताशन नामाग्नि।

कर्म विशेषे सप्तजिह्वानि (कौलावलि)

एवं न्यासविधि :-

न्यासस्थानं	सात्विकी	राजसी	तामसी	जिह्वा देवता
लिंगे	हिरण्या	पद्मरागा	काली	गीर्वाण (सुर)
गुदे	गगना	सुवर्णा	कराली	पितृ
शिरसि	रक्ता	भद्रलोहिता	मनोवजा	गंधर्व
मुखे	कृष्णा	लोहिता	सुलोहिता	यक्ष
नासिका	सुप्रभा	श्वेता	धूम्रवर्णा	नाग
नेत्रायो:	बहुरूपा	धूमिनी	स्फुलिंगिनी	पिशाच
सर्वांगे	अतिरिक्ता	करालिका	विश्वरुचि	राक्षस

(तामसी जिह्वा क्रम में **"कौलावली"** एवं **"स्कंद"** में भेद है)

जिह्वा स्थानानि

कुण्डस्य पूर्वदिग्भागे काली जिह्वा प्रकीर्तिता। आग्नये करालाख्या दक्षिणे तु मनोजवा।। सुलोहिता नैऋते च धूम्रवर्णा तु वारुणे। स्फुलिङ्गिनी तु वायव्ये सौम्ये विश्वरुचिस्तथा।

क्रिया विशेषे **:— पौष्टिक तथा शांति कार्य में काली, कराली, अभिचार में मनोजवा। सुलोहिता उच्चाटन में, धूम्रवर्णा विद्वेषण में, आर्कषण हेतु स्फुलिङ्गिनी, सर्व कार्येषु विश्वरुचि:।**

जैसा कार्य हो उसी जिह्वा की पूर्व में पूजा कर क्रमश: अन्य जिह्वाओं का पूजन करें।

होमे द्रव्य प्रमाणं :— घी १ तोला, दूध, पंचगव्य, मधु आधा तोला, गुड़, शक्कर आधापल। दुग्धान्न बहेरा सदृश्य, दही प्रसूति प्रमाण, लावा, धान्य मुष्ठी मात्र। खीर आधाग्रास, ईख एक पर्व, पुष्प एक पंखुरी, पूप एक, केला, नारंगी एक—एक फल लेवें। मूंग, उड़द, धान, तिल, गेहूँ, तंडुल एक मुष्ठी। कूष्माण्ड व कटहल के आठ या दशखण्ड, नारियल के आठ, मातुलिंग (बिजौरा) के चार, मालूर के तीन। केथा खरबूजा के तीन—तीन फलों का एक खण्ड प्रमाण लेना चाहिये।

गुंजा, कालीमिर्च २० नग, गुग्गुलु, हींग, बेर तुल्य चन्दन, कर्पूर, अगर इसी प्रमाण में हल्दी पिसी आधा तोला, नमक, राई, सुक्ति प्रमाण में लेंवें। केसर

किस्तुरी यथा संभव लेवें। (दुर्गाकल्पे, कौलावली)

अग्निचक्रम्

विवाह यात्रा व्रत गोचरेषु चूड़ोपवीते ग्रहणे युगादौ ।
दुर्गाविधाने च सुत प्रसूतौ न वाऽग्नि चक्रं परिचिन्तनीयम् ।।१।।
व्रतबंधे विवाहे च नवरात्रे च नित्यके ।
कुलदेव्यार्चने धीमान्नो कुर्यादाग्निचिन्तनम् ।।२।।
ग्रहणोद्वाह (विवाह) गण्डान्ते तथा दुर्गोत्सवेऽपि च ।
तदाऽग्नि चक्रं नालोक्यं ग्रहशान्तौ विचारयेत् ।।३।।

अग्निवास :— जिस समय हवन करना हो उस समय तात्कालिक तिथि और वार संख्या में १ जोड़कर ४ कर भाग देवें। यदि ३ या शून्य शेष रहें तो अग्निवास पृथ्वी पर शुभ है। शेष १ बचे तो आकाश में प्राणहानि कारक, शेष २ बचे तो पाताल में धन हानि करें। तिथि गणना शुक्ल पक्ष प्रतिपदा से करें। वार गणना रविवार से करें मेरे अनुमान से तिथी सूर्योदयी न गिनकर तात्कालिक तिथी लेनी चाहिये क्यों कि मुहुर्त्त विधान यही कहता है।

विष्णु यागे :-

रोहिण्यधिप नक्षत्रं वारस्तिथिनु क्रमातः। घृतिभि (१८)
श्चयुतं कार्य युग (४) संख्यैर्हरेत्पुनः ।
त्रिवेदे (३/४) वसते भूमौ । भूमि लोके सुखावहम् ।।

रुद्रयागे :-

तिथिवारश्च नक्षत्रं कलाभि (१६) श्च समन्वितम् ।
वेद संख्यैर्हरेद्भागं वह्नि चक्रं विलोकयेत ।।

तिथि + वार + नक्षत्र + १६ के योग में ४ का भाग देवें। शेष १ में स्वर्ग, २ शेष होने पर पाताल हानि करे। ३ या ४ बचे तो पृथ्वी पर शुभ होवे।

दुर्गा होमे :-

ब्राह्मी च कौमारी च वैष्णवी च वाराही ऐन्द्री त्वथ चंडिका ।
च मेधा च माहेश्वरी नारसिंही क्रमेण सूर्यादिनभं त्रिक च ।।

अर्थात सूर्य नक्षत्र से दिन नक्षत्र तक ३—३ भाग करें।

मातृका :-

ब्राह्मी कौमारी वैष्णवी वाराही ऐन्द्री चण्डिका मेधा माहेश्वरी नारसिंही

नक्षत्र -

३ ३ ३ ३ ३ ३ ३ ३ ३

फल -

लक्ष्मीपुत्र शौक भय धन राज्य रोग विद्या सुख सम्मान

(ज्योतिषसार सम्मुचे)

अग्नि सम्मुखीकरण विषये

प्रश्न :-

अधोमुखः ऊर्ध्वपादः प्राङ्मुखो हव्यवाहनः ।
तिष्ठत्येव स्वभावेन आहुतिः कुत्र दीयते? ॥

उत्तर :-

आधारो नासिका ज्ञेया, आज्यभगे च चक्षुषी ।
वक्रश्चोदर कुक्षी च कटि व्याहितिभि स्मृताः ।।१।।
शिरोहस्तौ च पादौ च पंचवारुणका स्मृताः ।
प्रजापति स्विष्टकृतं श्रोत्रे द्वे परिकीर्ति ते ।।२।।
सधूमोग्नि शिरो ज्ञेयो निर्धूमा चक्षुरे वचः ।
ज्वलत् कृशो भवेत्कर्णः काष्ठमग्ने मनस्तथा ।।३।।
अग्नि ज्वालयते यत्र शुद्ध स्फटिक सन्निभः ।
तन्मुखं तस्य विज्ञेयं चातुरङ्गले मानतः ।।४।।
प्रज्वलोऽग्निस्तथा जिह्वा एतदेवाग्नि लक्षणम् ।
आस्यान्तर्जुहुयादग्ने र्विपश्चित्सर्व कर्मसु ।।५।।

अन्यच्च :-

सपवित्राम्बुज हस्तेन वह्नेः कुर्यात्प्रदक्षिणाम् ।
हव्यवाट् सलिलं दृष्ट्वा विभीतो संमुखो भवेत् ॥

कारिकाम् :-

कर्ण होमे भवेद्व्याधि, नेत्रेऽन्धत्वमुदाहृत्तम् ।
नासिकायां मनः पीडा मस्तके च धनक्षयम् ॥

संस्कार भास्करे :-

अग्निकर्णेहुतं दद्यादुर्भिक्षं मरणं ध्रुवम् ।
नासिकायाम् मनोदुखं नेत्रे ग्रामो विनश्यति ।।

अग्निमातृ-पितरौः— (१) माता—भूमिः (२) पिता—वरुणः (३) पितरः — पार्वति परमेश्वराभ्यां पितरौ।

अग्निपुत्राः :— त्रय संति। (१) पावकः (२) पावमानः (३) शुचि (भागवते)

प्रणिता में विष्णु और प्रोक्षणी में अग्नि का ध्यान करें। (अग्निपुराण)

कुशा :-

इन्द्रवज्रं हरेश्चक्रं त्रिशूलं शंकरस्य च ।
दर्भरूपेण तेत्रीणि पवित्र छेदनाति च ।।
पुरावृत्रवधेप्राप्ते रक्तपूर्णा वसुन्धरा ।
द्वौ दर्भौ देवता त्रीणि पवित्र छेदनानि च ।।

उपयमन कुशा :— (वेणी रूपेण टेढी झुकी हुई) सप्त, पंच, त्रयोऽपि च।

यथा चक्रायुधे विष्णोर्यथा शूलं हरस्य च ।
यथा वज्रं सुरेन्द्राय तथा विप्रकरे कुशा ।।

पंच संस्कारों के कारण व महिमा

परिसमुह्य (त्रिदर्भैः)

कृमि कीट पतंगाश्च विचरंति महीतले ।
तेषां संरक्षणार्थाय परिसमुह्येति कथ्यते ।।

उपलिप्य *(गोमयादिकेन)*

पुराइन्द्रेण वज्रेण हतो वृत्रो महासुरः ।
व्यापिता मेदसा पृथ्वी तदर्थमुपलेपनम् ।।
गोमये वसते लक्ष्मीः पवित्रा सर्व मंगला ।
यज्ञार्थे संस्कृता भूमिस्तदर्थं मुपलेपनम् ।।

त्रिरुल्लेख :- *(कल्पवल्ल्या)*

उल्लेखनं ततः कुर्यादस्थिकण्टकमेव च ।
तेषामुद्धरणार्थाय उल्लेखः कथितो बुधैः ।।

उद्धृत :- (कारिकायाम्)

ये भ्रमन्ति पिशाचाद्या आकाशपथगामिनः ।
तेषां संरक्षणार्थाय उद्धृतं कथितं बुधैः ।।

अभ्युक्ष्य :- (कारिकायाम्)

आपोदेवगणाः सर्वेआपः पितृगणाः स्मृताः ।
तेनैवाभ्युक्षणं प्रोक्तमृषिभिर्देवतादिभिः ।।
(हरिहरः) मणिकाद्भिरभ्युक्ष्याभिषिंच्य ।

अथ यागविधिः

कुण्ड मंडप आदि का निर्माण **"क्रियासार"**, **"कुण्डभास्कर"**, **"कुण्डविंशति"**, **"यज्ञमधुसूदन"**, **"कुण्डप्रदीप"**, **"कुण्डमण्डपसिद्धि"** आदि ग्रंथानुसार अथवा इस पुस्तक के अनुसार करें।

"मयूखग्रंथों" के अनुसार कुण्डों में आहुति विभाग होना चाहिये। परन्तु ऐसा प्रायः इन दिनों यज्ञों में होता नहीं है। तथापि **"मयूख ग्रंथानुसार"** निम्न तरह से आहुति देवें। (प्रतिष्ठा मयूखे)

पंचकुण्डीययज्ञ पक्ष में ग्रहहवन क्रम

ग्रहो की आहुतियाँ १०८, २८, ८ के संख्या में से प्रत्येक की हो सकती है। ८ **आहुति क्रम में** — दो आवृत्ति में हवन होगा। अलग अलग द्रव्यों के लिये अलग अलग होता होगें।

(१) प्रथम आवृत्ति में पाँचों कुण्डों में आहुति होगी।

कुल आहुति = ५

(२) दूसरी आवृत्ति में आचार्य (मध्यकुण्ड) पूर्व, दक्षिण में आहुति होगी पश्चिम व उत्तर के होता बैठे रहेंगें। (या केवल घी की आहुति देवें)

कुल आहुति = ३

प्रत्येक ग्रह की आहुति = ८

२८ आहुति क्रम में :— ६ आवृत्ति में हवन होगा।

(१) प्रथम पाँच आवृत्ति में पांचो कुण्डों में आहुति देवें।

कुल आहुति = २५

(२) दूसरी आवृत्ति में आचार्य कुण्ड, पूर्व एवं दक्षिण कुण्ड में हवन होगा। पश्चिम व उत्तर के होता बैठे रहेंगें। (या केवल घी की आहुति देवें)

कुल आहुति = ३

प्रत्येक ग्रह की आहुति = २८

१०८ आहुति क्रम में :— २२ आवृत्ति में हवन होगा।

२१ आहुति सभी कुण्डों में (१०५) शेष ३ आहुति आचार्य पूर्व एवं दक्षिण कुण्ड में होगी।

अधिदेवता प्रत्याधि देवता :-

(१) अगर ग्रहों की ८ आहुति दी है तो ४ आहुति अधिदेवता प्रत्याधिदेवताओं की होगी। आचार्य पूर्व, दक्षिण, पश्चिम, कुण्ड में हवन होगा। उत्तर में होता बैठे रहेंगें। या घी से आहुति देवे। २८ आहुति ग्रहों की होगी तो ८ आहुति अधिदेवता प्रत्यधिदेवताओं की पूर्वोक्त विधि से होगी। अगर १०८ आहुति प्रत्येक ग्रह की दी है तो २८ आहुति अधिदेवता प्रत्यधिदेवताओं की पहली विधि से होगी।

विनायक लोकपालः :— प्रत्येक ग्रह की आठ आहुति हो तो विनायक लोकपाल की दो आहुति आचार्यकुण्ड व पूर्वकुण्ड में होगी। २८ आहुति प्रत्येक ग्रहों की हो तो ४ आहुति आचार्यकुण्ड, पूर्व, दक्षिण व पश्चिम कुण्ड में होगी, उत्तर के होता बैठे रहेंगें या घी से हवन करें। १०८ आहुति प्रत्येक ग्रहों की हो तो ८ आहुति विनायक लोकपाल की पूर्व विधि से होगी।

नवकुण्डीय पक्ष में :— इसमें ग्रहों की आठ आहुति नहीं होती है, २८ आहुति ४ आवृति में होगी।

प्रथम ३ आवृति में सभी में हवन होगा।

कुल आहुति = २७

चतुर्थ आवृत्ति में केवल आचार्य कुण्ड में हवन होगा।

(अन्य में घी की आहुति होगी) आहुति = १

कुल आहुति = २८

इसी तरह अन्य क्रम का अनुपात अधिदेवता प्रत्याधिदेवता, विनायक व लोकपालों का होम ग्रहों की आहुति अनुसार होगा।

अधिदेवता प्रत्याधिदेवता की ८ आहुति होगी। ईशान कुण्ड को छोड़कर सभी कुण्डों में हवन होगा।

विनायक लोकपाल की ४ आहुति, आचार्य पूर्व, अग्नि व दक्षिण कुण्ड में हवन होगा बाकि होता बैठे रहेंगें या घी से हवन करें।

एक कुण्डीय पक्ष में – यहाँ जितने होता है उसी अनुपात में आवृत्ति होगी। द्रव्यविभाग में समिध, तिल, चरु, एवं आज्य चार द्रव्यों से आहुति देवें तो चार होता होगें सभी एक साथ द्रव्य देंगे तो एक आहुति प्रमाण होगा।

आहुति समये अग्निस्थितिः (कौलावली)

समिध के होम में वैश्वानर को खड़ा हुआ, तिलादि द्रव्यों के होम में बैठा हुआ एवं घी के होम में सोया हुआ ध्यान कर आहुति प्रदान करें। अतः समिध की आहुति खड़े होकर देवें तथा आहुति समिध, तिल, चरु व आज्य गी क्रमशः देवें। आज्य होम बैठ कर करें। समिध होम, लाजा होम, गोदान खड़े होकर करें। कन्या दान भी खड़े होकर करें।

दश विधी स्नान

मूर्ति प्रतिष्ठा व यागविधी मे पहले दशविधि स्नान, हेमाद्रिस्नान, छायापात्रदान, प्रायश्चित्त हवनादि कराना चाहिये। फिर जल यात्रा मंडपप्रवेश आदि करें। विशेष पृष्ठ संख्या **३६** पर है।

अथ जलयात्रा विधानम्

तालाब या कूप के किनारे गोमयादि से भूमि को शुद्ध करें। स्वस्तिक बनाये। नववर्धिनी कलशों के लिये आटा गुलाल से अष्टदल बनायें। उनमें कलश रखें, प्रधान ताम्र कलश बीच में रखें। सप्तमातृकाओं कें लिये कपड़े पर ७ अक्षत पुंज रखें या ७ सिंदूर या कुंकुम की टींकीं लगाये।

संकल्प :– **ॐ जलयात्राङ्गभूत याज्ञिक कार्य साङ्गतासिद्धयर्थे श्री वरुण देवता प्रसन्नार्थे गणेश, जलमातृका, जीवमातृ, स्थलमातृ, सप्तसागर, योगिनी, क्षेत्रपाल, भूमि पूजन पूर्वक नववर्द्धनी कलशेषु वरुण पूजनं चाहं करिष्ये।**

(१८ कलश अलग मंडप हेतु पंचकुण्डीय यज्ञ में लावें) सर्षप विकरण कर दिग्रक्षण करें। गणपति पूजन करें।

संपूर्ण विधि पृष्ठ संख्या ५८ पर दी है।

अथ मंडप प्रवेश षोडशस्तंभ पूजन विधानम्

यजमान बाजेगाजे के साथ जलकलश सहित प्रासाद की प्रदक्षिणा करें। विप्र भद्रसूक्त का पाठ करें तथा यजमान पश्चिम द्वार से प्रवेश करे। विप्र शाकुनसूक्त, पावमानसूक्त का पाठ करें।

संकल्प :— ॐ अद्येत्यादि देशकालौ संकीर्त्यामुक देवप्रतिष्ठाय ज्ञाङ्गतया गणेश पूजा पूर्वक मण्डप देवतास्थापनादि च करिष्ये।

दिग्रक्षण :— "अपक्रामन्तु" से सरसों छोड़े। "देवा आयन्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्षस्व। पूर्वेरक्षतु गोविन्दो.।।"

इसके बाद गणेश, मातृका एवं वसोर्धारा पूजन कर पुण्याहवाचन करें। नांदीश्राद्ध करायें, आचार्यादि वरण करायें। भूमि पूजा करें।

वास्तु पूजन करे. त्रिसूत्रीकरण से रक्षा करे "पावमान सूक्त व रक्षोघ्न सूक्त" पढ़ते हुये चारों ओर दूध व जल की धारा देवे।

अथ षोडश स्तंभ पूजनम् :— (कलश स्थापन क्रम) ९ वर्धिनी कलश आचार्य कुण्ड के पास। १ कलश ईशान कोण में कुण्ड के पास ३ अन्य दिशाओं में सुशोभित हेतू। पूर्वादि चार दिशाओं में प्रत्येक में २ द्वार देवता के व १ तोरण का रखें। दश दिक्पालों के उनकी दिशाओं में रखें।

आचार्य कुण्ड (मध्य कुण्ड) के समीप के चारों स्तंभो में ईशानादि कोणों में।

(1) ईशान

(१) ॐ ब्रह्मजज्ञानं प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चव्विवः ।।

ॐ भू र्भुवः स्वः ब्रह्मन्निहागच्छ इह तिष्ठेत्यावाह्य। ॐ ब्रह्मणे नमः। पाद्यादि से पूजन करे। **अत्रैव — ॐ सावित्र्यै नमः। ब्राह्मयै नमः। गंगायै नमः।** पूजाकर के निम्न मंत्र से स्तंभ का आलंभन करे।

ॐ उर्ध्व उषुण ऊतये तिष्ठाः देवोनः सविता ऊर्ध्वोवाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ।

स्तंभशिरसि — ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

मंत्र -

आयंगौः पृश्निरक्रमीदसदन्मातरम्पुरः पितरं च प्रयन्त्स्वः ।।

ॐ वनस्पति रसोद्भूतो निर्मितो विश्वकर्मणा ।
स्थिरो भवात्र रक्षार्थ यावत्कर्म समाप्तये ।।१।।

(2) आग्नये :-

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्। समूढमस्य पा ठंसुरे।

ॐ भूर्भुवः स्वः विष्णो इहागच्छ इहतिष्ठ। अत्रैव – लक्ष्म्यै नम। नंदायै नमः। वैष्णव्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(3) नैर्ऋत्ये :-

ॐ नमस्ते रुद्रमन्यव ऽउतोतऽइषवे नमः। बाहुभ्यामुतते नमः।

ॐ भूर्भुवः स्वः शिव इहागच्छ इहतिष्ठ। शिवाय नमः। अत्रैव – माहेश्वर्यै नमः। गौर्यै नमः। शोभनायै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(4) वायव्यै :-

ॐ त्रातारमिन्द्रमवितारमिन्द्र ठं हवे हवे सुहव ठं शूरमिन्द्रम् ।
ह्वयामिशक्रम्पुरुहूतमिन्द्रठं स्वस्तिनोमघवा धात्विन्द्रः ।।

ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इहतिष्ठ। इन्द्राय नमः। अत्रैव – इन्द्राण्यै नमः। आनन्दायै नमः। विभूत्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(अब मंडप के बाहरी स्तंभों की ईशान क्रम से पूजा करें)

(5) बहिरीशाने :-

ॐ आकृष्णेन रजसाव्वर्तमानो निवेशयन्नमृतम्मर्त्यंच ।
हिरण्ययेन सविता रथेना देवोयाति भुवनानिपश्यन् ।।

ॐ भूर्भुवः स्वः सूर्य इहागच्छ इहतिष्ठ। ॐ सूर्याय नमः। अत्रैव – सावित्र्यै नमः। मंगलायै नमः। भृत्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(6) *ईशान पूर्वयोर्मध्ये :-*

ॐ गणानान्त्वा गणपति ठ हवामहे प्रियाणान्त्वाप्रियपति ठ हवामहे निधिनांत्वानिधिपति ठ हवामहे व्वसोमम आहमजानिगर्ब्भधमा त्वमजासि गर्ब्भधम् ॥

ॐ भूर्भुवः स्वः गणपते इहागच्छ इहतिष्ठ। ॐ गणपतये नमः। अत्रैव – ॐ विघ्नहारिण्यै नमः। जयायै नमः। सरस्वत्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

आगे के पूजा क्रम में मतभेद है, अन्य क्रम में पूर्व अग्नि के मध्य में शेष अग्निकोण में स्कन्ध, अग्नि व यम के मध्य में यम का आवाहन है जबकि चतुर्थी लालजी के मत से इस प्रकार है।

(7) *पूर्वाग्नययोर्मध्ये :-*

ॐ यमायत्वा मखायत्वा सूर्य्यस्यत्वा तपसे। देवस्त्वा सवितामध्वानक्तु पृथिव्याः स ठ स्पृशस्पाहि । अर्चिरसिशोचिरसि तपोऽसि ॥

ॐ भूर्भुवः स्वः यम इहागच्छ इहतिष्ठ। ॐ यमाय नमः। अत्रैव – पूर्वसंध्याय नमः। क्रूरायै नमः। नियन्त्र्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(8) *ततोअग्निकोण स्तंभे :-*

नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
ये अंतरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥

ॐ भूर्भुवः स्वः शेष इहागच्छ इहतिष्ठ। शेषाय नमः। अत्रैव –

ॐ अधरायै नमः। पद्मायै नमः। महापद्मायै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(9) आग्नेय दक्षिणयोर्मध्ये :-

ॐ यदक्रन्दः प्रथमञ्जायमान ऽउद्यन्समुद्रादुतवापुरीषात् ।
श्येनस्यपक्ष हरिणस्यबाहु ऽउपस्तुत्यं महिजातन्तेऽअर्व्वन् ।।

ॐ भूर्भुवः स्वः स्कन्द इहागच्छ इहतिष्ठ। ॐ स्कंदाय नमः। अत्रैव – ॐ जयायै नमः। ॐ विजयायै नमः। ॐ पश्चिमसंध्याय नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(10) दक्षिण नैर्ऋत्य मध्ये :-

ॐ वायो ये ते सहस्त्रिणोरथा सस्तेभिरागहि ।
नियुत्वान्त्सोमपीतये ।।

ॐ भूर्भुवः स्वः वायो इहागच्छ इहतिष्ठ। ॐ वायवे नमः। अत्रैव–ॐ तिव्रायै नमः। गायत्र्यै नमः। वायव्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(11) नैर्ऋत्ये :-

ॐ आप्यायस्व स मेतु ते विश्वतः सोम व्वृष्ण्यं ।
भवाव्वाजस्य संगथे ।।

ॐ भूर्भुवः स्वः सोम इहागच्छ इहतिष्ठ। ॐ सोमाय नमः। अत्रैव – ॐ सावित्र्यै नमः। अमृतकलायै नमः। विजयायै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि – ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(12) पश्चिम नैऋत्ययोर्मध्ये :-

ॐ इमम्मे व्वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युराचके ।।

ॐ भूर्भुवः स्वः वरुण इहागच्छ इहतिष्ठ। ॐ वरुणाय नमः।

अत्रैव — ॐ वारुण्यै नमः। वार्हस्पत्यै नमः। पाशधारिण्यै नमः। गंध ाादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि — ॐ नागमात्रे नमः (काष्ठ वल्लीं संपूज्य)

(13) पश्चिम वायव्ययोर्मध्ये :-

ॐ वसोः पवित्रमसिशतधारं वसोः पवित्रमसि सहस्त्रधारम् ।

देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष्वः।।

ॐ भूर्भुवः स्वः अष्टवसव इहागच्छ इहतिष्ठ। ॐ वसुभ्यो नमः। अत्रैव —वितायै नमः। गरिमायै नमः। सम्भूत्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि — ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(14) वायव्ये :-

ॐ वय ठ सोमव्रते तवमनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि।।

ॐ भूर्भुवः स्वः धनद इहागच्छ इहतिष्ठ। ॐ धनदाय नमः। अत्रैव — ॐ आदित्यै नमः। सिनीवाल्यै नमः। लघिमायै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि — ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(15) वायव्योत्तर मध्ये :-

ॐ बृहस्पते ऽअतियदर्य्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु ।

यद्दीदयच्छवस ऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।।

ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इहतिष्ठ। ॐ बृहस्पतये नमः। अत्रैव — ॐ पौर्णमास्यै नमः। वेदमात्रै नमः। सन्नत्यै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये. से स्तंभ का आलंभन करें।

स्तंभशिरसि — ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

(16) उत्तरेशानयोर्मध्ये :-

ॐ विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् ।

तस्मैविशः समनमन्त पर्वीरयमुग्रो विहव्यो यथासत् ।।

ॐ भूर्भुवः स्वः विश्वकर्मन्निहागच्छ इहतिष्ठ। ॐ विश्वकर्मणे

नमः। अत्रैव — ॐ वास्तुदेवतायै नमः। वैश्वकर्मण्यै नमः। शारदायै नमः। गंधादिभि संपूज्य। ॐ ऊर्ध्व उषुण ऊतये तिष्ठा देवो नमः सविता उर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाद्यद्भिर्विह्वयामहे। से स्तंभ का आलंभन करें।

स्तंभशिरसि — ॐ नागमात्रे नमः (काष्ठवल्लीं संपूज्य)

तोरण पूजनम्

इसके बाद पश्चिम द्वार से निकल कर पूर्व दिशा में अश्वत्थ के बने तोरण की पूजा करें जो सिन्दूर सदृश्य महेन्द्र पर्वत व शंख के निशान से युक्त हो।

पूर्वे :-

हे अश्वत्थतौरणैनं यज्ञं रक्ष सर्वनिघ्नान्निवारय ।

ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।होतारं रत्नधातमम्।।

ॐ ऋग्वेदाधिष्ठिताय सुदृढतोरणमावाहयामि ।

ॐ सुदृढतोरणाय नमः। गंधादिभि संपूज्य। अत्रैव :— कृतयुगाय नमः, राहवे नमः, बृहस्पतये नमः। गंधादिभि संपूज्येत्।

यहाँ एक कलश स्थापित कर उसकी सविधि पूजा करें। उसके ऊपर नारिकेल रखें कलश में ध्रुव की पूजा करें। **ॐ ध्रुवमावहयामि इत्यावाह्य। ॐ ध्रुवाय नमः।** गंधादिभिः संपूज्य। आचमन करें।

दक्षिणे :— तत्पश्चात दक्षिण में जाकर **औदुम्बर** का बना **विकट** नाम के तोरण की पूजा करें जो धूम्र वर्ण विंध्यगिरी युक्त चक्र के निशान से युक्त हो।

एह्येहि विकटतोरणैनं यज्ञं रक्ष सर्वविघ्नान्निवारय ।

ॐ इषेत्वोर्ज्जेत्वा वायवस्त्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमध्न्याऽइन्द्राय भागंप्रजावतीरनमीवाऽ अयक्ष्मा माऽवस्तेनऽ ईशतमाघशः ठ सोध्रुवा ऽअस्मिन् गोपतौस्यात् बह्वीर्य्ययजमानस्य पशून्पाहि ।।

ॐ यजुर्वेदाधिष्ठिताय विकटतोरणाय नमः आ.। त्रेतायुगाय नमः इति गंधादिभि संपूज्य। सूर्याय नमः। अङ्गारकाय नमः। गन्धादीन समर्पयेत्।

अब यहाँ एक कलश स्थापित करें, उस पर नारेल रखें उसमें **धरायै नमः** धरा का पूजन करें।

पश्चिमे :— प्लाक्ष का **"सुभीम"** नाम का तोरण स्वर्ग कांतिवर्ण गन्धमादन पर्वत एवं गदा के चिन्ह सहित पूजन करें।

एह्येहि सुभीम तोरणैनं यज्ञं रक्ष सर्वविघ्नान्निवारय । ॐ अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सिबर्हिषि।। सामवेदाधिष्ठिताय सुभीमतोरणाय नमः आ. स्था.। अत्रैव — द्वापरयुगाय नमः। शुक्राय नमः। बुधाय नमः। गन्धाद्यैरुपचारैः पूजनम्। एक कलश नारिकेल सहित स्थापित करें। उसमें **वाक्पति** का आवाहन पूजन कर आचमन करें।

उत्तरे — वटवृक्ष के सुप्रभ नामक तोरण का जो हिमपर्वत व पद्म से अंकित तथा स्फटिक कान्ति युक्त हो पूजन करें।

एह्येहि सुप्रभतोरणणैनं यज्ञं रक्ष सर्वघ्निन्निवारय । ॐ शन्नोदेवीरभिष्टय ऽआपोभवंतु पीतये। शय्योरभिस्रवंतुनः । अथर्ववेदाधिष्ठिताय सुप्रभतोरणाय नमः आ. स्था.। अत्रैव — सोमाय नमः आ. स्था.। केतवे नमः केतुमावाहयामि। शनैश्चर आवाहयामि। सर्वेषां गंधादिना प्रपूज्य।

यहाँ एक कलश स्थापित करें नारिकेल रखें उसमें **विघ्नेश** का आवाहन करें।

ॐ विघ्नेशाय नमः विघ्नेशमावाहयामि। गंधाद्यैः पूजयेत्।
इसके बाद दिक्पालद्वार शाखा पूजन व वेदपाठी विप्रों का वरण करे।

अथ दिक्पाल च द्वारशाखा पूजनम्

पूर्वे :— द्वार शाखा के पास दो कलश रखें उनमें **इन्द्र व ऐरावत** का आवाहन करें।

ॐ ऐरावतदिग्गजमावहयामि पूजयामि नमः। कलशों पर घी के दीपक रखें।

ऋग्वेदीया का वरण :-

ऋग्वेद पत्रपत्राक्षो गायस्त्रः सोमदैवतः। अत्रिगोस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव । प्रार्थयेत् गंधादिना पूजयेत् ।

श्री सूक्त, पावमान सूक्त, सुमंगलसूक्त, पौरुषसूक्त, रुद्रसूक्त, वामदेवसूक्त, का पाठ करें।

ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इहतिष्ठ, साङ्गंसपरि. सायुधं सशक्तिकमिन्द्रं द्वारकलशे आवाहयामि।

ॐ त्रातारमिन्द्र वितारमिन्द्र ठ हवे हवे सुहव ठ शूरमिन्द्रम । ह्वयामि शक्रम्पुरुहूतमिन्द्र ठ स्वस्तिनोमघवा धात्विन्द्रः।इंद्राय नमः।

गंधाद्यैः पूजयेत्।

पीतपताका एवं ध्वजा पूजन :-

ॐ आशुः शिशानो वृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोनिमिष ऽएकवीरः शत ठ सेना अजयत्साकमिन्द्रः ।।

द्वारशाखायाम् :— दक्षिणे धात्रे नमः, उत्तरे विधात्रे नमः, (उर्ध्वं) द्वाराश्रियै नमः, गणपतये नमः, (तदुपरि) वास्तुपुरुषाय नमः, अधो देहल्यै नमः, वामस्तंभे गणेशाय नमः, दक्षिणस्तंभे स्कंदाय नमः, कलशद्वये गंगायै नमः, यमुनायै नमः, इंद्राय नमः।

ततोमाषभक्तबलिं दत्वा :— ॐ इंद्राय साङ्गाय सपरिवाराय, सवाहनाय सायुधाय सशक्तिकाय माषभक्त बलिं समर्पयामि। इसके बाद आचमन करें।

अग्नये :- कलश स्थापित करें। तत्र पुण्डरीकाय नमः। पुण्डरीकमावाहयामि। अमृताय नमः अमृतमावाहयामि। पूजनं कृत्वा।

ॐ भूर्भुवः स्वः अग्ने इहागच्छ इहतिष्ठ। साङ्गं सप. सवा. सायुधं सशक्तिकं कलशे आवाह्य।

ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँ ऽऽआसादयादिह ।।

ॐ त्वन्नो अग्ने तवदेव पायुभिर्म्मघोनो रक्षतन्वश्चवन्द्य । त्रातातोकस्यतनयेगंवामस्य निमेष ठ रक्षमाणस्तववव्रते ।।

ॐ अग्नये नमः इति गंधादिना प्रपूज्य।

रक्त ध्वज पताका का पूजन करे ध्वजायै नमः पताकायै नमः। ॐ अग्नये सांगाय सप. सवा. साप्र. सश. एतंभाषभक्त बलिं समर्पयामि। इति बलिंदत्वाऽऽचमेत्। आचमन करें।

दक्षिणे:— द्वारशाखा के पास दो कलश रखें, उनमें दिक्पाल का आवाहन करें। वामनाख्यं दिग्गजमावाहयामि। ॐ वामनाख्य दिग्गजाय नमः इति संपूज्य दीपं दद्यात्।

तत्र :— (यजुर्वेदीयावरण) यजुर्वेदिनौ द्वारपालौ। कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः। काश्यपेस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव।

गंधादिभि संपूज्य।

अब आनोभद्रा, "आशुः शिशानक, यद्देवा त्रीणि" एवं पुनन्तुमाम सूक्त पढ़ें।

ॐ भूर्भुवः स्वः यम इहागच्छ इहतिष्ठ। यमं साङ्गं सप. सवा. सायुधं सशक्तिकं कलशे आवाह्य।

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे।। ॐ यमाय नमः। गंधादिभि संपूज्य। कलश में पूजा करे। कृष्ण ध्वज पताकायां पूजनं कृत्वा।

द्वारशाखायो :— वामे — बलाय नमः, दक्षिणे सबलाय नमः। (ऊर्ध्वम्) श्रियैनमः, गणपतये नमः। (अधः) देहल्यै नमः, वास्तुपुरुषाय नमः।

स्तंभयोः — दक्षिणे पुष्पदंताय नमः, वामे कपर्दिने नमः। कलशद्वये — गोदावर्यै नमः, कृष्णायै नमः। इति संपूज्य।

ॐ यमाय साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि। बलि प्रदान कर आचमन करे।

नैऋत्ये :— कलश स्थापित करें। तत्रैव कुमुदमावाहयामि। दुर्ज्जयमावाहयामि। कुमुद दुर्ज्जयाभ्यां नमः। इति प्रपूज्य दीपोदेयः।

एह्येहि रक्षोगणनायकस्त्वं विशाल वेताल पिशाचसङ्घैः। ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते।

ॐ भूर्भुवः स्वः निर्ऋत्ये इहागच्छ इहतिष्ठ। साङ्गं सप. सवा. सायुधं सशक्तिकं कलशे आवाह्य।

असुन्वन्तम यजमानमिच्छस्तेनस्येत्यामन्विहितकरस्य ।
अन्यमस्मदिच्छसात ऽइत्यानमो देवि निर्ऋते तुभ्यमस्तु ।।

ॐ निर्ऋत्ये नमः इति संपूज्य।

(नीलवर्ण) ध्वजा पताकेभ्यो नमः। संपूज्य।

ॐ निर्ऋतये साङ्गं सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि। बलि प्रदान कर आचमन करे।

पश्चिमे :— दो कलाश स्थापित करे। कलश द्वये अंजनाख्यादिग्गजाय नमः। संपूज्य।

सामवेदीया वरण :— तत्रं सामवेदिनौ द्वौद्वारपालौ। सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः। भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव।

तब पुरुषसूक्त, रुद्रसूक्त, एवं आज्य दोहादि के सूक्त पढ़ें।

ॐ भूर्भुवः स्वः वरुण इहागच्छ इहतिष्ठ। साङ्गं सप. सवा. सायुधं सशक्तिकं कलशे आवाह्य। ॐ तत्त्वायामि ब्रह्मणा.। ॐ वरुणाय नमः इति गंधादिभि संपूज्य।

ॐ उदुत्तमं वरुण पाशमस्मद वाधमं वि मध्यमं ठं श्रथाय अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम्।।

(श्वेतो) ध्वजायै, पताकायै नमः। ॐ इम्मे वरुण.। संपूज्य।

द्वारशाखायाम् :— वामे जायायै नमः, दक्षिणे विजयायै नमः। (ऊर्ध्व) श्रियैनमः। गणपतये नमः। (अधः) देहल्यै नमः, वास्तुपुरुषाय नमः। स्तंभयो —वामे—नंदिने नमः (दक्षिणे) चन्द्राय नमः। कलशद्वये रेवायै नमः नर्मदाय नमः। गंधादिभि संपूज्य।

ॐ वरुणाय साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि।

बलि प्रदान कर आचमन करे।

वायव्यां :— सनारिकेलं कलशं स्थापयेत तत्र पुष्पदंताय नमः। पुष्पदंतमावाहयामि संपूज्य।

पुनः कलशे :-

ॐ आनोनियुद्धिः शतिनीभिरध्वर ठ सहस्त्रिणी भिरुपयाहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्वयूयम्पात स्वस्तिभिः सदानः ।।

ॐ वायवे नमः। गंधादिभि संपूज्य। तत्रैव (धूम्रवर्ण) ध्वजायै नमः पताकायै नमः। भो वायवे साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि।

बलि प्रदान कर आचमन करे।

उत्तरे :— दो कलश स्थापित करें। उनमें आवाहन करे।

ॐ सार्वभौम दिग्गजाय नमः। संपूज्य। दीपं दद्यात्।

अथर्वेदीया का वरण करें। (इन्हें द्वारपाल भी कहते है। द्वारपाल दो होते है। प्रत्येक द्वार के लिये दो विप्र का वरण होता है। शक्त्याभाव में एक विप्र का वरण अवश्य करें।)

वृहन्नेत्रो ऽथर्ववेदो ह्यनुष्टुब्रुद दैवतः। वैशम्पायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव। (एक हो तो — मखा भव) तिलक लगाये।

ये विप्र — अंङ्गरसोजन्मनी. सूक्त। रुद्रपत्पादि. रुद्रसूक्त। अपराजितादेवी परिवर्त्मनी. सूक्त। मधुवाता. मधूसूक्त। शन्न इंद्रानीत्यादि — शांतिअध्याय का पाठ करे। ॐ शन्नो देवीर.....।

तदन्तर कलशे सोमावाहय।

ॐ वय ठ सोमव्रते तवमस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि ।।
ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम् ।
भवावाजस्य सङ्गथे ।।

ॐ सोमाय नमः सोमइत्याह्य । गंधादिभि संपूज्य ।

(श्वेत पताका व हरित ध्वज का पूजन करे) ॐ ध्वजाय नमः,

पताकाभ्यो नमः।

द्वारशाखा पूजनं :— वामे चण्डाय नमः, दक्षिणे प्रचण्डाय नमः, (उर्ध्वम्) द्वारश्रियै नमः, गणपतये नमः। (अधः) देहल्यै नमः, वास्तुपुरुषाय नमः।

स्तंभयो — (वामे) महाकालाय नमः (दक्षिणे) भृङ्गिने नमः। कलश द्वये — वारुण्यै नमः, वेण्यै नमः।

ॐ सोमाय साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि। बलि प्रदान कर आचमन करे।

ईशाने :— एक कलश स्थापित करे नारिकेल रखे। तत्रैव — सुप्रतीकाय नमः, मंगलाय नमः। पूजन करे, दीपक करे।

तत्रैव :-

तमीशानं जगतस्तस्थुषस्पतिंधियं जिन्वमवसे हूमहेव्वयम् ।
पूषानो यथावेदसाम सद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।

ॐ ईशानाय नमः। गंधोदकेन प्रपूज्य। (श्वेतवर्ण पताका व पंचवर्ण ध्वज) ॐ ध्वजायै नमः, पताकाभ्यो ॐ नमः, ॐ ईशानाय साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि। बलि प्रदान कर आचमन करे।

ईशानपूर्वयोर्मध्ये :- एक कलश स्थापित करे।

तत्रैव -

ब्रह्मज ज्ञानं प्रथमं पुरस्तद्विसीमतः सुरुचोव्वेन आवः ।
सबुध्न्य उपमा अस्य विष्ठाः सतश्चयोनिमसतश्चव्विवः ।

ॐ ब्रह्मणे नमः। गंधोपचारे पूजयेत।

(रक्तवर्ण ध्वजा पताका) ॐ ध्वजायै नमः, ॐ पताकायै नमः। पूजन कृत्वा। ॐ ब्रह्मणे साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि। बलि प्रदान कर आचमन करे।

निर्ऋतिवरुणोर्मध्ये :— एक कलश स्थापि करें। तत्रैव :— ॐ भू भुर्वः स्वः अनन्त इहागच्छ इहतिष्ठ।

ॐ आयंगौ पृश्निरक्रमीद सदन्मातरम्पुरः। पितरञ्च प्रयन्त्स्वः ।।

ॐ श्योनापृथिवी.....। ॐ अनंताय नमः।। गंधादिभि संपूज्य।

ॐ अनंताय साङ्गां सपरि. सवा. एतंमाष भक्त बलिं समर्पयामि। बलि प्रदान कर आचमन करें।

महाध्वज (मण्डपमध्ये या ईशाने) :— (पंचवर्णः महाध्वज संपूज्य दश सा सौलह हाथ के दण्ड सहित)

ॐ इंद्रस्य वृष्णो वरुणस्यराज्ञ आदित्यानांमरुता ठ शर्द्धउग्रम् ।
महामन साम्भुवनच्यवानां घोषोदेवानां जयता मुदस्थात् ।।१ ।।
इंद्राय नमः। ॐ ब्रह्मजज्ञानम्प्रथम्पुरस्ता.। ब्रह्मणे नमः। इंद्र, ब्रह्माणं पूजनं कुर्यात्। ॐ दण्डाय नमः दंडं पूजयेत्।

पूर्व दिशा में मंडप के बाहर थोड़ी भूमि का लेपन कर तथा सब देवों की बलि विशेष मात्रा में सामूहिक एक जगह प्रदान करें। दीप प्रदान करें।

अधश्चैव तु लोका असुराश्चैव पन्नगा। सपत्नीपरिवाराश्च प्रतिगृह्ण न्त्विमं बलिम्। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्म विष्णु शिवैः सार्द्ध रक्षां कुर्वन्तु ते सदा। देवदानवगंधर्वा यक्ष राक्षसपन्नगाः। ऋषयो मुनयो गावो देवमातरएव च। सर्वेममाध्वरे रक्षां प्रकुर्न्वन्तु मुदान्विताः।

ब्रह्माविष्णुश्च रुद्रश्चक्षत्रेपालो गणैः सह। रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः।। एते गृहणन्तु मयादत्तं बलिं वै सार्वभौतिकम्। अनेन बलिदानेन अधोलोकादयः प्रीयन्ताम्।।

इसके बाद आचमन करे हाथ पैर धोकर मंडप में प्रवेश करे।

रक्षा विधानम्

बायें हाथ में पीली सरसों, चावल, द्रव्य, मोली (रक्षासूत्र) लेकर दाहिने हाथ से ढ़ककर मंत्र पढ़ें।

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।
विष्णु रुद्रं श्रियं देवी वन्दे भक्त्या सरस्वतीम् ।।१ ।।
स्थानाधिपं नमस्कृत्य दिननाथं निशाकरम्

धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिम् ।।२।।
दैत्याचार्य नमस्कृत्य सूर्यपुत्रं महाग्रहम् ।
राहुंकेतुं नमस्कृत्य यज्ञारम्भे विशेषतः ।।३।।
शक्राद्या देवता सर्वां नमस्कृत्य मुनींस्तथा ।
गर्गमुनिं नमस्कृत्य नारदं मुनिसत्तमम् ।।४।।
अगस्त्यं च पुलस्त्यंच याज्ञवल्यक्यं च गालवं ।
मार्कण्डेय नमस्कृत्य दक्षमित्र पाराशरम् ।।५।।
वशिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ।
व्यास मुनिं नमस्कृत्य सर्वशास्त्र विशारदम् ।।६।।
विद्याधिका ये मुनय आचार्याश्च तपोधनाः ।
सर्वे ते मम यज्ञस्य रक्षां कुर्वन्तु विघ्नतः ।।७।।

इसके बाद सब दिशाओं में **"पूर्वे रक्षुतु गोविन्द"** ....आदि मंत्रो से सरसों फेंकें एवं रक्षा सूत्र सब मंडलों पर चढ़ावें यजमान के रक्षासूत्र बांधे।

कुण्ड पूजन प्रयोग

_संकल्प_ :— अद्येदिदेश कलौ संकीर्त्य. अमुक देवतायाः प्रतिष्ठाया अमुक कर्म पुरश्चरण सांगातासिद्ध्यर्थ अग्निप्रतिष्ठां करिष्ये तदङ्गस्तया समार्जन मेखलायोनि देवता स्थापनं पूजनं च करिष्ये।

तंत्र ग्रंथों के अनुसार कुंड के १८ संस्कार होते है, परन्तु यथासंभव करे।

(१) मूलमंत्र से वीक्षण करें। (२) कुशाका स्पर्श करे — फट् मंत्र से ताडन करें। (३) मूल मंत्र से कुशोदक द्वारा प्रोक्षण करें।

अमुक देवताया कुण्ड स्थाण्डिलाय नमः ।

हाथ में पुष्पाक्षत लेवें। **कुण्डपूजनम्।**

ॐ आवाहयामि तत्कुण्डं विश्वकर्मविनिर्मितम् ।
शरीरं यच्च ते दिव्यमग्न्यधिष्ठान — मद्भुतम् ।

ॐ कुण्डाय नमः। गंधादिभि संपूज्य। प्रार्थना करे।

ये च कुण्डे स्थिता देवाः कुण्डांगे याश्चदेवताः ।

ऋद्धिं यच्छन्तु ते सर्वे यज्ञसिद्धिं मुदान्विता ।१।।
हे कुण्ड तव निर्माण रचितं विश्वकर्मणा ।
अस्माकं वाञ्छितां सिद्धिं यज्ञसिद्धिं ददातु भोः ।।२।।

कुण्ड मध्य में विश्वकर्मा का पूजन करे। —

ॐ विश्वकर्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोकरवद्धयम् ।
तस्मै विशः समनमन्त पूर्वीरमुग्रो विहव्योयथासत् ।।
उपयायमगृहीतो सींद्राय त्वा विश्वकर्मण एषते
योनिरिन्द्राय त्वा विश्वकर्मणे।। ॐ विश्वकर्मणे नमः।

अज्ञानाज्ज्ञानतो वापि दोषास्युः खननोद्भवाः। नाशाय त्वंहि तान्सर्वा न्विश्वकर्मन्नमोऽस्तुते।। इस प्रकार प्रार्थना करे। कुण्ड निर्माण करने वाले कारीगर विश्वकर्मा का भी पूजन आदर कर दक्षिणा दिलावें।

मेखला पूजनम् :— मेखला ऊपर की श्वेत रंग की (सत्व) मध्य की लालवर्ण की (रज) अधः मेखला कृष्ण वर्ण (तम) की होती है। सामान्य रूप मे ब्रह्मा, विष्णु, महेश की भावना मानते है। परन्तु अधिकांश ग्रंथों में ऊपर की श्वेत में विष्णु, मध्ये रक्तवर्ण में ब्रह्मा, अधः कृष्ण वर्ण में रुद्र का पूजन लिखा है।

ऊपरिश्वेतमेखलायाम् :- ॐ इदं विष्णु र्विचक्रमे त्रेधानिदधेपदम। समूढमस्यपा ठ सुरे स्वाहा। ॐ विष्णवे नमः, विष्णो इहागच्छ इहतिष्ठ ।

ॐ विष्णु यज्ञपते देव दुष्ट दैत्यनिषूदन ।
विभो यज्ञस्य रक्षार्थं कुण्डेसन्निहितोभव ।। गंधादिभिः संपूजयेत्।

मध्ये रक्तवर्णमेखलायाम् :- ॐ हंसपृष्ठरूढ देव देवगणावृत। रक्षार्थ ममयज्ञस्य कुण्डेसन्निधोभव ।

ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ।
सबुध्न्या उपमाअस्य विष्ठाः सतश्चयोनिमसतश्चविवः ।।
ॐ ब्रह्मणे नमः ब्रह्मन् इहागच्छ इहतिष्ठ। अर्घ गंधादिभिः संपूज्य।

अधोमेखलायाम् (कृष्ण वर्णा) :— ॐ गंगाधर महादेव वृषारूढ़

महेश्वर। आगच्छ भगवन्रुद्र कुण्डे ऽस्मिन् सन्निधोभव।

ॐ नमस्ते रुद्रमन्यव ऽउतोत ऽइषवे पमः ।
बाहुभ्या मुतते नमः। ॐ रुद्राय नमः रुद्र इहागच्छ इहतिष्ठ।
त्र्यंबकं यजामहे...। गंधादिभिः संपूज्य।

योनि पूजा :-

ॐ जगदुत्पत्ति हेतुकायै मनोभवयुतायै योन्यै नमः। तत्र प्राक्दिशायां गौरीं पूजयेत्। ॐ अम्बे अम्बिके अम्बालिके नमानयतिकश्चन। ससस्त्यश्वकः सुभद्रिकां कांपीलवसिनीम्।। गौर्यै नमः।

ॐ क्षत्रस्य योनिरसि क्षत्रस्यनाभिरसि मा त्वाहि ठ सीन्मामा हि ठ सीः। गंधादिभिः संपूज्य।

प्रार्थयेत् -

योनिरित्येव विख्याता जगदुत्पत्ति हेतुका ।
मनोभवयुता देवी रतिसौख्य प्रदायिनि
मोहयित्री सुराणां च जगद्धात्रि नमोस्तु ते ।।

कंठ पूजा :— कंठ में रुद्र का पूजन करे।

ॐ निलग्रीवाः शितिकण्ठा शर्वा अधः क्षमाचराः
तेषा ठ सहस्र योजने ऽव धन्वानि तन्मसि ।।
कण्ठे रुद्राय नमः। गंधादिभिः च पुष्पाणि संपूज्य।

नाभिपूजा :-

ॐ नाभिर्मे चित्तं विज्ञानं पायुर्मेपचितिर्भसत्। आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः। जङ्घाभ्यां पद्भ्यांधर्मोस्मि विशिराजा प्रतिष्ठितः ।
गंधादिभिः संपूज्य।

नाभे त्वं कुण्डमध्ये तु देव्यैः सहप्रतिष्ठता ।
अतस्त्वं पूजिता देवीं शुभदा ऋद्धिदाभव ।।

वास्तुपूजनम् :— कुण्डमध्येनैऋत्यकोण में वास्तु का पूजन करे।

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवोभवानः ।

यत्वेमहेप्रतितन्नो जुषस्यशन्नो भवद्विपदे शं चतुष्पदे ।।

ॐ वास्तुपुरुषाय नमः। गंधादिभिः संपूज्य। बलिंदद्यात्। प्रार्थयेत्। पितामहसुतो मुख्यस्तुभ्यं वास्तुपते नमः।

कुण्डसंस्कार :– "हुं" मंत्र से अवगुष्ठन। **दर्भैन परिसमुह्य, तान्कुशानीशान्यां परित्यज्य।**

तांत्रिके :– अस्त्र से **खनन** और **उद्धार, "ह्रीं"** मंत्र से **प्रपूरण, फट्** से **समीकरण,** ॐ हुं से **सेचन** करे। **ऐं** से **कुट्टन,** हुं से **मार्जन** करे।

गोमयोदकेनोलिप्य। स्रुवमूलेन उत्तरोत्तर त्रिरुलिख्य।

इन रेखओं की विष्णु, शिव, पुरन्दर के नाम से पूजा करे।

तांत्रिके :– कला रूप में कल्पना करे, त्रिसूत्रीकरण करे (३ या १९ सूत्र से) **ॐ** या **शिर** मंत्र से वज्रीकरण **ॐ ह्रीं** मंत्र से प्रोक्षण करे।

गोमय से उपलेपन करके स्रुव के मूल से या खादिर से तीन रेखायें **पश्चिम से पूर्वाग्र** खींचते हुये (प्रादेश मात्र या १२ अंगुल की) दक्षिण से उत्तरोत्तर दिशा में क्रमश: खींचे। अनामिका अंगुष्ठ से उनकी मिट्टी लेकर ईशान कोण में फेंके इन रेखाओं के नाम **विष्णु, शिव, पुरन्दर** है। इनकी पूजा करें।

इसी तरह तीन रेखायें दक्षिण से उत्तराग्र खींचें। पश्चिम से पूर्व की ओर पूर्वात् पूर्व क्रमश: खींचे। उनके नाम **ब्रह्मा, वैवस्वत (यम) एवं चन्द्र है**। उनकी पूजा करे।

अग्नियंत्र पूजनम् :– बहुधा स्थण्डिल व कुण्ड में अष्टदल बनाते है, अग्नि यंत्र नहीं बनाते है। अग्नियंत्र में त्रिकोण या षट्कोण के ऊपर वृत्त बनाकर चार दक्षिण व तीन उत्तर की ओर जिह्वा बनावें, या छजिह्वाओं की षट्कोण में एवं सातवीं की मध्य में पूजा करें।

अगर सभी वृक्षों के पास वेदी व घट स्थापन नहीं कर सके तो **आठ वृक्षों के पास वेदिका बनाये** सप्तधान्य रख कर उन पर **जल पूरित घट** रखें। **वरुण पूजा करे।**

अग्नि स्थापन कर नवग्रहमख लोकपालों का आवाहन होम करे। प्रतिवृक्ष ७ या आठ फल रखें (कूर्म मकरी आदि के प्रतिरूप में यहां इनको रखें)

ॐ वनस्पतयेवीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयं स्वास्थाता ये जयतु जे त्वानि ॥

इस तरह आसादन करे।

ब्रह्मा शिव विष्णु विनायक लक्ष्मी अंबिका भूतग्राम देवता का स्थापन कर पूजन करे। सबको बलि प्रदान करे।

'यूप की स्थापना' ३ कदम छोडकर ईशान कोण में करे। ग्रहादि होम करे।

प्रधान होम - **'ॐ वनस्पतये'** इस मंत्र से १०८ या १००० आहुति देवे। पूर्णाहुति करे।

उत्सर्गः **:- इदमारामं यथा संख्य अश्वत्थादियुतान् वृक्षान् वनस्पति दैवतान् स्वीयपापक्षय पूर्वक पितृमातृ कुल द्वय तारण कामः श्रीपरमेश्वर प्रीत्यर्थं सर्व सत्त्वेभ्यो ऽहं उत्सृजे।**

इसके बाद निम्न मंत्र पढ़ें -

सर्व भूतेभ्य उत्सृष्टं मयैतद्वन मूर्जितम् ।
रमन्ता सर्वभूतानि स्थितिं भक्षोत्सवादिभिः ।
सामान्यं सर्वभूतेभ्यो मयादत्तमिदं वनम् ।
रमन्तां सर्वभूतानि स्थितिं भक्षोत्सवादिभिः ॥

॥इति आरामोत्सर्ग प्रयोगः॥

अथ वैदिक अभिषेकमंत्राः

पूजा विधान, यज्ञ विधान, प्रतिष्ठा विधान संपूर्ण होने पर **श्रेयदान** करते समय (आशिका देते समय) आचार्य यजमान व यजमान पत्नि का अभिषेक कर आशीर्वाद प्रदान करें।

ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जेदधातन । महेरणाय चक्षसे ॥१॥
योवः शिव तमोरसस्तस्य भाजयते हनः । उशतीरिव मातरः ॥२॥
तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । अपोजन यथाचनः ॥३॥
ॐ त्रातारमिन्द्र मवितारमिन्द्र ठं हवे हवे सुहव ठं शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ७ स्वस्ति नो मधवा धात्त्विन्द्रः ॥४॥
ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कंस्भ सर्जनीस्थो वरुणस्य । ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदन -मासीद ॥५॥ भगप्रणेतर्भग सत्याराधो भगेमान्धिय मुदवाददन्नः । भग प्रणो जनय गोभिरश्वै र्भगं प्रनृभिर्नृवन्त : स्याम ॥६॥
इदमापः प्रवहता वद्यञ्चमलं च यत् यच्चाभिदुद्रोहानृतं । यच्च शेपे अभीरुणम् आपोमातस्मादेन सः पवमाश्चमुंचतु ॥७॥
ॐ पुनंन्तु मा देवजनाः पुनन्तु मनसाधियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहिमा ॥८॥
आप्या यस्व स मेतुते विश्वतः सोमवृण्यम् ।भवा वाजस्य संगथे ॥९॥
पयः पृथिव्यां पय ओषधीषु पयोदिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥१०॥
देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन्तुर्यत्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचामि ॥११॥
देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्ये वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्ये नाभिषिञ्चामि ॥१२॥
देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनो र्भैषज्ये न तेजसे ब्रह्मवर्चसा सा याभिषिञ्चामि ॥१३॥

सरस्वत्यै भैषज्ये न वीर्याया नाद्यायाभिषिंचा-
मींद्रस्येन्द्रियेण बलाय श्रियययैशसोभिषिञ्चामि ॥१४॥
पालाशं भवति तेन ब्रह्मणोभिषिंचति । ब्रह्मवै पलाशो
ब्रह्मणै वैनमेतदभिषिंचति ॥१५॥
सर्वेषां वा एष वेदाना ꣳ रसो यत्साम सर्वेषा
मे वैनमेत द्वेदाना ꣳ रसेनाभिषिंचति ॥१६॥
यद्वेव कल्पाञ्जुहोति प्राणा वैकल्पा अमृत मुवै
प्राणा अमृतेनवैनमेतदभिषिञ्चति ॥१७॥
दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वायचासा
अथो जीव शरदः शतम् ॥१८॥
ॐ द्यौः शांतिरिक्ष ठं शांति - इति मंत्रेण ॥१९॥

अथ पौराणिक अभिषेकमंत्राः

सुरास्त्वाभिषिञ्चतु ब्रह्मविष्णु महेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥१॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलो ऽग्निः भगवान्यमो वै नैर्ॠतिस्तथा ॥२॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा ऽनन्त सहिताः दिक्पालाः पान्तु ते सदा ॥३॥
कीर्तिर्लक्ष्मीः धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः ।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥४॥
आदित्यश्चन्द्रमा भौमो बुध जीव सिता ऽर्कजाः ।
ग्रहास्त्वामभिषिञ्चतु राहुः केतुश्च तर्पिताः ॥५॥
देव दानव गंधर्वा यक्ष राक्षस पन्नगाः ।
ऋषयो मानवो गावो देवमातर एव च ॥६॥
देवपत्न्यो द्रुमा नागा दैत्यश्चाप्सरसां गणाः ।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥७॥

औषधानि च रत्नानि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्व कामार्थ सिद्धये ॥८॥
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
अभिषिञ्चन्तु ते सर्व धर्म कामार्थ सिद्धये ॥९॥

॥ अथ आयुष्यमंत्रः ॥

आशीर्वाद, कंकण बंधन, रक्षाबंधन, ग्रंथिबंधन आदि में निम्न मंत्र प्रयोग में आते है ।

ॐ आयुष्यं वर्चस्य ठ रायस्पोष मौदिद्भदम् ।
इदं ठ हिरण्यं वर्चस्वजैत्राया विशतादुमाम ॥१॥
न तद्द्रक्षा ठ सि न पिशाचास्तरन्ति देवानामोजः
प्रथमज ठ ह्येतत् । यो बिभर्ति दाक्षायण ठ हिरण्य
ठ सेदेवेषु कृणुते दीर्घमायु ॥२॥
यदाबध्नन् दाक्षायणा हिरण्य ठ शतानीकाय सुमनस्यमानाः ।
तन्म आबद्ध्नामि शतशारदाया युष्माञ्जरदष्टिर्यथासम् ॥३॥
दीर्घायुस्त ऽओषधे खनितायस्मै चत्वाखनाम्यहम् ।
अथो त्वन् दीर्घायुर्भुत्वा शतवल्शा विरोहतात् ॥४॥
द्रविणोदाः पिपीषति जुहोत प्रचतिष्ठत। नेष्ट्रा दृतुभिरिष्यत ॥५॥
द्रविणोदा द्रविण सस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत् ।
द्रविणो दावीर वतीमिषंनो द्रविणो दारासते दीर्घमायुः ॥६॥
नवो नवो भवति जायमानो ह्नां केतुरुष सामेत्यग्रम् ।
भागं देवेभ्यो विदधात्यायन्प्र-चन्द्रमास्तिरते दीर्घमायुः ॥७॥
उच्चादिवि दक्षिणावन्तो ऽअस्थुर्ये ऽअश्वदाः सहते सूर्येण ।
हिरण्यदा ऽअमृत्वं भजंते वासोदाः सोमप्रतिरंत आयुः ॥८॥

अथ चतुर्वेदोक्त सूक्तानि

यज्ञ मंडप के चारों द्वारों पर द्वारपाल पद नियुक्ति हेतु चार वेद पाठी ब्रह्मणों

को वरण कर चारों वेदों के लिये उन के **सूक्त पढें** जाते है। पूर्व में ऋग्वेद, दक्षिण में यजुर्वेद, पश्चिम में सामवेद और उत्तर में अथर्वेद की स्थापना कर उनके सूक्त पढें जाते है।

अतः चारों वेदों के सूक्त दिये जा रहें है जो यज्ञ समय पाठ व अलग अलग कार्य भी प्रयोग में आते है।

।। अथ ऋग्वेद सूक्तानि ।।

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ।
अत्रिगोत्रस्तु विपेन्द्र ऋत्विक्त्वं मे मखे भव ॥

श्रीसूक्तम्

ॐ अस्य श्रीसूक्तस्य आनन्द कर्दम चिक्लीथ ऋषि अग्निदेवताः आदौत्रयस्य अनुष्टुप छंद शेषांसा प्रसार पंक्ति त्रिष्टुप अनुष्टुप पुनः प्रसार पंक्ति छंद हिरण्य वर्णां बीजं, तां आवह इति शक्तिः कीर्तिमृद्धि ददातु इति कीलकं श्री महालक्ष्मी वर प्रसाद सिद्धर्थं पाठे जपे विनियोगः।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्त्रजातम् ।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदोममावह ॥१॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषाहनम् ॥२॥
अश्वपूर्णां रथमध्यां हस्तिनाद प्रमोदनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥
कांसोस्मितां हिणरय प्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वांवृणे ॥५॥
आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मी ॥६॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतो ऽस्मिन्राष्ट्रे ऽस्मिन्कीर्तिमृद्धिं ददातुमे ॥७॥
क्षुत्पिपासामलां ज्येष्ठा - मलक्ष्मीर्नाशयाम्यहम् ।

अभूतिं समृद्धिं च सर्वांनिर्णुद मे गृहात् ॥८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥
मनसः कांम माकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥
कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥
आपः सृजन्तु स्निग्धानि चिल्कीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदोममावह ॥१३॥
आर्द्रां यष्करणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो ममावह ॥१४॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पंचदशर्चं च श्रीकामः सततं जपेत् ॥

(कहीं कहीं पुष्टिं, सुवर्णां तथा यष्टिंपिंगलां पद्ममालिनीम् है)

॥श्रीरस्तु॥

पावमानसूक्तम् (ऋग्वेदोक्त)

पवित्रिकरण एवं शांतिपाठ तथा दुग्धादिधारा देते समय भी पाठ करते है।

वैसे इसके ऋग्वेद में ११५ श्लोक माने है परन्तु आवश्यकतानुसार ३० श्लोक ही दिये जा रहें। ऋग्वेद ६।७।२३

ॐ स्वादिष्ठया मदिष्ठया पवस्व सोम धारय। इंद्राय पातवेसुतः ॥१॥
रक्षोहा विश्व चर्षणि रभियोनि मयोहतम्। द्रुणासधस्थ मासदत् ॥२॥
वरिवोधातमोभवमंहिष्ठो वृत्रहन्तमः । पर्षिराधोमघोनाम् ॥३॥
अभ्यर्ष महानां देवानां वीतिमंधसा । अभिवाजमुत श्रवः ॥४॥

त्वामच्छा च रामसितदिदर्थां दिवो दिवे । इंद्रोत्वेन आशसः ॥५॥
पुनाति ते परिस्त्रुतं सोमं सूर्यस्य दुहिता । वारेणशश्वतातना ॥६॥
तमीमण्वीः समर्य आगृभ्णंति योषणोदश । स्वसारः पार्येदिवि ॥७॥
तमीं हिन्वत्यग्रुवो धमंति बाकुरं दृतिम् । त्रिधातु वारणं मधु ॥८॥
अभी ममघ्न्याउत श्रीणंति धेनवः शिशुम् । सोममिन्द्राय पातवे ॥९॥
अस्येदिन्द्रो मदेष्वा विष्वा वृत्राणि जिघ्नते । शूरोमघा च मंहते ॥१०॥
पवस्वदेव वीरति पवित्रं सोमंरह्या । इंद्रमिन्दो वृषाविश ॥११॥
आवच्यस्व महिप्सरो वृषेन्दोद्युम्न वत्तमः ।आयोनिन्धर्णसिः सदः ॥१२॥
अधुक्षत प्रिय मधुधारा सुतस्य वेधसः । अपोवसिष्ट सुक्रतुः ॥१३॥
महान्तंत्वा महीरन्वापो अर्षंति सिन्धवः । यद्गोभिर्वासयिष्यसे ॥१४॥
समुद्रो अप्सुमामृजे विष्टभो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥१५॥
अचिक्रदद् वृषा हर्रि महान्मित्रो न दर्शतः । सं सूर्येण रोचते ॥१६॥
गिरस्त इन्द ओज सामः मृर्ज्यंते अपस्युवः । याभिर्मदाय शुंभसे ॥१७॥
तं त्वा मदाय घृष्वय उलोक कृत्नुमीमहे । तव प्रशस्तयो महीः ॥१८॥
अस्मम्यमिन्दविन्द्रयुर्मध्वः पवस्वधारया । पर्जन्यो वृष्टि माँ इव ॥१९॥
गोषा इंदोनृषा अस्यश्वसा वाजसा उत । आत्मायज्ञस्य पूर्व्यः ॥२०॥
एष देवो अमर्त्यः पर्णवीरिवदीयति । अभिद्रोणान्या सदम् ॥२१॥
एष देवो विपा कृतोतिह्वरांसि धावति । पवमानो अदभ्यः ॥२२॥
एष देवो विपन्युभिः पवमान ऋतायुभिः । हरिर्वाजायमृज्यते ॥२३॥
एष विश्वानिवार्या शूरायेनिवसत्वभिः । पवमानः सिषासति ॥२४॥
एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुम् ॥२५॥
एष विप्रैरभिष्टुतो पो देवो विगाहते । दधद्रत्नानि दाशुषे ॥२६॥
एष दिवं विधावतितिरोरजांसि धारया । पवमानः कनिक्रदत् ॥२७॥
एष दिवं व्यासरत्तिरोरजांस्य स्पृतः । पवमानः स्वध्वरः ॥२८॥
एष प्रत्नेन जन्मना देवो देवेभ्यः सुत । हरिः पवित्रे अर्षति ॥२९॥
एष उस्य पुरुव्रतोजज्ञा नो जनयन्निषः । धारयापवते सुतः ॥३०॥

॥इति ऋग्वेदोक्त पावमानसूक्तम् ॥

अथ शांतिसूक्तम्

ॐ शं नऽइंद्राग्नी भवतामवोभिः, शं नऽइंद्रा वरुणा रातहव्या ।
शमिंद्रा सोमा सुविताय शं योः शन्न इंद्रा पूषणा वाजसातौ ॥१॥
शं नो भगः शमुनः शं सो अस्तु शं नः, पुरंधिः शमु संतुराय ।
शं न सत्यस्य सुयमस्य शं सः, शं नो अर्यमा पुरुजातोऽअस्तु ॥२॥
शन्नोधाता शमुधर्तानो अस्तु शं न, उरूची भवतु स्वधाभिः ।
शं रोदसी बृहति शन्नो अद्रिः, शं नो देवानां सुहवानि संतु ॥३॥
शं नोऽअग्नि ज्योतिरनीकोऽअस्तु, शंनो मित्रा वरुणावश्विनाशम् ।
शं नः सुकृता सुकृतानि संतु शंनऽइषिरो अभिवातुवातः ॥४॥
शं नो द्यावा पृथिवी पूर्वहूतौ शमन्तरिक्षं दृशयेनोऽअस्तु ।
शंनः ओषधीर्वनिनो भवन्तु शंनो रजसस्पति-रस्तुजिष्णुः ॥५॥
शंनः इंद्रो वसुभिर्देवोऽअस्तु, शमादित्येभिर्वरुणः सुशंसः ।
शंनो रुद्रो रुद्रेभिर्जलाषः, शंनस्त्वष्टाग्नाभि-रिहशृणोतु ॥६॥
शंनः सोमो भवतु ब्रह्म शंनः, शंनोग्रावाणः शमुसन्तु यज्ञाः ।
शंनः स्वरुणां मितयो भवन्तु शंनः प्रस्वः ठ शम्वस्तुवेदिः ॥७॥
शंनः सूर्य उरुचक्षा उदेतु शनश्चतस्त्रः प्रदिशो भवंतु ।
शंनः पर्वताध्रुवयो भवन्तु शंनः, सिंधव शमुसन्त्वापः ॥८॥
शन्नोऽअदितिर्भवतु व्रतेभिश्शंनो, भवंतु मरुतः स्वर्काः ।
शंनो विष्णुः शमुपूषानो अस्तु, शंनो भवित्रं शम्वस्तु वायुः ॥९॥
शंनोदेवः सविताञायमाणः, शंनोभवंतूषसो विभातीः ।
शंनः पर्जन्यो भवतु प्रजाभ्यः शंनः क्षेत्रस्यपतिरस्तिशंभुः ॥१०॥
शंनो देवा विश्वदेवा भवन्तु, शं सरस्वती सहधीभि-रस्तु ।
शमभिषाचः शमुरातिषाचः, शंनोदिव्याः पार्थिवाः शंनोऽअप्याः ॥११॥
शंनः सत्यस्य पतयो भवन्तु, शंनो अर्वन्तः शमुसन्तुगावः ।
शंनः ऋभवः सुकृतः सुहस्ताः शंनो भवन्तु पितरो हवेषु ॥१२॥
शंनोऽअजएकपाद्देवो अस्तु, शंनोहिर्बुध्न्यः शंसमुद्रः ।
शंनोऽअपांनपात्पेरु- रस्तुशंनः, पृश्निर्भवतु देवगोपा ॥१३॥

आदित्या रुद्रा वसवो जुषंतेदं, ब्रह्म क्रियमाणं नवीयः ।
श्रृण्वंतुनो दिव्याः पार्थिवासो, गोजाता उतये यज्ञियासः ॥१४॥
ये देवानां यज्ञिया यज्ञियानां-मनोर्यत्रा अमृता ऋतज्ञाः ।
तेनोरासंतामुरुगाय-मद्ययूयं, पातस्वस्तिभिः सदानः ॥१५॥

॥इति शांति सूक्तम॥

अथ सुमंगलसूक्तम्

पृष्ठ संख्या ६८ पर देखे।

अथ रक्षोघ्नसूक्तम्

ॐ कृणुष्वपाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ २ इभेन ।
तृष्वीमनु प्रसितिंदूणानोऽस्तासि विद्धय रक्षसस्तपिष्ठैः ॥१॥
तव भ्रभास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
त पूंष्यग्ने जुह्वा पतगङ्गान संदितो विसृज विश्वगुल्काः ॥२॥
प्रतिस्पशो विसृज तूर्णितमो भवापायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशं सो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥३॥
उदग्नेतिष्ठ प्रत्या तनुष्वन्य मित्राँ ओषता त्तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तंधक्ष्यत संनशुष्कम् ॥४॥
उर्ध्वो भवप्रति विद्धयाद्यस्मदा विष्कृणुष्व दैव्यान्यग्ने ।
अवस्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥५॥

॥इति रक्षोघसूक्तम्॥

अथ पुरुष सूक्तम्

ॐ सहस्त्रशीर्षापुरुष सहस्त्राक्षः सहस्त्रपात् ।
सभूमिं ठं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम् ॥१॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्ने नाति रोहति ॥२॥
एतावानस्य महिमा तो ज्यायाँश्च पूरुषः ।
पादोस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि ॥३॥
त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहा भवत्पुनः ।

ततो विष्वङ् व्यक्रामत्सा शना नशनेऽअभि ॥४॥
तस्माद्विराड जायत विराजो अधिपूरुषः ।
सजातो अत्यरिच्यत पश्चाद् भूमिमथोपुरः ॥५॥
यत्पुरुषेण हविषा देवायज्ञ मतन्वत ।
वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६॥
तं यज्ञं वर्हिषि प्रोक्षन्पुरुषं जातमग्रतः ।
तेन देवाऽअयजंत साध्याऋषयश्चये ॥७॥
तस्माद्यज्ञात्सर्वहुतः संभृतंपृषदाज्यम् ।
पशून्तांश्चक्रे वायव्या-नारण्यान्ग्राम्याश्चये ॥८॥
तस्माद्य-ज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छंदासि ठं जज्ञिरे तस्माद्य जुस्तस्मादजायत ॥९॥
तस्मादश्वा ऽअजायंत येके चोभयादतः ।
गावोहजज्ञिरे तस्मात्तस्मा-ज्जाता अजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधाव्य कल्पयन् ।
मुखं किमस्य कौ (किं) बाहू का उरू पादा उच्येते ॥११॥
ब्राह्मणोस्य मुखमासीद बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत ॥१२॥
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
मुखादिन्द्रश्च अग्निश्च प्राणाद् वायुरजायत ॥१३॥
नाभ्या आसीदन्तरिक्षं ठं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ॥१४॥
सप्तास्या सन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञं तन्वानाऽअबध्नन्पुरुषं पशुम् ॥१५॥
यज्ञेन यज्ञमय जंत देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥१६॥

॥इति पौरुषसूक्तम्॥

अथ वामदेवसूक्तम्

ॐ कयानश्चित्र आभुवदूती सदावृधः सखा । कयाचिष्ठया वृता ॥१॥

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः ।दृळहाचिदारूजेवसुम ॥२॥
अभीषुणः सखीनामविता जारितृणाम् । शतं भवास्यूतिभिः ॥३॥
अमीन आव वृत्स्व चक्रं न वृत्तमर्वतः । नियुद्भिश्चर्षणीनाम् ॥४॥
प्रवताहि क्रतुना माहाप देव गच्छसि । अभक्षि सूर्ये स चा ॥५॥
संयत्त इंद्र मन्यवः सं चक्राणि दधन्विरे । अधत्वे अध सूर्ये ॥६॥
उतस्मा वित्वा मा हुरिं मघवानं शचीपते ।दातार माविदीधयुम् ॥७॥
उतस्मा सद्य इत्परिश शमानाय सुन्वते । पुरुचिं मंहसे वसु ॥८॥
न हिष्माते शतं च नराधोवरन्त आमुरः । नच्यौत्नानि करिष्यतः ॥९॥
अस्माँ अवन्तुते शतमस्मान् सहस्त्र मूर्तयः ।अस्मान्विश्वा अभिष्टय ॥१०॥
अस्माँ इहा वृणीष्व सख्याय स्वस्तये । महोगये दिवित्मते ॥११॥
अस्माँअविढि विश्वेहेन्द्रराया परीणसा ।अस्मान्विश्वाभिरूतिभिः ॥१२॥
अस्मभ्य ताँ अपावृधि व्रजाँ अस्तेवगोमतः । नवाभिरिंदोतिभिः ॥१३॥
अस्माकं धृष्णु या रथो द्युमाँ इंद्रान पच्युतः । गव्युरश्वयुरीयते ॥१४॥
अस्माकमुत्तमं कृधिश्रवो देवेषु सूर्य । वर्षिष्ठं द्यामिवोपरि ॥१५॥

अथ रौद्रसूक्तम्

ॐ इमारुद्रायतवसेकपर्दिने क्षयद्वीराय प्रभरामहेमतीः ।
यथा शम स द्विपदे शं चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम् ॥१॥
मृडानो रुद्रोतनो मयस्कृधिक्षय द्वीराय न मसाविधेमते ।
यच्छं च योश्चमनु रायजे पितातदश्याम तवरुद्र प्रणीतिषु ॥२॥
अश्यामते सुमतिं देवयज्यया क्षयद्वीरस्य तवरुद्रमीढ्वः ।
सुम्नायं निद्विशोऽअस्माकमाचरारिष्टवीरा जुहवामतेहविः ॥३॥
त्वेषं वयं रुद्रं यज्ञसाधवं कुंकवि मवसे निह्वयामहे ।
आरे अस्मद्दैव्यं हेडो अस्यसुमतिमिद्वय मस्या वृणीमहे ॥४॥
दिवो वराह मरुषं कपर्दिन त्वेषं रूपं नमसानि ह्वयामहे ।
हस्ते बिभ्रद्भेष जावा र्याणि शर्म वर्मच्छर्दि-रस्मभ्यं यंसत् ॥५॥

इदं पित्रे मरुता मुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वाचनोऽमृतमर्त भोजनंत्मने तोकाय तनयायमृड ॥६॥

मानो महन्त मुतमानोऽर्भकंमानऽउक्षन्त मुतमान ऽउक्षितम् ।
मानोवधीः पितरं मोतमातरंमानः प्रियास्तन्वो रुद्ररीरिषः ॥७॥

मानस्तोक तनयेमान आयुषिमानो गोषुमानो अश्वेषुरीरिषः ।
वीरान्मानो रुद्रभामितो वधीर्हविष्मंतः सदमित्त्वा हवामहे ॥८॥

उपतेस्तोमान्पशुपा इवाकरं रास्वापितरर्मरुतां सुम्नमस्मे ।
भद्राहिते सुमतिर्मृड यत्तमाथा वयम व इत्ते वृणीमहे ॥९॥

आरेते गोघ्न मुत पूरुषघ्नं क्षय द्वीराय सुम्नस्मेतेऽअस्तु ।
मृडाचनो अधि च ब्रूहि देवा धाचनः शर्मयच्छ-द्विबर्हाः ॥१०॥

अवो चायनमोऽअस्मा अवस्यवः श्रृणोतुनोहवं रुद्रोमरुत्वान् ।
तन्नो मित्रो वरुणो मामहंता मदितिः सिन्धुः पृथिवी उतद्यौः ॥११॥

॥इति रुद्रसूक्तम्॥

अथ सोमसूक्तम्

ॐ त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठ मनुनेषि पंथाम् ।
तव प्रणीती पितरो न इंदो देवेषु रत्नमभजन्तधीराः ॥१॥

त्वं सोम क्रतुभिः सुक्रतुः भूस्त्वं दक्षैः सदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिः महित्वा द्युम्नेभिर्द्युन्यभवो नृचक्षाः ॥२॥

राज्ञोनुते वरुणस्य व्रतानि बृहद्गभीरन्तव सोमधाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षायो अर्यमेवासि सोम ॥३॥

याते धामानि दिविया पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रतिहव्या गृभाय ॥४॥

त्वं सोमासि सत्पति स्त्वंराजोत वृत्रहा । त्वं भद्रो असिक्रतुः ॥५॥

त्वं च सोम नो वशो जीवातुंनमरामहे । प्रियस्तोत्रो वनस्पतिः ॥६॥

त्वं सोम महे भगं त्वं यू न ऋतायते । दक्षं दधासि जीवसे ॥७॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्वावतः सखा ॥८॥

सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे । ताभिर्नोविताभव ॥९॥
इमं यज्ञ मिदं वचो जुषाण उपागहि । सोम त्वं नो वृधे भव ॥१०॥
सोम गीर्भिष्ट्वा वयं वर्धया मो वचो विदः । सुमृडीको न अविश ॥११॥
गयस्फानो अमीवहा वसु वित्पुष्टिवर्धनः । सुमित्रः सोम नो भव ॥१२॥
सोम रारंधि नो हृदि गावो न यवसेष्वा । मर्यइबस्व ओक्ये ॥१३॥
यः सोम सख्ये तव रारणद्देव मर्त्यः । तं दक्षः सचतेकविः ॥१४॥
ऊरुष्याणो अभिशस्तेः सोम निपाह्यं हसः । सखा सुशेव एधि नः ॥१५॥
आप्यायस्व स म तु ते विश्वतः सोमवृष्ण्यम् । भवा वजस्य संगथे ॥१६॥
आप्यायस्व मदिन्तम सोमविश्वेभिरंशुभिः । भवानः सुश्रव स्तमः सखावृधे ॥१७॥
सन्ते पयांसि समुयन्तु वाजाः संवृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानिधिष्व ॥१८॥
या ते धामानि हविषाय जान्तिताते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरो वीरहा प्रचरा सोम दुर्यान् ॥१९॥
सोमो धेनुं सोमो अर्वन्तमाशुं सोमा वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृ श्रवणं योददाश-दस्मै ॥२०॥
अषाळ हं युत्सु पृतना सुपप्रिंस्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषु जांसुक्षितिं सुश्रव सं जयन्तं त्वामनुमदेम सोम ॥२१॥
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वङ्गाः ।
त्वमात तन्थोर्वन्तरिक्षं त्वं ज्योतिषावि तमोववर्थ ॥२२॥
देवेन नो मनसा देव सोमरायो भागं सहसा वनभियुध्य ।
मा त्वात नदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्साग विष्टौ ॥२३॥

अथ इंद्रसूक्तम्

यो जात एव प्रथमो मनस्वान्देवो देवान् क्रतुनापर्य भूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्वासजना स इंद्रः ॥१॥
यः पृथिवी व्यधमाना मदृंहद्यः पर्वतां प्रकुपिताँ अरम्णात् ।
यो अंतरिक्षं विममेवरीयो यो द्यामस्तभ्नात् स जना स इंद्रः ॥२॥

यो हत्वाहिमरिणात्सुप्त सिंधून्योगा उदाजदष धावलस्य ।
यो अश्म नो रन्तरग्निं जजान सं वृक्समत्सु स जना स इंद्र ॥३॥
येने मा विश्वाच्यवना कृतानि योदा संवर्ण मधरङ्गुहाकः ।
श्वघ्नी वयोजिगीवाँ लक्षमाददुर्यः पुष्टानि स जना स इंद्रः ॥४॥
यस्मां पृच्छन्ति कुइसेति घोरयुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टिर्विज इवामिनाति श्रदस्मै धत्त स जना स इंद्रः ॥५॥
यो रंध्रस्य चोदितायः कृशस्य यो ब्रह्मणोना धवानस्य कीरेः ।
युक्त ग्राव्णोयोषिता सु शिप्रः सुतः सोमस्य स जना स इंद्रः ॥६॥
यस्या श्वासः प्रदिशि यस्य गावो यस्य ग्रामायस्य विश्वेरथा सः ।
यः सूर्य य उष सं जजानयो ऽपां नेता स जना स इंद्रः ॥७॥
यं क्रंदसी संयती विह्वये ते परेवर उभया अमित्राः ।
समानं चिद्रथ मातस्थिवां मानाना हवेते स जना स इंद्रः ॥८॥
यस्मान्ननऋते विजयन्ते जनासोयं युद्धयमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूवयो अच्युतच्युत् स जना स इंद्रः ॥९॥
यः शश्वतो मह्येनो दधाना न मन्यमानाञ्छर्वा जघान ।
य शर्धतेनानु ददाति शृध्यां यो दस्यो र्हता स जना स इंद्रः ॥१०॥
य शंबरं पर्वतेषु क्षियन्तं चत्वारिश्यां शरद्यन्व विदंत् ।
ओ जायमानं यो अर्हि जघान दानुंशया न स जना स इंद्रः ॥११॥
यः सप्त रश्मिः वृषभस्तु विष्मान वा सृजत् सर्वते सप्त सिंधून् ।
यो रौहिणमस्फुरद् वज्रबाहु र्द्यामारोहन्तं स जना स इंद्रः ॥१२॥
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्र बाहुयो वज्र हस्तः स जना स इंद्रः ॥१३॥
यः सन्वन्तमवतियः पंचतंयः शं सन्तंयः शशमानमूती ।
यस्य ब्रह्मवर्धनं यस्य सोमो यस्येदंराधः स जना स इंद्रः ॥१४॥
यः सुन्वते पचते दुध्र आचिद्वाजं दर्दर्षि सकिलासि सत्यः ।
वयन्त इंद्र विश्वहा प्रियासः सुवीरा सो विदथ मा वदेम ॥१५॥

।। अथ यजुर्वेद सूक्तानि ।।

दक्षिण द्वारपाल वरणं :-

कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णु दैवतः ।
काश्यपेयस्तु विपेन्द्र ऋत्विक्त्वं मे मखे भव ॥

शाक्रसूक्तम्

ॐ आशुः शिशानो वृषभो नभीमो घनाघनः क्षोभणीश्चर्षणीनाम् ।
सङ्क्रन्दनो निमिषऽएकवीरः शत ठं सेना अजयत्साकमिन्द्रः ॥१॥

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्त्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्स हध्वं यधोनरऽइषुहस्तेन वृष्णा ॥२॥

सऽइषु हस्तैः सनिषङ्गिभिर्वशीस ठं स्त्रष्टासयुधऽइंद्रोगणेन ।
स ठं सृष्टजित्त्सोमपा बाहुशर्द्ध्युग्र धन्वा प्रतिहिताभिरस्ता ॥३॥

बृहस्पते परिदीया रथेन रक्षोहामित्राँ२ ऽअपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माक मेद्ध्यविता रथानाम् ॥४॥

बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजी सहमानऽउग्रः ।
अभिवीरोऽअभिसत्त्वा सहोजा जैत्रमिन्द्र रथ मातिष्ठ गोवित् ॥५॥

गोत्रभिदङ्ग गोविदं वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाताऽअनुवीर यद्ध्वरमिंदँ सखायो अनुसँ रभध्वम् ॥६॥

अभिगोत्राणि सहमागाहमानोदयो वीरः शतमन्न्युरिन्द्रः ।
दुश्च्च्यवनः पृतनाषाड युद्ध्योस्माकं सेनाऽअवतु प्रयत्सु ॥७॥

इंद्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ।
देवसेना नामभि भञ्जतीनाञ्जयंती नाम्मरुतो यन्त्वग्ग्रम् ॥८॥

इंद्रस्य वृष्णो वरुणस्य राज्ञऽआदित्त्यानाम्मरुताँ शर्द्धऽउग्ग्रम् ।
महामनसाम्भुवनच्च्य वानाङ्घोषो देवानाञ्जयता मुदस्थात् ॥९॥

उद्धर्षय मघवन्नायुधान्युत्त्सत्त्व नाम्मामकानाम्मना ꣳ सि ।
उद्वृत्र हन्नवाजिनां वाजिनान्न्युद्रथानाञ्जयताँ यन्तुघोषाः ॥१०॥

अस्माकमिन्द्रः समृतेषुध्वजेष्वस्माकं याऽइषवस्ता जयन्तु ।

अस्माकं वीराऽउत्तरे भवन्त्वस्माँ२ऽउदेवाऽ अवताहवेषु ॥११॥
अमीषां चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभिप्रेहि निर्दहहृत्सु शोकैरन्धेना मित्रास्तमसा सचन्ताम् ॥१२॥
अवसृष्टा परापतशरव्ये ब्रह्मस ठ शिते ।
गच्छामित्रान्प्रपद्य स्वमामीषाङ्कञ्चनोच्छिषः ॥१३॥
प्रेताजायता नरऽइंद्रोवः शर्मयच्छतु ।
उग्रावः सन्तु बाहवो ना धृष्ण्या यथा सथ ॥१४॥
असौयासेना मरुतः पेरषामभ्यैतिनऽओजसा स्पर्द्धमाना ।
ताङ्गूहत तमसाप व्रतेन यथामीऽअन्योऽ अन्यन्न जानन् ॥१५॥
यत्र वाणाः सम्पतन्ति कुमारा विशिखाऽइव ।
तन्नऽइंद्रो बृहस्पति-रदितिः शर्म्म यच्छतु विश्वाहा शर्मयच्छतु ॥१६॥
मर्म्माणि ते वर्म्मणाच्छादयामि सोमस्त्वा राजामृते नानुवस्ताम् ।
उरोर्वरीयो र्वरुणस्ते कृगोतु जयन्त्वानुदेवामदन्तु ॥१७॥

॥इति शाक्रं सूक्तम्॥

रौद्रसूक्तम्

इमा रुद्राय तवसे कपर्दिने क्षय द्वीराय प्रभरा महेमतीः ।
यथा शम सद्विपदेचतुष्पदे विश्वं पुष्टङ्ग्रामेअस्मिन्ननातुरम् ॥१॥
या ते रुद्र शिवातनूः शिवा विश्वाहा भेषजी ।
शिवारूतस्यभेषजी तयानो मृड जीवसे ॥२॥
परिणो रूदस्य हेति वृणक्तु परिस्त्वेषस्य दुर्मतिरघायोः ।
अवस्थिरा मघवभ्द्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥३॥
मीढुष्टम शिवतम शिवोनः सुमना भव । परमेवृक्ष
आयुधं निधाय कृतिंवसान आचर पिनाकम्बिभ्रदागहि ॥४॥
विकिरिद्र विलोहित नमस्ते ऽअस्तु भगवः ।
यास्त सहस्त्र हेतयोन्यमस्मान्निव पन्तुताः ॥५॥
सहस्त्राणि सहस्त्र शो बाव्होस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखकृधि

अथ कौष्माण्डसूक्तम्

(रजस्वला आदि अशौच निवृत्ति हेतु धृत आहुति एवं बलि प्रदान समये कूष्माण्डादि व घृतद्वारा एवं यथा लोकाचारानुसारेण)

ॐ यद्देवा देवहेड नन्देवा सश्चकृमा वयम् ।
अग्निर्म्मातस्मादेन सो विश्वान्मुञ्चत्व ठं हसः ॥१॥
यदि दिवाय दिनक्तमेना ठं सि चकृमावयम् ।
वायुर्मातस्मादेन सो विश्वान्मुञ्चत्व ठं हसः ॥२॥
यदि जाग्रद्यदि स्वप्न ऽएना ठं सि च कृमा वयम् ।
सूर्यो मातस्मादेन सो त्रिश्वान् मुञ्चत्त्व ठं हसः ॥३॥
यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि ।
धर्मणि तस्याव यजनमसि ॥४॥

॥इति कौष्माण्डसूक्तम्॥

जातवेदसूक्तम्

ॐ समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयोयानि सत्या ।
सं दिव्येन दीदिहरोचने न विश्वा आभाहि प्रदिशश्चतस्त्रः ॥१॥
सं चेध्यस्वाग्ने ऽचबोधयै नमुच्च तिष्ठ महते सौभगाय ।
माचरिष दुपसत्तात अग्ने ब्रह्माणस्ते यशसः सन्तुमान्येः ॥२॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवानः ।
सपत्नहा नो अभिमाति जिच्चस्वेगये जागृह्य प्रयुच्छन् ॥३॥
इहैवाग्ने अधिधारया रयिं मात्वा निक्रन्पूर्व चितोनि कारिण ठं क्षत्रमग्ने ।
सुयममस्तु तुभ्यमुपसत्ता वर्धतांते अनिष्टतः ॥४॥
क्षेत्रेणाग्ने स्वायुः स ठं रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्योदीदिहीह ॥५॥
अतिनिहो अतिस्त्रधोत्य चित्तिनत्यराति मग्ने ।
विश्वाह्यग्ने दुरिता सहस्वाथास्मभ्य ठं सहवीरां ठं रयिंदाः ॥६॥
अनाधृष्यो जातवेदा. अनिष्टतो विराडग्ने क्षत्रभृद्दीदिहीह ।

विश्वाआशाः प्रमुञ्चं मानुषीभिर्यः शिवेभिरद्य परिपाहि नो वृधे ॥७॥
बृहस्पते सवितः बोधयैन ठं सठ शितं चित्संतरा ७ स ठं शिशाधि ।
बुर्धयैनं महते सौभगाय विश्व एन मनु मदन्तु देवाः ॥८॥
अमुत्र भूयादध यद्यमस्य बृहस्पते अभि शं स्तेरमुञ्चः ।
प्रत्यौहता - मश्विनामृत्यु - मस्माद्देवानामग्नेभिषजा शचीभिः ॥९॥
उद्वयं तमसस्परिस्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म - ज्योतिरुत्तमम् ॥१०॥

अथ सौरसूक्तम्

बिभ्राड् बृहत्पिबतु सोम्यं मद्धायुर्द्दधद्यज्ञ - पतावविंहुतम् ।
वातजूतोया अभिरक्षतिक्तमना प्रज्ञाः पुपोष पुरुधा विराजति ॥१॥
उदुत्यञ्जातवेद सं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥२॥
येना पावक चक्षसा- भुरण्यन्तञ्जनाँ अनु । त्वं वरुण पश्यसि ॥३॥
देव्या वध्वर्यू आगत ७ रथेन सूर्य त्वचा । मध्वा यज्ञँ समञ्जाथे ।
तं प्रत्कथायं वेनश्चित्रं देवानाम् ॥४॥ आन इडाभि र्विदथे
सुशस्ति विश्वानरः सवितः देव एतु । अपियथा युवानो
मत्सथानो विश्वञ्जगदभि पित्वे मनीषा ॥५॥
यदद्यचकच्चत्रहवृन्नदगा अभिसूर्य । सर्वन्तदिन्द्रते वशे ॥६॥
तरणी र्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम् ॥७॥
तत्सूर्यस्य देवत्वन्तं महित्वं मद्धया कर्तो र्वितत सञ्जभार ।
यदेद युक्तहरितः सधस्था दाद्रात्री वासस्तनुतेसि मस्मै ॥८॥
तन्मित्रस्य वरुणस्याभि चक्षे सूर्योरूपङ्कृणुते द्यौरूपस्थे ।
अनन्त मन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरंति ॥९॥
बणमहाँ २ असि सूर्य बड़ादित्य महाँ २ असि ।
महस्ते सतोमहिमापनस्यतेद्धा देव महाँ २ असि ॥१०॥
बट् सूर्य श्रवसा महाँ २ असि सत्रादेव महाँ २ असि ।
मह्वादेवानाम सूर्यः पुरोहितो विभुज्योतिरदाभ्यम् ॥११॥

श्रायन्त ऽइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रतिभागन्नदीधिम ॥१२॥
अद्यादेवा उदिता सूर्यस्य निरठंहसः पिपृतानिरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्ता-मादितिः सिन्धुः पृथिवीः उतद्योः ॥१३॥
आकृष्णेन रजसा वर्त्तमानो निवेशन्नमृतं मर्त्त्यञ्च ।
हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन् ॥१४॥

अथ पावमानसूक्तम्

(पवित्रिकरण एवं दुग्धधारा तथा शांति पाठ हेतु)

ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥१॥ अग्नः आयूंषि पवस आयुवोर्जमिषंचनः । आरेबाधस्वदुच्छुनाम् ॥२॥ पुनन्तु मा देवजनाः पुनन्तु मनसाधियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥३॥ पवित्रेण पुनीहिमा शुक्रेण देव दीद्यत् । अग्नेक्रत्वा क्रतूँरनु ॥४॥ यत्ते पवित्र मर्चिष्यग्ने वितत मंतरा । ब्रह्म तेन पुनातु मा ॥५॥ पवमानः सो अद्य नः प्रवित्रेण विचर्षणिः । यः पोता सः पुनातु मा ॥६॥ उभाब्भ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥७॥ वैश्वदेवी पुनती देव्या गाद्यस्यामिमा बह्व्यस्तन्वा वीतपृष्ठाः । तयामदन्तः सधमा देषुवय ठं स्याम पतयो रयीणाम् ॥८॥

॥ इति पावमान सूक्तम् ॥

भद्रसूक्तम्

पृष्ठ संख्या ५३ पर है ।

शांतिसूक्तम्

पृष्ठ संख्या ५०५ पर है ।

अथ पौरुषसूक्तम्

हरिः ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षःसहस्त्रपात् ॥ सभूमि ठुं सर्व्व [illegible] ऽतिष्ठद्दशांगुलम् ॥ १ ॥ पुरुषऽएवेद ठुं सर्वं व्यद्भूतं यच्च

भाव्व्यम् ॥ उतामृतत्वस्येशानो यदन्ने नातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्यायाँश्च पूरुषः ॥ पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्ये-हाभवत्पुनः॥ ततोव्विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥ ४॥ ततो व्विराडजायत व्विराजो अधिपूरुषः॥ स जातोऽअत्यरिच्च्यत पश्चाद्भूमिमथो पुरः ॥ ५॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्ज्यम् ॥ पशूँ स्ताँश्चक्रे वायव्व्या नारण्या ग्राम्म्याश्च ये ॥ ६ ॥ तस्माद्य-ज्ञात्सर्व्वहुतःऋचःसामानि जज्ञिरे॥ छन्दाᳬसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥ तस्मादश्वाऽअजायन्त ये केचोभयादतः॥ गावोह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः॥ ८॥ तंय्यज्ञम्बर्हिषि प्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥ ९॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखङ्किम-स्यासीत्किम्बाहू किमूरूपादाउच्येते ॥ १०॥ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यार्ठ शूद्रो ऽअजायत ॥ ११॥ चंद्रमा मनसो जातश्चक्षोः सूर्योऽअजायत॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥ १२ ॥ नाब्भ्याऽआसीदन्तरिक्षर्ठुं शीर्ष्णोद्यौः समवर्त्तत॥ पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ२ अकल्पयन् ॥ १३॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत॥ वसन्तोऽस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥ १४॥ सप्तास्या-सन्परिधयस्त्रिः सप्त समिधः कृताः॥ देवा यद्यज्ञन्तन्वा नाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्॥ ते ह नाकम्महिमानः सचन्तः यत्र पूर्वे साद्ध्याः सन्ति देवाः ॥ १६ ॥

॥ अथ सामवेद सूक्तानि ॥

पश्चिम द्वारपाल वरणम् :-

सामवेदस्तु पिङ्गाक्षो जगतः शक्रदैवतः ।
भारद्वाजस्तु विपेन्द्र ऋत्विक्त्वं मे मखे भव ॥

वामदेवसूक्तम्

कयानश्चित्र आभुव दूति सदावृधः सखा। कयाशचिष्ठयावृता ॥१॥

कस्त्वा सत्यो-मदानामँ हिष्ठोमत्सदन्धसः। दृढाचिदारुजे वसु ॥२॥

अभीषुणः सखीनाम विताजरि तृणाम्। शतं भवास्यूतये ॥३॥

बृहत्सामसूक्तम्

ॐ त्वामिद्धि हवामहे सा तौ वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्ततः ॥१॥ सत्वं नश्चित्र वज्रहस्त धृष्णुयाम हस्तवा नो अद्रिवः। गोमश्व रथ्यमिन्द्र संकिर सत्रावाजंन जिग्युषे ॥२॥

ज्येष्ठसामसूक्तम्

ॐ मूर्धानं दिवो अरतिं पृथिव्यां वैश्वानरमृत आजातमग्निम्।
कवि ४४ सम्राजमतिथिं जनाना मा सन्ना पात्रं जनयन्त देवाः ॥१॥
त्वां विश्वे अमृत जायमान ४४ शिशुं न देवा अभिसंनवन्ते।
तवक्रतुभिरमृतत्व मायन् वैश्वानर यत्पित्रोरदीदेः ॥२॥
नाभिं यज्ञाना सदनँ रयीणां महामाहावमभि सं नवन्त।
वैश्वानरँ रथ्य मध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥३॥

अथ रथंतरसूक्तम्

अभित्वा शूर नो नुमो दुग्धा इव धेनवः।
ईशानमस्य जगतः स्वर्दृश - मीशानमिन्द्र तस्थुषः ॥१॥
नत्वा वां अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।
अश्वा यन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥२॥
त्वामिद्धि हवामहे सा तौ वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठा स्वर्वतः ॥३॥
अभिप्रवः सुराध समिन्द्र - मर्चयथा विदे।
यो जरितृभ्यो मघवा पुरू वसुः सहस्त्रेणेवशिक्षति ॥४॥
तं वोदस्ममृतीष हं वसो मन्दान - मन्धसः।
अभिवत् संनस्व सरेषु धेनव इंद्रगीर्भि र्नवामहे ॥५॥
तरोर्भिर्वो विदद् वसु-मिन्द्रं सबाध ऊतये।
बृहद् गायन्तः सुत सोमे अध्वरे हुवेभरं न कारिणम् ॥६॥

तरणिरित् सिषा सातिवाजं पुरन्धायुजा ।
आवइंद्र पुरुहूतं नमेगिरा नेमिंतष्टे वसुद्रुवम् ॥७॥
पिबासुतस्य रसिनो मत्स्वान इंद्र गोमतः ।
आपिर्नो बोधि सधमाद्यैर्वृधे स्मां अवन्तुतेधियः ॥८॥
त्वं ꣳ ह्येहि चेरवे विदा भगवसुत्तये ।
उद्वावृषस्व मघवन् गेविष्टय उदिन्द्राश्वभिष्टये ॥९॥
न हिवश्चर मंचन वसिष्ठः परिम ꣳ सते ।
अस्माक मद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥१०॥
मा चिदन्य द्विश ꣳ सत सखायो मा रिषण्यत ।
इन्द्र मित्स्तोता वृषण ꣳ सचासुते मुहुरुक्था च श ꣳ सत ॥११॥

अथ पौरुषसूक्तम्

सहस्त्रशीर्षा. ॥१॥ त्रिपादूर्द्ध. ॥२॥ पुरुष एवेद्. ॥३॥ एतावानस्य. ॥४॥ ततो विराड. ॥५॥ कयानिश्चत्र आभुव ॥६॥

अथ रौद्रसूक्तम्

आ वोराजान मध्वरस्य रुद्र ꣳ होतार ꣳ सत्ययज ꣳ रोदस्योः ।
अग्निं पुरातन यित्नो रचिताद्धिरण्य रूप मवसे कृणुध्वम् ॥१॥
इन्धे राजा समर्यो नामोभि र्यस्य प्रतीक माहुतं घृतेन ।
नरो हव्येभिरीडेत सबाध आग्निरग्र मुष साम शोचि ॥२॥

अथ भारुण्डसूक्तम्

इमं स्तोम मर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्राहि नः प्रमतिरस्य सं सद्यग्रे सख्ये मा रिषा मा वयं तव ॥१॥
मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् ।
कवि ꣳ सम्राज मतिथिं जनाना मा सन्ना पात्रं जनयन्त देवाः ॥२॥
वित्वदापो न पर्वतस्य पृष्ठा दुक्थेभिरग्रे जनयन्त देवाः ।
तं त्वा गिरः सुष्ठुतयो वाजयन्त्या जिन्नगिर्वाहो - जिग्युरश्वा ॥३॥
आवो राजान मध्वरस्य रुद्र होतरं सत्ययजँ रोदस्योः ।

अग्निं पुरातन यित्नो रचिताद्धिरण्यरूप मवसे कृणुध्वम् ॥४॥
इंधे राजा समर्यां नमोभिर्यस्य प्रतीक माहुतं घृतेन ।
नरोहव्यभिरीलते सबाध अग्निरग्रमुष साम शोचि ॥५॥
प्रकेतुना बृहतायात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्ता दुपमामुदान उपामुपस्थे महिषो ववर्द्ध ॥६॥
अग्निं न रोदीधितिभि ररण्यो र्हस्तच्युतं जनयत प्रशस्तम् ।
दूरेदृशं गृहपति मथर्व्युम् ॥७॥

(इत्येषां त्रिधा जपः)

भरामेध्यं कृण वा माहवींषिते चितयन्तः पर्वणा पर्वणावयम् ।
जीवातवे प्रतराँ साधयाधियोऽग्ने सख्ये मारिषामा वयंतव ॥१॥
शकेमत्वा समिधँ साधयाधियस्त्वे देवा हविरदन्त्या हुतम् ।
त्वमादित्याँ आवहतान्ह्यु ऽश्मस्यग्ने सख्येमारिषा मा वयंतव ॥२॥

(इति भारुण्डानि)

अथ वैराजं सूक्तम्

पिबा सोममिन्द्र मदन्तु त्वा यन्ते सुषावहर्य्य श्वाद्रिः सोतुर्बाहुभ्यां सुयतोनार्वा ॥१॥ यस्तेमदोयुज्यश्चारु रस्तिये न वृत्राणि हर्यश्व ह थ्ठ सि । सत्वामिन्द्र प्रभूव सोममत्तु ॥२॥ बोधासु मे मघवन्वाचमे मायाते वसिष्ठो अर्चति प्रशस्तिम् । इमाब्रह्म सधमादे जुषस्व ॥३॥

अथ सौपर्णसूक्तम्

उद्धेदभिश्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥१॥
नवयो नवतिं पुरो बिभेद ब्राह्वोजसा । अहिं च वृत्रहा ऽवधीत् ॥२॥
स न इंद्रः शिवः सखा श्वाव द्गोमद्यवयत् । उरुधारे वदोहते ॥३॥

अथ रक्षोघ्नसूक्तम्

ॐ अग्नेरक्षाणो अंहसः प्रतिस्म देवरीषतः । तपिष्ठैरजरोदह ॥१॥
अग्ने युक्ष्वाहियेतवा श्वासो देव साधवः अरंवहन्त्याशवः ॥२॥

।। अथ अथर्वेदोक्त सूक्तानि ।।

उत्तर दिशां द्वारपाल वरणं

सुवर्ण नयनो ऽथर्वानुष्टपच्छन्दः पुरन्दरः ।
वेदो वैतान गौत्रस्तु ऋत्विक् त्वं मे मखे भव ॥

अथ अंगिरससूक्तम

अङ्गिरसोनः पितरो न वग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषावयं सुमतौ यज्ञिया ना मपि भद्रे सोमनसे स्याम ॥१॥
अंगिरोभि र्यज्ञियै रागहीहय - मवै रूपैरिह मादयस्व ।
विवस्वंतं हुवेयः पिताते ऽस्मिन्बर्हिर्हिष्यां निषद्य ॥२॥
इमं यम प्रस्तरमाहिरोहाङ्गरोभिः पितृभिः सविदानः ।
आत्वा मंत्राः कविशस्ताव हन्त्वेना राजन् हविषो मादयस्व ॥३॥
इत एत उदारुहन्दिव स्पृष्टान्यारुहन ।
प्रभुर्जयो यथा यथा द्यामङ्गिरसो ययुः ॥४॥

अथ नीलरुद्रंसूक्तम

या त रुद्र इषू मास्यदङ्गेभ्यो हृदयाय च ।
इदं ता मद्यत्वद्वयं विषूचीं विवृहामसि ॥१॥
यास्ते शतं धमनयोऽङ्गान्यनुं विष्ठिताः ।
तासां ते सर्वासां वयं निर्विषाणि ह्वयामसि ॥२॥
नमस्ते रुद्रास्य ते नमः प्रतिंहितायै नमो ।
विसृज्यमानायै नमो निपतितायै ॥३॥

अथ अपराजितासूक्तम

परिवर्त्मानि सर्वत इंद्रः पूषा च सस्त्रतु मुह्यन्त्वद्यामूः सेना अभित्राणां परस्तराम् ॥१॥ मूढा अमित्राश्चरता शीर्षाण इवाहयः । तेषां वो अग्रिमूढानामिन्द्रो हन्तु वरं वरम् ॥२॥ एषु न ह्यवृषाजिनं हरिणस्य

भयं कृधि। पराङ्गमित्र एषत्वर्वाची गौरुपेषतु ॥३॥

अथ मधुसूक्तम

ॐ मधुवाता ऋतायते मधुक्षरन्ति सिंधवः ।
माध्वीर्नः संत्वोषधीः । मधुनक्त मुतोषसो मधु,
मत्पार्थिव ठं रजः मधु द्यौरस्तुनः पिता ॥१॥
ॐ मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्य ।
माध्वीर्गावो भवन्तु नः ॥२॥
ॐ स्वाहा मरुद्भिः परिश्रीयस्व दिव,
स ठं स्पृशस्पाहि मधु मधु मधु ॥३॥

अथ रोधसं सूक्तम्

ॐ अभयं द्यावा पृथिवी इहास्तु नो ऽभयं सोमः सविता नः कृणोतु । अभयं नो ऽस्तूर्वन्तरिक्षं सप्तऋषीणां च हवषा ऽभयं नो अस्तु ॥१॥ अस्मै ग्रामाय प्रदिशश्चतस्त्र ऊर्जं संभूतं स्वस्ति सविता नः कृणोतु । असाविन्द्रो अभयं नः कृणोत्वन्यत्र राज्ञामभियातु मन्युः ॥२॥ अनमित्रं नो अधरादनमित्रं न उत्तरात् । इंद्रा न मित्र नः पश्चादनमित्रं पुरस्कृधि ॥३॥

रक्षोघ्नसूक्तम्

(कृत्या निवारक)

ॐ रक्षोहणं वलगहनं वैष्णवी मिदमहन्तं वलगमुत्किरामि ।
यम्मे निष्ट्यो यममात्यो निचखानेद महन्तं वलगमुत्किरामि ।
यम्मे समानो यम समानो निचखानेद महन्तं वलगमुत्किरामि ।
यम्मे सबंधु र्यम सबंधु र्निचखानेद महन्तं वलगमुत्किरामि ।
यम्मे सजातो यम सजातो निचखानोत् कृत्याङ्किरामि ॥१॥

रक्षोहणो वो वल गहनः प्रोक्षामि वैष्णवान रक्षोहणो वो वलगहनो व नयामि वैष्णवान् रक्षोहणो वो वलगहनो व स्तृणामि वैष्णवान् रक्षोहणौ वां वलगहना उपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ

पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्त्थ ॥२॥

रक्षेसां भागोसि निरस्त ठे रक्ष इदमह ठे रक्षोभितिष्ठामीदमह ठे रक्षो व बाध इदमह ठे रक्षो धमन्तमो नयामि । घृतेनद्यावा पृथिवी प्रोर्णु वाथां वायो वेस्तोकानामग्नि राज्यस्य वेतु स्वाहा । स्वाहाकृते ऊर्ध्वनभ समारुतङ्गच्छतम् ॥३॥

रक्षोहा विश्वचर्षणि रभि योनि मयोहते । द्रोणे सधस्त्थमासदत् ॥४॥

अथ युञ्जान सूक्तम्

रजस्वला अशौचादि निवृत्ति हेतु युञ्जानसूक्त व श्रीसूक्त से होम करे।

ॐ युञ्जानः प्रथमम्मनस्तत्त्वाय सविताधियः ।अग्ने ज्योंतिर्न्निचाय्य पृथिव्या ऽ अद्ध्या भरत्स्वाहा ॥१। युञ्जतेमन ऽउतयुञ्जतेधियो विप्रा विप्रस्य बृहस्तो विपश्चितः । विहोत्रा दधे वयुना विदेक ऽइन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥२॥ ॐ युञ्जन्ति ब्रह्ममरुषं तरन्तं परिस्थुषः रोचन्ते रोचनादिवि । युञ्जन्त्यस्य काम्या हरी विपक्ष सारथे शोणा घृष्णु नृवाहसा ॥३॥

अथ पौरुषसूक्तम्

सहस्त्र बाहुः पुरुषः सहस्त्राक्षः सहस्त्रपात् ।
स भूमिं विश्वतो वृत्वात्त्य तिष्ठ द्दशाङ्गुलम् ॥१॥
त्रिभिः पद्भि र्द्यामरोहत् पादोस्येहा भवत्पुनः ।
तथा व्यक्रामद्विष्वङ् शनानशने अनु ॥२॥
ता वन्तो अस्य महिमान स्ततो ज्यायांश्च पूरुषः ।
पादोस्य विश्वाभूतानि त्रिपादास्यामृतन्दिवि ॥३॥
पुरुषं एवेदं सर्वं यद्भूतं यच्चा भाव्यम् ।
उतामृतत्वस्ये - श्वरोयदन्ये नाभवत्सह ॥४॥
यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुख किमस्य किं बाहू किमूरू पादा उच्येते ॥५॥
ब्राह्मणोस्य मुखमासीद्वाहु राजन्यो ऽभवत् ।

मध्यं तदस्य यद्वैश्य पद्यां शूद्रो अजायत ॥६॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥७॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमि र्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥८॥
विराडग्रे सम भवद्विराजो अधिपूरुषः ।
सजातो अत्यरिच्यत पश्चाद् भूमि मथोपुरः ॥९॥
यत्पुरुषेण हविषा देवा यजमतन्वत ।
वसन्तो अस्या सीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१०॥
तं यज्ञ प्रवृषा प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या वसवश्चये ॥११॥
तस्मा दश्वां अजायन्त ये च के चोभयादतः ।
गावोह जज्ञिरे तस्मत्तस्माज्जाता अजावयः ॥१२॥
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्य जुस्तष्मादजायत ॥१३॥
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशुन्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्चये ॥१४॥
सप्तास्य सन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुष पशुम् ॥१५॥
मूर्द्धो देवस्य बृहतो अंशवः सग्रसप्ततीः ।
राज्ञः सोमस्या जायन्त जातस्य पुरुषादधि ॥१६॥

॥इति पौरूषेय सूक्तम्॥

नूतन मूर्तिनां प्रतिष्ठापनम्

अथ प्राणप्रतिष्ठा:

सुवर्णरौप्यताम्रादिधातुमूर्तीनां पाषाणादिमूर्तीनां पार्थिवमूर्तीनां वा प्राणप्रतिष्ठां कारयेत्॥

आचमन प्राणायाम करके संकल्प करे॥ यथा-

अद्या पूर्वोच्चारित एवं गुणविशेषण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृति पुराणोक्तफल प्राप्त्यर्थं मम सकलकुटुम्बानां क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं ममात्मनः अक्षय्य सुख प्राप्त्यर्थं पितृतो मातृतश्च दशपूर्वान् दशापरान् एकविंशतिपुरुषानुद्धर्तुं धर्मार्थकाममोक्ष चतुर्विध-पुरुषार्थ सिद्ध्यर्थं परमपदप्राप्तये आसाममुकमूर्तीनां टङ्कघनादिदोष परिहारार्थं मृत्तिकासंघट्टनादि दोषपरिहारार्थं वा अग्न्युत्तारण पूर्वक आसाममुकमूर्तानां जातकर्मादिपंचदश संस्कारपूर्वक देवकला सान्निध्यार्थं प्राणप्रतिष्ठां करिष्ये।

इस प्रकार संकल्प करके नूतन मूर्तियों को ताम्रपात्र में यथोचित स्थान में स्थापित करके पुष्प से घृत लगाकर शुचि अशुचि दोष निवारण हेतु अग्नि पर प्रतपन करके आगे लिखे मंत्रो से जलधारा देवे। अग्न्युत्तारण करे।

अथाग्न्युत्तारणसूक्तम्

ॐ समुद्रस्य त्वाव कयाग्ने परिव्वयामसि। पावको अस्मभ्य ꣳ शिवो भव ॥ १ ॥ ॐ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि। पावको अस्मभ्य ꣳ शिवो भव ॥ २॥ उपज्म्मन्नुपवेतसेवतरं नदीष्वा। अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो यज्ञम्पावकवर्ण ꣳ शिवङ्कृधि ॥ ३॥ अपामिदं न्यन ꣳ समुद्रस्य निवेशनम्॥ अग्न्यास्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ꣳ शिवो भव ॥ ४॥ अग्ने पावक रोचिषामन्द्रया देवजिह्वया। आदेवान्वक्षि यक्षि च ॥५॥ स नः पावक दीदिवोग्ने देवाँ इहावह। उपयज्ञ ꣳ हविश्च नः ॥ ६॥ पावकया यश्चितयन्त्या कृपाक्षामनुरुरुच उषसोन भानुना। तूर्वन्नयामन्नेतशस्य नूरणऽआयो घृणे न ततृषाणो अजरः ॥ ७॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्च्चिषे। अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ꣳ

शिवो भव ॥ ८ ॥ नृषदेवेडपसुषदेवेड् बर्हिषदे वेड्वनसदेवेट् स्वर्विदेवेट् ॥ ९ ॥ ये देवा देवानां यज्ञिया यज्ञियाना ठं संवत्सरीण मुपभगमासते। अहुतादो हविषो यज्ञे अस्मिन् स्वयं पिबन्तु मधुनो घृतस्य ॥ १० ॥ ये देवा देवेष्वधिदेवत्व मायन्येब्रह्मणः पुर एतारो अस्य। येभ्यो न ऋते पवतेधाम किञ्चन न ते दिवो न पृथिव्या अधिस्नुषु ॥ ११ ॥ प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य ७ शिवो भव ॥ १२ ॥

प्राणप्रतिष्ठाः

पहले विनियोग करे–

ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुःसामाथर्वाणि छन्दांसि। क्रियामयवपुः। प्राणाख्या देवता। आँ बीजम्। ह्रीं शक्तिः। क्रौं कीलकम् अस्यां नूतनमूर्तौ प्राणप्रतिष्ठापने विनियोगः।

अब आगे के मंत्र बोलते हुए पुष्प, कुशा, स्वर्णशलाका अथवा अंगुष्ठ से मूर्ति के अंगों का स्पर्श करते जावें। --

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ॥ १ ॥ हंसः सोऽहम् आसां नूतनमूर्तीनां प्राणा इह प्राणाः तिष्ठन्तु ।

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ॥ २ ॥ हंसः सोऽहम् आसां नूतनमूर्तीनां जीव इह स्थितः॥

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ॥ ३ ॥ हंसः सोऽहम् आसां नूतनमूर्तीनां सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्रजिह्वा घ्राणपाणि पादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥

प्रतिमा के **हृदय पर अंगुष्ठ** लगा कर बोलेः–

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाश्चरंतु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥

अब प्रतिष्ठा के लिये निम्न मंत्र बोले–

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्ठं यज्ञ ७

समिमन्दधातु। विश्वेदेवासइह मादयन्तामोँ ३ प्रतिष्ठ ॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति॥

"**सुप्रतिष्ठितो भव**" ऐसा बोलकर देवता के सव्य कर्ण में गायत्री जपे॥

अब नूतन मूर्ति की पंचोपचार पूजा करके **संस्कार सिद्धि के लिये पंद्रह बार-**

ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ

बोलकर "**मूर्तीनां जातकर्मादि पंचदशसंस्कारान् संपादये**" इस प्रकार बोल देवे।

फिर प्रार्थना निम्न श्लोकों से करें-

स्वागतं देवदेवेश मद्भाग्यात्त्वमिमिहागतः ।
प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥
धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभाय नः ।
सान्निध्यं तु सदा देव स्वार्चायां परिकल्पय ॥

अब जल हाथ में लेकर बोले-

अनेन अमुकनूतनमूर्तौ मूर्तिषु वा प्राणप्रतिष्ठाकर्मकृतेन अमुकदेवता प्रीयतां न मम॥ ॐ तत्सत् ब्रह्मार्पणमस्तु॥

(इति नूतनमूर्ति प्राणप्रतिष्ठा॥)

श्रीदेव्यथर्वशीर्षम्

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति ॥१॥ साब्रवीत्अहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च ॥२॥

अहमानन्दानान्दौ। अहं विज्ञानाविज्ञाने। अहं ब्रह्माब्रह्मणीद्वे ब्रह्मणीवेदोऽहम वेदितव्ये। इति वाथर्वणीश्रुतिः। अहं पञ्चभूतान्य पञ्चभूतानि। अहमखिलं जगत् ॥३॥

वेदोऽहम् । विद्याहमविद्याहम्। अजाहमनजाहम्। अधश्चोर्ध्वं च तिर्यक्चाहम् ॥४॥

अहं रुद्रेभिर्वसुभिश्चरामि। अहमादित्यैरुत विश्वेदेवैः। अहं मित्रा-वरुणावुभौ बिभर्मि। अहमिन्द्राग्नी अहमश्विनावुभौ ॥५॥

अहं सोमं त्वष्टारं पूषणं भगं दधामि। अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ॥६॥

अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते। अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे। य एवं वेद। स दैवीं सम्पदमाप्नोति ॥७॥

ते देवा अब्रुवन् - नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥८॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवी शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः ॥९॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टतैतु ॥१०॥

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कंदमातरम् ।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् ॥११॥

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि ।
तन्नो देवी प्रचोदयात् ॥१२॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ।
तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥१३॥

कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च पुरुच्यैषा विश्वमातादिविद्योम् ॥१४॥

एषाऽऽत्मशक्तिः। एषा विश्वमोहिनी। पाशाङ्कुशधनुर्बाणधरा ।
एषा श्रीमहाविद्या। यएवं वेद स शोकं तरति ॥१५॥

नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः ॥१६॥

सैषाष्टौ वसवः। सैषैकादश रुद्राः। सैषा द्वादशादित्याः सैषा विश्वेदेवाः सोमपा असोमपाश्च। सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः। सैषा सत्त्वरजस्तमांसि। सैषा ब्रह्मविष्णुरुद्ररूपिणि।

सैषा प्रजापतीन्द्रमनवः। सैषा ग्रहनक्षत्रज्योतींषि। कलाकाष्ठादिकालरूपिणि। तामहं प्रणौमि नित्यम्॥ पापापहारिणीं देवीं भुक्ति मुक्ति प्रदायिनीम्। अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् ॥१७॥

वियदीकारकसंयुक्तं वीतिहोत्रसमन्वितम्।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ॥१८॥

एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।
ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः ॥१९॥

वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्।
सूर्योऽवाम श्रोत्रबिन्दु संयुक्तष्टात्तृतीयकः।
नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः।
विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः ॥२०॥

हृतपुण्डरीकमध्यस्थां प्रातः सूर्यसमप्रभाम्।
पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम्।
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे ॥२१॥

नमामि त्वां महादेवीं महाभयविनाशिनीम्।
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् ॥२२॥

यस्यां स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया। यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता। यस्या लक्ष्यं नोपलक्ष्यते तस्मादुच्यते अलक्ष्या। यस्यां जननं नोपलभ्यते तस्मादुच्यते अजा। एकैव सर्वत्र वर्तते तस्मादुच्यते एका। एकैव विश्वरूपिणि तस्मादुच्यते नैका। अत एवोच्यते अज्ञेयानन्तालक्ष्याजैका नैकेति ॥२३॥

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी।
यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥२४॥

तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम्।
नमामि भवभीतोऽहं संसारार्णवतारिणीम् ॥२५॥

इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति। इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति शतलक्षं प्रजप्त्वापि सोऽर्चा-सिद्धिं न विन्दति। शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः। दशवारं पठेद् यस्तु सद्यः पापैः प्रमुच्यते। महादुर्गाणि तरति महादेव्याः प्रसादतः ॥२६॥

सायमधीयानो दिवसकृतं पापंनाशयति। प्रातरधीयानो रात्रिकृतं पापंनाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर्भवति। नूतनायां प्रतिमायां जप्त्वा देवतासांनिध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानांप्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति। स महामृत्युं तरति य एवं वेद। (इत्युपनिषत्)॥

अथ गणपत्यथर्वशीर्षम्

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि नित्यम्। ऋतं वच्मि। सत्यं वच्मि। अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्। त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानंदमयस्त्वं ब्रह्ममयः। सच्चिदानन्दा द्वितीयोऽसि। त्वंप्रत्यक्षं ब्रह्मासि त्वं ज्ञानमयो विज्ञानमयोऽसि सर्व जगदिदं त्वत्तो जायते। सर्वजगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापो ऽनलोऽनिलो नभः। त्वं चत्वारि वाक्पदानि। त्वं गुणत्रयातीतः त्वमवस्था त्रयातीतः। त्वं देह त्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारोस्थितोऽसि नित्यम्। त्वं शक्ति त्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिंद्रस्त्व मग्निस [illegible] सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः [illegible]म्।

गणादीन्पूर्वमुच्चार्य वर्णादींस्तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण रुद्धम्। एतत्तव मनुस्वरूपम्। गकारः पूर्वरूपम्। अकारो मध्य रूपम्। अनुस्वारश्चान्त्य रूपम्। बिन्दुत्तररूपम्। नादः सन्धानम्। स ँ हिता सन्धिः। सैषा गणेश विद्या। गणक ऋषिः। निचृद्गायत्री छन्दः। गणपतिर्देवता॥ ॐ गं गणपतये नमः॥ एक दन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्॥

एकदन्त चतुर्हस्तं पाशामङ्कुश धारिणम्।
रदं च वरदं हस्तैर्विभ्राणं मूषकध्वजम्॥
रक्तं लंबोदरं शूपकर्णकं रक्तवाससम्।
रक्तगन्धानुलिप्ताङ्गं रक्त पुष्पैः सूपूजितम्॥
भक्तानुकम्पिनं देवं जगत् कारणमच्युतम्।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्॥

एवं ध्यायंति यो नित्यं स योगी योगिनां वरः। नमो व्रातपतये नमो गणपतये नमः। प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः॥

एतदथर्वशीर्षयो ऽधीते। स ब्रह्मभूतेय कल्पते। स सर्व विघ्नैर्न बाध्यते। स सर्वतः सुखमेधते। स पञ्चमहापापात्प्रमुच्यते। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायम्प्रातः प्रयुञ्जानो अपापो भवति।

सर्वत्राधीयानो ऽप विघ्नो भवति। धर्ममर्थं कामं मोक्षं च विन्दति। इदमथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद्दास्यति स पापीयान्भवति। सहस्त्रावर्तनाद्यं यं काममधीते। तं तमनेन साधयेत्। अनेन गणपतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नञ्जपति स विद्यावान्भवति॥

इत्यथर्वण वाक्यम्। ब्रह्माद्यावरणं विघान्न विभेति कदाचनेति। यो दुर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान् भवति। स मेधावान् भवति। यो मोदक सहस्त्रेण यजति स वाञ्छित

फलमवाप्नोति। यः साज्य समिद्धिर्यजति स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्य वर्चस्वी भवति। सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्ध मंत्रो भवति। महाविघ्नात्प्रमुच्यते। महादोषात्प्रमुच्ययते। महाप्रत्यवायात्प्रमुच्यते। स सर्वविद्भवति। स सर्व विद्भवति। य एवं वेद ॥ इत्युपनिषत्॥

॥इति गणपत्यथर्वशीर्ष ॥

अथ शिव अथर्वशीर्षम्

(शिवोपनिषद)

ॐ देवाह वै स्वर्गलोकमयंस्ते रुद्रमपृष्छन्। को भवानिति। सोऽब्रवीदहमेकः प्रथममासीद्वर्तासि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति। सोऽन्तरादन्तरं प्राविश दिशश्चान्तरं प्राविशत्सोहं नित्यातित्यो व्यक्ता व्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्च उदञ्चोहमधश्चोर्ध्वश्चाहं दिशश्च प्रतिदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावित्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहं छंदोऽहं सत्योहं गार्हपत्यो दक्षिणाग्निरा हवनीयोऽहं गौरहं गौर्यह मृगहं यजुरहं सामाहमथर्वाऽङ्गिरसोऽहं ज्येष्ठोहं श्रेष्ठोहं वरिष्ठोहमापेहं तेजोहं गुह्यो हमरण्योहं अक्षरमहंक्षरमहं पवित्र महमुग्रञ्च वलिश्च पुरस्ता ज्जोतिरित्यहमेव सर्वेभ्यो मामेव स सर्वः समायोमां वेदस देवान् वेद सर्वाश्च वेदान साङ्गानपि ब्रह्मब्रह्माण-श्चगांगोभि र्ब्राह्मणेन हविर्हविषा आयुरायुषासत्त्यं सत्येन धर्मेण धर्म तर्पयामिस्वेन तेजसा। ततोह वै ते देवा रुद्रमपृच्छन्। ते देवा रुद्रमपश्यन् ते देवा रुद्रमध्यायन् ते देवा उर्ध्वबाहवो रुद्रस्तुवन्ति।

ॐ यो वै रुद्रः सभगवान् यश्च ब्रह्मा तस्मै वै नमो नमः ॥१॥

यो वै रुद्रः सभगवान् यश्च विष्णुस्तस्मै वै नमो नमः ॥२॥

यो वै रुद्रः सभगवान् यश्च स्कंदस्तस्मै वै नमो नमः ॥३॥

यो वै रुद्रः सभगवान् यश्चेन्द्रस्तस्मै वै नमो नमः ॥४॥

यो वै रुद्रः सभगवान्यश्चाग्निस्तस्मै वै नमो नमः ॥५॥

यो वै रुद्रः सभगवान् यश्चवायु स्तस्मै वै नमो नमः ॥६॥
